तन्निवृत्तिरित्येवमर्थं ससकारग्रहणं· अथवा सदाद्यत्वे कृते सुटि च निर्दिश्यमानस्यादेशा इति सुट्सहितस्य न प्राप्नोति यस्तु निर्दिश्यते तस्य वचनसामर्थ्यान्निर्दिष्टग्रहणपरिभाषा तु
पस्यानामवहितस्याकमादेशः प्राप्नोति ससुट्कनिर्देशात्तु ससुट्कस्य भवति· अत्र पक्षे आमो भक्त आम्ग्रहणेन ग्रहीष्यत इति चोदकस्यैवग्रंथः॥

इतरस्तु पूर्वां व्याख्यामबुध्यमानो ऽन्तरंगं चेदोषवतीमवगम्याह· नवेति· टिलोप इति· वक्ष्यमाणमपर्यन्तस्यान्त्यपेक्षया शेषे विज्ञायमाने टेरवशेष इति तस्यैव लोपो विज्ञायते· शेष इति स्थानी विषय सप्तम्या निर्दिष्टः। लोपस्य चास्मिन्पक्षे उत्सर्गतादन्यादेशे आलयत्वविधानादादेश एव विभक्ताववतिष्ठते। टाप्प्रतिषेधार्थमिति· टापो ऽनुत्पत्त्यर्थमित्यर्थः। युष्मदस्मदोर्द्व्यवाचितादुव्य स्य चलिंग संख्या संबंधादंत्यलोपे सत्यकारांतत्वाट्टाप्प्राप्नोति· सन्निपातपरिभाषायाश्च दोषः पठितस्य टापकारस्याधिकृतेति टापि सा नाश्रीयते· अलिंगे इति· अभिधे यस्यालिंगत्वादलिंगे शब्दशक्तिस्वाभाव्याल्लिंगरहित एव ताभ्यामर्थो ऽभिधीयते इति गम्यते तत्र टिलोपो नाश्रयितव्यः। यो ऽसौ विशेषवाचीति· ननु योनकाष्टाबादयः। तदुक्तं

किंकारणं

नवा द्विपर्यंतानामकारवचनाद्भ्यामिसकाराभावः। नवैन प्रयोजनमस्ति· द्विपर्यंतानामकारवचनात्· द्विपर्यंतानां हि त्यदादीनामत्वमुच्यते तस्माद्भ्यामिसकारेण भविष्यति· सुड्प्रतिषेधस्त्वादेशे लोपविज्ञानात्· सुड्प्रतिषेधस्तु वक्तव्यः। किंकारणं· आदेशे लोपविज्ञानात्· यः सशेषेलो पः आदेशे स विज्ञायते· नवा टिलोपवचनादादेशे टाप्प्रतिषेधार्थं· नवा सुड्प्रतिषेधो वक्तव्यः किंकारणं· टिलोपवचनात्· आदेशे यः सशे षे लोपः स टिलोपो वक्तव्यः। किंप्रयोजनं· टाप्प्रतिषेधार्थं टाम्भूदिति· सतर्हि टेर्लोपो वक्तव्यः न वक्तव्यः। नवा लिंगाभावाट्टिलोपव चनानर्थकं· नवा वक्तव्यं· किंकारणं लिंगाभावात्· अलिंगे युष्मदस्मदी· किं वक्तव्यमेतत्· नहि· कथमनुच्यमानं गंस्यते· नह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा· अस्ति कारणं येनैतदेवं भवति· किंकारणं· यो ऽसौ विशेषवाची शब्दस्तौ प्रत्ययशाब्दशब्दस्तदसा न्निध्यात्· अंग हि भवांस्तमुच्चारयतु गंस्यते सविशेषः। ननु चनैवं भवितव्यं· नहि शब्दनिमित्तकेन नामार्थेन भवितव्यं किं तर्ह्यर्थनिमित्तकेनना

=तमप्यूह्ये·२=

सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय इति· नैष दोषः। इदमप्युक्तं अथवा पुनरस्तु स्त्रियामभिधेयायामिति· अथवावचि र्द्योतने वर्तते वाचकेन रवस्त्वप्युसत्तवं वाचकश्चैवस्त्रयोक्त्यो वाचकश्चैव स्यसुभ्यतामिस्तत्र वचिर्द्योतने प्रयुक्तः। नहि शब्दनिमित्तकेनेति· ननु शब्दनिमित्त एवार्थः तथा चैकरूपो ऽप्यर्थो भिन्नशब्दोच्चारणान्नानारूपः प्र तिभाति· यथा पचति पाकं करोति पाकक्रियायां निर्वृत्तिं करोतीति· तथा च बलाहकाद्विद्योतते बलाहकोविद्युत्बलाहके विद्योतत इति· कंसादीनां च साधनत्वं शब्दोपहितरूपालो बु द्धिविषयाणां हेतुमति चेत्यत्र प्रतिपादितं· एवं तर्हि यः शब्दो लोके ऽसंतमप्यर्थं प्रयोगस्तन्निमित्तो ऽर्थो न भवतीत्युच्यते शब्दप्रयुज्यमानेन लोकस्यानुसरणात्· स्वसामर्थ्येन हि शब्दो

=यः शब्द इति· लोकव्यवहारायस्य शब्दस्य पदार्थसामर्थ्यमवगतं ततो ऽन्यो योर्थः स तन्निमित्तो न भवति युक्तं सिद्धार्थ [illegible] गम्यार्थ इति भावः। १= शब्द अनुसृतो प्रतिभासमानरूपशब्दार्थ इत्यत्र हेतुत्वातां तस्मात्· कंसादीनामिति· २=

=युष्मदस्मद्भ्यां ... अर्थ प्रतीयते तदित्यर्थः ।१८ ‒ वाह्यार्थरूपं ।१ ‒

भा॰के॰

१२

लिंग‒

अर्थरूपमिति । सत्यपि वस्तुनो लिंगवत्वे युष्मदस्मद्भ्यां न तत्प्रत्याययितुं शक्यत इत्यर्थः । युष्मदस्मदभिधेयं चार्थरूपं शब्देनोच्यते न वस्तुरूपं तस्यैव वस्तुनो ब्राह्मणादिशब्दैरुक्तस्य प्रतिपादनात् । न चायं नियमः सत्वभूतो ऽर्थो ऽवश्यं लिंगसंख्यायुक्तः प्रतीयत इति पंचसप्तेति लिंगसंख्यानवगमात् । तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययप्रतिषेधः प्रत्याख्यायते । केचिल्लिंगविशेषविधिं मन्यमाना लिंगसर्वनामनपुंसकं युष्मदस्मदोर्विच्छन्ति । तथा च शिरीषी कुङ्कुमं युष्मदस्मदिति त्यादेशानां ▬▬▬ विप्रतिषेध उक्तः । अन्ये तु दर्शनभेदेन शिरीषी कुमं विप्रतिषेधः पुंस्त्रिनपुंसकं च लिंगवत्वासुपगमेन प्रदर्शितं सत्वभूतस्यार्थस्यावश्यं लिंगसंख्यायोगः । तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययप्रतिषेधः कृतः । इह तु लिंगत्वेन टाप्परिहृत इति विशेषं परिहरंति । तस्मादिति । टाबभावे ट्लोपाभावश्च यत्त्वं सलोपे सति सुपः श्राप्तस्य प्रतिषेधो विधेयः । लाघवात्सकारग्रहणं कर्तव्यं अथेति । आदेशप्रवृत्तिकाले सन्निहितआदेशेन निव

तदेतदेवं दृश्यतामर्थरूपमेवैतदेवं जातीयकं येनात्र विशेषो न गम्यत इति । अवश्यं चैतदेवं विज्ञेयं यो हि मन्यते यो ऽसौ विशेषवाची शब्दः स्त्रीप्रत्ययश्चाप्रशब्दस्तदसान्निध्यात्तत्र विशेषो न गम्यत इति । इहापि तस्य विशेषो न गम्येत त्वयत्त्वमिदिति । तस्मात्सुट्प्रतिषेधः । तस्मात्सुट्प्रतिषेधो वक्तव्यः । सत्सकारग्रहणं वा कर्तव्यं । अथ क्रियमाणे पि सत्सकारग्रहणे कस्मादेवात्र सुगुणनवति । सत्सकारग्रहणसामर्थ्यात्तभाविनः सुट आदेशो विज्ञायते ॥ ॥आतओणलः॥ इहपपौ तस्मादिति त्रीणि कार्याणि युगपत्प्राप्नुवंति । द्विर्वचनमेकादेश ओत्वमिति । तद्यदि सर्वत ओत्वं लभ्येत कृतं स्यात् अपापि द्विर्वचनं लभ्येत एवमपि कृतं स्यात् तत्तु न लभ्यं । किं कारणं । अत्र हि परत्वादेकादेशो द्विर्वचनं बाधते । परत्वादोत्वं । नित्य एकादेश ओत्वं बाधेत । कं पुनर्भवानोत्वस्यावकाशं मत्वा हनित्य एकादेश इति । अनवकाशं ओत्वमेकादेशं बाधिष्यते ओत्वे कृते द्विर्वचनमेकादेश इति ॥ ॥ =सर्वथैवेति सत्यसति च नित्यत्वे एकादेशस्य ... =

=अबुद्धिनित्यप्रसंगात् ।५‒ लोपात्ययः ॥ सत्सकारग्रहणसामर्थ्यादिति । न हि सत आदेशेन निवृत्तिः क्रियते किं तर्हि संतासावपस्मिन्विषये तस्यानेमोपायेनान्वाख्यायते । शास्त्रेण तु प्रसंगवतो निवृत्तिराख्यायत इति भाविनः सुटो निवृत्तिः स सुट्कृदिहेशेन प्रतिपाद्यते ॥ ॥आतओणलः॥ ॥त्रीणि कार्याणीति । नित्यत्वस्तु प्रयोजनाभावाल्लोपन्यस्तः सर्वथा तावदनत्वमसिद्धत्वात् ओत्वं लभ्येत कृतं स्यादिति । एकादेशे कृते ओत्वाप्राप्तिदोषः परिहृत इत्यभिसंधाय द्विर्वचनासिद्धावपि कृतमित्युक्तं द्विर्वचनं लभ्येतेति । एकादेशे कृते ऽनपवर्गाभावाद्वा द्विर्वचनाप्राप्तिः सा परिहृता भवतीत्येतावता द्विर्वचनसिद्धा कृतमित्युक्तं । परत्वादेकादेश इति । वर्णाश्रयत्वादंतरंगत्वादपीति द्रष्टव्यं । नित्य एकादेश इति । पपप कृते ओत्वे सवर्णदीर्घत्वं प्राप्नोति कृते तु वृद्धिस्तथापि ... नाश्रित्यैकादेशस्यानित्यत्वमुच्यते । ओत्वं तु कृत एकादेशे नैव प्राप्नोतीत्यनित्यं । अनवकाशमोत्वमिति । सावकाशस्य सवर्णदीर्घस्य बाधकमित्यर्थः ॥ =न चोत्वे सिद्धे ... =

=अन्यथा हि ... एकादेशे ओत्वाप्राप्तेरनित्यत्वप्रसंगात् ।१‒

शिव॰

१२

=न-चनयकार्योलंदीर्घमद्दिंजेनेस्यत आह-कोमेति-ओ लंनतोह्हिलतः स्थानिवत्वाद्दित्विति क्रमप्रतिपत्त्यर्थ पदनवकाशत्वमाश्रितंन। न निरवदेकादेशस्यामान्यापेक्षं किंतु दीर्घापेक्षमिति दिर्वलेवेति भावः।१८ मन्यतेइति-प्रसोःसंप्रसारणमिति प्रदेवेपि अनुवंधे नवलकारः अपि

यद्यपीति-वार्णादांगंबलीयइतिपूर्वंदिर्वचनंभवति-अथायंगाधिकारविहितमांगमुच्यते तथापिनदोषइतिभावः। स्थानिवद्भावादिति-दिर्वचननिमित्ते विपरतोआदेशः स्थानिवद्भवतीतिसूत्र र्थमाश्रित्यैकादेशे कृते चूपरताभावात्स्थानिवद्भावआरंभ किंतः अचियोविहितोआदेशः सस्थानिवदिति सूत्रार्थाश्रयणेननु स्थानिवद्भावउक्तः। नहि स्थानिवद्भावस्य परभूतोचनिमित्त भूतआश्रीयते किंतर्ह्यादेशस्य-यदितर्हि स्थानिवद्भावाद्द्विर्वचनंततोनित्यंतदितिपूर्वमेवतेनप्रवर्त्तं-नेतदस्ति-एकादेशेपि नित्योंतरंगश्चेतिसएवपूर्वंप्रवर्त्ततेक्रमप्रतिपत्त्यर्थंचानव काशत्वमोलस्याश्रितंहद्दिलक्षणंचैकादेशमोलंनवाधतेनहितस्मिन्नौत्वंओलमारभ्यते। ॥विदेःशतुर्वसुः॥ ॥वसोःकित्वमिति-लिगादेशस्यकित्वमस्तीतितद्धनुरोधेनकि त्त्वमुच्यते अनुबंधांतरेणापितस्यसानुबंधकत्वंसंपद्यते-अननुबंधकग्रहणेइति-स्थानिवद्भावादुगित्कार्यससिद्धतादुकारउच्चारणार्थोनानुबंधइतिमन्यते-ससापिवासानुबंधक

यद्यपिपरत्वादेकादेशःस्थानिवद्भावाद्विर्वचनंत्रविष्यति-॥ ॥विदेःशतुर्वसुः॥ ॥विदेर्वसोःकित्वं-विदेर्वसोःकित्वंवक्तव्यं-वसुग्रहणे ~~पुलिङा~~देशस्या पिग्रहणंयथास्यात्-किंकारणंनस्यात्-अननुबंधकग्रहणेहिसानुबंधकस्यग्रहणंनेत्येवंलिगादेशस्यनप्राप्नोति-सानुबंधकोहिसःक्रियते-किंपु नःकारणंसानुबंधकःसक्रियते-अयमृकारांतानांलिडिगुण[illegible]ःप्रतिषेधविषयआरभ्यतेसपुनःकिंकरणंबाध्यते-आतिती[illegible] [illegible]र्वान्वतिपुपूर्वानिति-सतर्ह्यस्यैवमर्थोनुबंधःकर्त्तव्योनकर्त्तव्यः। क्रियतेन्यासएवद्विसकारकोनिर्देशः-विदेःशतुर्वसुस्समासेऽनञ्पूर्वेक्त्वो ल्यविति-॥ ॥समासेऽनञ्पूर्वेक्त्वोल्यप्॥ ॥ल्यबादेशेउपदेशिवचनं-॥ ॥

त्वेतद्दनुबंधकग्रहणपरिभाषयाक्वसोरग्रहणप्रसंगःपरिभाषोपादनंतवग्रहणेकार पलक्षणं-किंपुनःकारणमिति-असंयोगाल्लिट्किदितिकित्त्वसिद्धत्वा[illegible]दसुरेवलिटोविधीयतां-अयमिति-यथानेरतुरित्यादेर्गुणोनुवतितथावसावपिस्यादितितद्बाधनार्थंकित्वं क्रियते-एतद्ध्प्रयोजनोपलक्षणमितिसंयोगांतार्थमपिकित्वमित्याह-तेनाजिवानित्यंजेःरेधिवानितिरधेर्नुम्सिद्धोभवति-ननुसंयोगांतार्थंतेकित्वस्यकथंप्रतिषेधविषयआ रभ्यमाणोगुणोबाध्यःऽच्यते-ऋकारांतेभ्यःपरस्यक्वसोरोपदेशिकातिदेशिककित्वद्वयसामर्थ्यात्क्रितिचेतिगुणनिषेधोद्विरूपनिष्ठतेतत्रपुनरूपस्थानंप्रतिषेधविषयेगुणनि षेधंविधास्यतिकेचिदाहुःछांदसःक्वसुस्तमछंदस्युभयथेतिसार्वधातुकत्वान्ङित्त्वान्नलोपस्यसिद्धत्वात्संयोगांतार्थंकित्वंनोपयुज्यते-दिसकारकइति-वसुस्सिस्यादेशानिर्दि ष्टस्त्वत्रसकारस्यरुत्वविसर्जनीयोकतौनतःसकारेणसानुबंधत्वंवसोःसंपद्यतइतिवसुप्रदेशेप्रत्ययोरविशेषात्ग्रह[illegible]णंसिध्यति-॥ ॥समासेनञ्पूर्वे॥ ॥ल्यबादेशइति-अनेनो पदाश्रयसमासनिमित्तोल्यबादेशोवहिरंगोहितादयस्त्वेकपदविषयप्रकृतिप्रत्ययापेक्षांतरंगाइतितत्पूर्वप्राप्नुवंतीतिभावः-तत्रोपदेशेसमासइतिविरोधात्समासेविषयतेआश्रीयतेसमासविष

=त्वोपदेशेसमासाभावात्-९=

पूर्वोक्तविरोधपरिहाराय भाष्यकारोतिदेशं व्याचष्टे॰ उपदेशिवद्भावो वक्तव्य इति॰ उपदेशावस्थायामिति॰ अत्रास्युपमानोपमेयसंबंधो द्रष्टव्यः॥ कृतेपि समासेत्यभवन्तु पदेशिवद्भवति॰ अकृतेषु हित्वादिषु भवतीत्यर्थः॥ अथवा समास इति विषयसप्तम्या श्रयमेव भाष्यं॰ उपदेशावस्थायां त्यभवतीत्युपदेशिवद्भावो वक्तव्य इत्येतत्तु वस्तुव्याख्यानं॰ उपदेशावस्थायां हि त्यद्भवन्नन्यै रूपदेशिभिस्तुल्यं भवतीत्य र्थः॥ अनादिष्टार्थमिति॰ आदेशश्चादिष्टं तस्याभावोनादिष्टमित्यव्ययीभावः॥ प्रत्यवन्त्येतिः पे विभाषेति विकल्पेनात्वमिष्यते जनसनखनां सञ्झलो रिति सनेन तु त्यवादेशस्तु र्वं नित्यं प्राप्नोति॰ प्रदीव्येति॰ पूर्वमिति कृते निर्दिश्यमानस्यादेशा भवंतीति कोत्यपि सतीटः श्रवणं प्राप्नोति॰ अथापि कथं चित्सेकृस्य त्यप्स्थाने स्यात्तथापि स्यानिवद्भावान्नस्क्त्वा सेड् इति कित्वनिषेधाद्गुणः प्रसज्येत दीर्घत्वस्यासिद्धत्वात्सरत्वादिति॰ इष्टत्वादिसर्पः॥ इतरस्ति स्थानिवद्विभागेन ज्ञायत इति मत्वस्याश् श्रृत्वानेन

केवलस्य २

त्यवादेश उपदेशिवद्भावो वक्तव्यः॥ उपदेशावस्थायां त्यभवतीति वक्तव्यं॰ किं प्रयोजनं॰ अनादिष्टार्थं॰ अकृतेष्वादेशेषु त्यब्यथा स्यात्॰ के पुनरादे

शा उपदेशं प्रयोजयंति॰ हित्व दत्व लोत्वदीर्घत्वश्रूइटः॥ हित्वं॰ हित्वा॰ प्रधाय॰ दत्वं॰ दत्वा प्रदाय॰ आत्वं॰ खात्वा प्रखन्य॰ इत्वं॰ स्थित्वा प्रस्थाय॰ ईत्वं॰ पीत्वा प्रपाय॰ दीर्घत्वं॰ शांत्वा प्रशम्य॰ शत्वं॰ पृष्ट्वा आपृच्छ्य॰ ऊठ्॰ द्यूत्वा॰ प्रदीव्य॰ इट्॰ देवित्वा प्रदीव्य॰ किं पुनः कारणमादेशास्त्वावद्भवंति न पुनस्त्यपि॰ परत्वात्प्राप्नुवंतितः॥ संति चैवात्र केचित्सरे प्यादेशाः॥ अपि च बहिरंगलक्षणत्वात् बहिरंगोत्यप् अंतरंगाश्चादेशाः असिद्धं बहिरंगमंतरंगे॰ सत्यप्युपदेशिवद्भावो वक्तव्यः न वक्तव्यः॥ आचार्यप्रवृत्तिर्ज्ञापयत्यंतरंगानपि विधीन्बहिरंगोत्यब्बाधत इति॰ यदयमदोजग्धिर्त्यप्ति किति तिं किति सेव सिद्धेत्यब्ग्रहणं करोति॰ स्नात्वाकालकादिषु च प्रतिषेधो वक्तव्यः॥ स्नात्वाकालकः पीत्वास्थिरकः भुक्त्वासुहितक इति॥ ॥

परत्वाच्चेः प्रयुक्त इति मत्वाह॰ संति चेति॰ बहिरंगलक्षणत्वादिति॰ समासापेक्षं बहिरंगं लक्षणं शास्त्रमस्येति समासः॥ अथवा बहिरंगः समासो लक्षणं निमित्तमस्येत्यर्थः॥ यदयमिति॰ तिं किति सेव जग्धिभावस्य त्यबादेशस्यागे वसिद्धत्वात्त्यब्ग्रहणं यथोक्तमर्थं ज्ञापयति॰ स्थानिवत्त्वे नैव पुमदस्त्येरनादेश इत्यनादेशग्रहणं तत्स्थानापन्नस्य तद्धर्मत्वात्स्वरूपविधिनानिरस्तस्य ज्ञापकमुक्तं॰ त्यब्ग्रहणं तु आश्रयेषु कार्येषु तद्धर्मता नाभावस्य यमर्थमंतरेणास्यार्थस्यानुपपत्तिस्तस्य सर्वस्य तज्ज्ञापकं भवतीत्यनेकोप्यर्थोत्यब्ग्रहणेन ज्ञाप्यत इति विशेषाभाव॥ स्नात्वाकालकादिष्विति॰ मयूरव्यंसकादिषु समासप्रकरणे [illegible] त्समासार्थं एवैषां पाठस्तत्र समासेनैव पूर्वे योयवस्थितः क्त्वाप्रत्ययस्तस्य त्यब्विधीयमानो प्राप्नोति॥ ॥

तदंतनिर्देशादिति॰ क्तांतः समास इति निर्दिश्यत इत्यर्थः॥ समास इति निर्देशे सप्तमी सामान्यापेक्षं चैकवचनं॰ अथवा छांदसं बहुवचनस्य स्थाने॰ निर्देशेन च समानजातीयस्य भवतीति क्तां
तः समासो गृह्यते॰ निर्दिश्यमाणस्य क्तांतग्रहणेन [illegible] विशेषणं तदंतविधौ सत्यपि प्रयोजनवति समासे घनत्र्सर्वं युक्तांतस्य समासस्य त्वप्रवृत्तिः स च निर्दिश्यमानस्यादेशा भवती
ति स एव भवति॰ समास निपातनादिति॰ सर्वसंधारयस्तौ साधुत्वमभ्यनुज्ञायते प्राकरणिकाप्राकरणिककार्यं भावाभावविधानद्वारेणेत्यर्थः॥ येषु चाचस्ताताकालकादिषु तत्र
पदानुपात्तक्रियापेक्षः क्ताप्रत्ययः तेषां सापेक्षत्वेपि निपातनात्समासः॥ अनञो वापरस्येति॰ अनञ्वा सो पूर्वश्चेति समासो निपातनात्पूर्वशब्दस्य परनिपातः॥ दिश्यते

तदंतनिर्देशात्किं॰ तदंतनिर्देशात्सिद्धमेतत्॰ क्तांतस्य त्यपा भवितव्यं न चैतत्क्तांतं॰ समास निपातनाद्वा॰ अथवा॥ वक्ष्यमत्र समासार्थं निपा
तनं कर्त्तव्यं तेनैव यत्नेन त्यबपि न भविष्यति॰ अनञो वापरस्य॰ अथवा अनञः परस्य त्यपा भवितव्यं न चायं नञ्पश्यामः॥ ननु च धातुरेवा
नञः तद्धातोः परस्य भवितव्यं॰ किं कारणं॰ नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥ नञ्युक्तमिव युक्तं चान्यस्मिंस्तत्सदृशे कार्यं
विज्ञायते॰ कुत एतत्॰ तथा ह्यर्थो गम्यते॰ तद्यथा॰ अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति॰
एवमिहापि अनञिति नञ्प्रतिषेधादनञ्स्तत्सदृशात्कार्यं विज्ञास्यते किं चान्यदनञ्नञ्सदृशं॰ पदमित्याह॰ अथवा प्रत्ययग्रहणेय
स्मात्स [illegible] तदादेर्ग्रहणं भवतीति॰ एवं धातुरपि क्ताग्रहणेन त्याज्यते॰ ननु चेयमपि परिभाषास्ति॰ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भ
वतीति॰ सापीहोपतिष्ठते॰ तत्र को दोषः॥ इह न स्यात्॰ प्रकृत्य प्रहृत्य॰ कृतं हि स्यात्॥ ॥

न विवक्षितत्वाद्वा॰ अनञिति वानुत्पन्नसप्तमीकं पृथक्
दं॰ सा तत्सप्तमीचेयं अनञिपूर्वे सतिस्वो त्यप्भवतीत्यर्थादनञः परस्येत्यर्थो वतिष्ठते॰ तदंतविधिश्चाचनाश्रीयते क्ताप्रत्ययस्य प्राधान्येन प्रकृत्या हि विशेषणता नायातदेन विधिस्तदंतस्येति
प्रत्ययग्रहणपरिभाषाश्रयस्तु तदंतविधिः परस्मादस्य तयेन नाव्यवधानमितिच धातुनाव्यवधानमाश्रीयते॰ ननु चेति॰ असत्यभूतार्थवाचित्वादिना धर्मेण धातुरपि नञ्[illegible]
भवतिन धातोः परस्येति॰ पदत्वनिबंधनं सादृश्यमाश्रीयते न तु धर्मान्तरनिबंधनं॰ नासत्यप्रमाणमित्याशंक्याह॰ अथवेति॰ क्ताग्रहणेन धातुप्रत्ययसमुदायस्य परिग्रहः
तदवयवत्वाद्धातोः स्वावयवेन पौर्वापर्यासंभवाद्धातुरनञ्ग्रहणेन न गृह्यते॰ प्रकृत्येति॰ गतेः क्तांते समुदायेनुप्रवेशात्सौर्वापर्याभावा

[illegible]

परमहृतेति॰ परमशब्देन गतिर्न चकारकमिति स्कांते॰ नंतमूंतः पूर्व इति ततः परस्य क्तांतस्याल्प प्रसंगः। गतिकारकपूर्वस्यापील्ल दिशश्च केवलस्यापि क्तेलेपादेः क्तांतस्य ग्रहणं तत्। आचार्य आह॰ न वै अत्रेष्यत इति॰ तस्मात्कृद्ग्रहणपरिभाषा चनाश्रीयते॰ चोदक आह॰ अनिष्टं चेति॰ आचार्य आह॰ गतिकारकपूर्वस्यैवेष्यत इति॰ प्रकृत्य पाश्चतः कृतेलोपादेल्य वादेश इष्यते कृद्ग्रहणपरिभाषोपस्थाने च न सिध्यतीति ना साबाश्रीयते॰ चोदक आह॰ कुतो नु खल्विति॰ प्रत्ययग्रहणपरिभाषाया अवकाशः उपगोरपत्यमौपगवः सत्र तद्धितांतस्य प्रातिपदिकत्वात्सुलुग्भवति॰ कृद्ग्रहणपरिभाषाया अवकाशः आवलेखी आवचर्चीति एचः स्त्रियामञि तिञ् पूर्वस्य एणजं नलोपः इति स्त्रिदि हस्वो न भवतः। अत्र हि प्रत्ययग्रहणपरिभाषायाः स्त्रीप्रत्यये चानुपसर्जनेन ने ति प्रतिषेधादुपस्थानाभावः एवं सावकाशयोः परिभाषयोर्भिन्नफलं योर्विरोधात्सर्यायो प्रतिपत्तिर्वा मा भूतो प्रत्ययग्रहणपरिभाषाया माश्रयमाणयां प्रकृत्येतिगतेः क्तांते॰ नंतर्गतो वालो वर्पर्यायो पपत्तौ ल्पप्रसिध्यतिन तु कृद्ग्रहणपरिभाषाश्रयणं इति फल भेदः। कार्यकालं संज्ञापरिभाषमित्यत्र दर्शने समानदेशत्वात्

परमकृता उत्तमकृता॰ न वै अत्रेष्यते॰ अनिष्टं च प्राप्नोतिइ ष्टं च न सिध्यति॰ गतिकारकपूर्वस्यैवेष्यते॰ कुतो नु खल्वेतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवति कृद्ग्रहणे गतिकारकपूर्वस्येति इयमिह परिभाषा भवति प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति इयं न भवति कृद्ग्रहणे गतिकारकपूर्वस्यापीति॰ आचार्यप्रवृत्तिर्ज्ञापयति इयमिह परिभाषा भवति प्रत्ययग्रहणे इति इयं न भवति कृद्ग्रहणे इति॰ यदयमनञ्जिति प्रतिषेधं शास्ति॰ कथं कृत्वा ज्ञापकं॰ अयं हि नञ्गतिर्न च कारकं तत्र कः प्रसंगो यन्न स्यात् पूर्वस्य स्यात् पश्यति त्वाचार्य इयमिह परिभाषा भवति प्रत्ययग्रहणे इति इयं न भवति कृद्ग्रहणे इति ततो ऽनञ्जिति प्रतिषेधं शास्ति॥ ॥७॥ ॥

रिभाषयोः परत्वेनाविप्रतिषेधस्य नास्ति॰ सांकृदिने तेव मव्यवस्था प्रसंगाद्यथोद्देशपक्ष आश्रयितव्यः तत्र हि परत्वेन व्यवस्था सिद्धिः। प्रत्ययग्रहणपरिभाषांग संज्ञासूत्रे योगविभागेन व्यवस्थापिता कृद्ग्रहणपरिभाषानुगतिरनंतरं इत्यत्रानंतरग्रहणेन ज्ञापितत्वात्परत्वं भवति॰ यदयमिति॰ कथं पुनरेतज्ज्ञापकं यावता सामान्य पि कृद्ग्रहणपरिभाषायामविशेषात् केवलस्यापि क्तांतस्य ग्रहणं कृतेलोपादेनञो गतिकारककत्वाच्च क्तांते नंतर्भावादस्य नञ्ग्रहणेल्प प्रसंगः। अप्रकृत्येलोपो मतिवेधार्थं चान्य पूर्वग्रहणं स्यात् उच्यते॰ अपि ग्रहणेन प्रत्ययग्रहणपरिभाषा समुच्चीयते तेन तत्पूर्व चेत्र समासे इतिवचनात्केवलस्य कृता देर्ग्रहणाभावात् पिशश्च समुच्चेतव्यस्याभावात् गतिकारकपूर्वस्यैव समासे स्याग्रहणं भविष्यतीति किं नञ्पूर्व इत्यनेनेति तत्किमपमाणं कृद्ग्रहणपरिभाषाया अनुपस्थानं ज्ञापयति॰ तदुपस्थाने तु तत्संनियमविधानमेव साधीयस्मात् तदेवं कृद्ग्रहणपरिभाषानुपस्थानेन न्यस्य इत्यादव्ययादासामासान्तिर्यामा समासावमवाल स्य भावादेः क्तांत स्य समासे क्तोल्पविधीयमानः स्त्रावाकालकः परमकृतेलोपादेनञ्भवति॰ परमं कृता परमकृतेति समासः परमशब्दस्य क्रियाविशेषणत्वात्सामानाधिकरण्यात्॥ ॥श्रीः॥ ॥७॥

=समासे विधीयमानस्य गतिकारकपूर्वस्य केवलस्य च क्तांतस्याल्य भवतीति स्वार्यमाश्रित्य पर्यनुयोगः। विधि क्रियाधाहाते गौरवात्प्रधानीभूत भवन क्रियमेव समास इति मत्समा अन्वमा समासेल्य भवति गतिकारकपूर्वस्य केवलस्य च क्तांतस्ये सर्था समाधानमाह॰ उच्यत इत्यादि॰४=

नत्सर्वमिति॰ गतिकारकत्सर्वमित्यर्थः॥ प्रत्ययग्रहणइति॰ प्रत्ययग्रहणपरिभाषयायावच्छासंतावद्गृह्यते॥ ॥सुपांसुलुक्पूर्वसवर्ण॰॥ सुशब्दे आदेश उच्यमाने ॥ऽपसुपोनप्राप्नुवंतीत्याहः सु
पांचेति॰ एतच्चसर्वं प्रत्ययोबहुलमितिवचनेन सिध्यति॰ पूर्वसवर्णेनापीति॰ चर्मन्इइति स्थिते इकारस्य पूर्वसवर्णेन निकारस्तस्मिन्पूर्वस्य नकारस्य स्वादिष्विति पदसंज्ञा
यां सत्यां लोपः एवं च नङिसंबुद्ध्योरित्यत्र ङिग्रहणमपि न कर्तव्यं भवति॰ प्रातिपदिकांतत्वाभावाद्धि न क्विन नकारस्य न लोपः प्रसंगात् पूर्वस्य च न नकारस्य लोपस्येष्ट
त्वात्॰ यदिति॰ यच्छब्दस्य सुपो लुक् प्रत्ययलक्षणनिषेधात्त्यदाद्यत्वाभावः येष्विति प्राप्ते॰ त्यदाद्यत्वमिति॰ सुशब्दस्य पूर्वसवर्णेन भवन्त्योः स्येलुकारस्य इकारः
प्राप्नोतिन तस्य त्यदाद्यत्वं बहुवचनेन भवति सतं स्कोःसंयोगाद्योरिति सकारलोपे च येदिति स्यात्॰ अथाप्येकवचनस्य स्थाने पूर्वसवर्णेन इकारः क्रियते तथापि स्या

किं नञः प्रतिषेधेन गतिर्न चकारकं॰ यावतानञ्पूर्वे तुल्यभावो न भविष्यति॰ प्रतिषेधानुजानीमस्तत्सर्वं न गृह्यते॰ प्रत्ययग्रहणे यावतावद्विवक्षितुम
र्हति॥ ॥सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः॥ ॥सुपांसुपोभवंतीतिवक्तव्यं॰ मुक्तामानासीद्धुरि दक्षिणायाः दक्षिणायामितिप्राप्ते॰ ति
ङांतिङोभवंतीतिवक्तव्यं॰ चषालं ये अश्वयूपाय तक्षति॰ तक्षंतीतिप्राप्ते॰ लुकि किमुदाहरणं॰ आर्द्रे चर्मन्लोहिते चर्मन्॰ नैतदस्ति॰ पूर्वसवर्णेना
प्येतत्सिद्धं॰ इदं तर्हि यस्सुवीयसर्भवसन्तु नसप्तऋषयः सप्तसाकं॰ ननु चैतदपि पूर्वसवर्णेनैव सिद्धं॰ न सिध्यति॰ यद्यत्र पूर्वसवर्णः स्यात्त्यदाद्यत्वं
प्रसज्येत॰ इदं चाप्युदाहरणं आर्द्रे चर्मन्लोहिते चर्मन्॰ ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धं न सिध्यति॰ यद्यत्र पूर्वसवर्णः स्याद्दानर्थे तोदकारः प्रसज्येत॰ अ
स्तु संयोगांतलोपेन सिद्धं॰ इयाडियाजीकाराणामुपसंख्यानं कर्तव्यं॰ दार्विया परिज्मन्॰ इया॰ डियाच्॰ सुक्षेत्रिया सुगातुया॰ ईकारः॰ दृतिं न शुष्कं सरसी शयानं॰ आङ्

निवता॰

त्सिन्भावः प्राप्नोति॰ आंतर्यतइति॰ निरनुनासिकस्य कारस्य सदृशो दकारः॰ संयोगांतस्य लोपेनेति॰ नङिसंबुद्ध्योरिति न लोपप्रतिषेधात्संयोगांतलोपः॥ अन्यथा न लोपे कर्तव्ये संयोगांतलोपोऽसि
द्धः स्यात् एवं च नलोपप्रतिषेधे ङिग्रहणं कर्तव्यमेवेति प्रक्रियालाघवाय चर्मन्नित्यत्र लुगेव विधेयइत्याहुः॥ दार्वियेति॰ दारुशब्दादियादेशः॥ सुक्षेत्रियेति॰ सुक्षेत्रेणेति प्राप्ते॰ सरसी
इति॰ सरः॰ शब्दस्य सरस्य ङिशब्दस्येकारः॥ प्रवाहवेति॰ प्रवाहकशब्दस्य रस्य टाप्रत्ययस्याजादेशः घिङितीति गुणः॥ ननु ङित्वे विधाद्धर्ण निर्देशमात्रं वर्णस्य तस्मात्तच्च विधात्तत्त्वादोइत्युक्त
तन्नश्च गुणेन प्राप्नोति॰ ङित्करणसामर्थ्याद्भविष्यतीत्यर्थः॥ अथवा ङितीति बहुव्रीहिराश्रीयते तत्र परिहारान्तरमाश्रयणीयं वर्णाश्रयं तेन ङित्वप्रयोगो निर्देशे यं पूर्वसवर्णे
एवास्यादिति॰ स्वप्नयेति॰ अयाचोकारोच्चारणं तु सुपिचेति दीर्घनिवृत्त्यर्थं॰ नावयेति॰ उपोत्तमं रिती तिमध्योदात्तं पदं भवति॥

=दारुलोपित्रानेरप्राधिमि॥=

अमोमश्च॰॥ ॥अमोमश्चन्नमकारस्येति॰ मकारस्यमकारः प्रयोजनाभावान्नभवि[illegible]ष्यतीतिथकारेनवक्तव्यइत्यर्थः॥ वचनादिति॰ वधींह्त्रमित्यादौमकारस्यानुस्वारनिवृत्त्यर्थोमकारः
स्यादित्यर्थः॥ छिमकारकइति॰ अमोम्भितिकरिष्यतेभिन्नजातीयवर्णद्वयोच्चारणेगौरवंभवति॰ समानजातीयवर्णद्वयेतुलाघवंतत्रैकस्यमकारस्यसंयोगांतलोपःकरिष्यते॰ ई
एनप्राप्नोतीति॰ इतिकर्त्तव्येसंयोगांतलोपस्यासिद्धत्वादप्रक्रामाभावात्॰ यकारादाविति॰ अमोमितिसूत्रंकर्त्तव्यंतत्रयकारस्यलुप्तनिर्दिष्टत्वादनेकाल्त्वात्सर्वादेशोयंभविष्यतीति

अमोमश्च॰॥ ॥किमर्थःशकारः॥ शित्सर्वस्येतिसर्वादेशोयथास्यात्॰ अक्रियमाणेहिशकारेअलोंत्यस्यविधयोभवंतीत्यंत्यस्यप्रसज्येत॰ अतउत्तरंपठति॰
अमोमश्चन्नमकारस्यमकारस्यमकारवचनेप्रयोजनंनास्तीतिकृत्वातच्चांतरेणापिशकारंसर्वादेशोभविष्यति॰ वचनादन्यबाधनं॰ अस्त्य
न्यन्मकारस्यमकारवचनेप्रयोजनंयेन्मकारादेशस्तद्बाधनार्थं॰ तद्यथाकोराजिसमःक्वाविति मकारस्यमकारवचनसामर्थ्यादनुस्वार
दयोबाध्यंते॰ एवंतर्हिछिमकारकोनिर्देशःकरिष्यते॰ छिमकारईउपक्के॰ यदिछिमकारकः अपक्काश्रयईएनप्राप्नोति॰ वधींह्त्रमरुतइद्वि
येण॰ यकारादौनदुष्यति॰ किंयकारोनश्रूयते॰ लुप्तनिर्दिष्टोयकारः॥ अमोमश्चनमकारस्यवचनादन्यबाधनं॰ छिमकारईउपक्केयकारा
दौनदुष्यति॥ ॥आज्जसेरसुक्॰॥ ॥इहयेपूर्वासोयेउपरासः॥ आज्जसेरसुगित्यसुकिकृतेजसियग्रहणेनग्रहणाच्छीभावःप्राप्नोति॰ एवंत
र्हिजसिपूर्वांतःकरिष्यते॰ यदिपूर्वांतःक्रियतेकारूपसिद्धिःब्राह्मणासःपितरःसोम्यासः॥ सवर्णदीर्घत्वेनसिद्धंनसिध्यति॰ अतोगुणइतिपर
रूपंप्राप्नोति॰ अकारोच्चारणसामर्थ्यान्नभविष्यति॰ यदितर्हिप्राप्तुवन्विधिरुच्चारणसामर्थ्याद्बाध्यतेसवर्णदीर्घत्वमपिनप्राप्नोति॰ नैषदो
षः॥ यंविधिंप्रत्युपदेशोनर्थकःसविधिर्बाध्यतेयस्यतुविधेर्निमित्तमेवनासौबाध्यतेपररूपंचअकारोच्चारणमनर्थकंसवर्णदीर्घस्यपुन
र्निमित्तमेव॰ अथवाअसुक्करिष्यतेएवमपियेपूर्वासोयेउपरासः॥ असुटिकृतेजसोग्रहणेनग्रहणाच्छीभावःप्राप्नोति॰ नैषदोषः॥ ॥७॥

प्रसारम्यातंशिवं॰॥ ॥आज्जसेरसुक्॰॥ ॥जसिग्रहणेमेति॰ नअकस्तद्ग्रहणेनग्रहणसुतइतिसागमकस्यशीभावप्रसंगः॥ पूर्वांतइति॰ अस्यजस्यसुगितिसूत्रन्यासेनपूर्वांतेअसुकाकारांत
सरेजस्त्वभवतीतिशीभावाप्रसंगः॥ अथवाअसुडिति॰ असुकाकारोच्चारणंदध्यस्यतीत्यादौघर्षमितिपररूपंस्यादितिपक्षांतरेणन्यासः॥ असुटिप्रथमयोःपूर्वसवर्णइतिदीर्घःसिध्यति॥

परत्वादिति॰ असुक अवकाशः ब्राह्मणा स इति॰ षीभावस्य भाषा विषयो वकाशः॥ ॥अश्वक्षीरवृषलवणानां॥ ॥अश्वस्यतीति॰ मैथुनेच्छा प्रतिपादनपरत्वाद्योगस्याश्ववृषो
पादानमतंत्रमिति मनुष्यादावपि कवयः प्रयुंजते॰ लालसा अतिशयेनाभ्यवहारजिहीर्षा॰ यस्तु लवणमेभ्यर्थमिच्छति तत्र लवणीयतीत्येव भवति॥ ॥आमि सर्वनाम्नः
सुट्॥ ॥कस्येदमिति॰ किमिदं सर्वेषामामांग्रहणमथ कस्य चिदेवेति प्रश्नः॥ ननु च सर्वनाम्न इत्युपादानाद्यासां नोलिंगानामश्रयग्रहणं केवलमुक्ता॰ उच्यते॰ इहतयोर

निर्दिश्यमानस्यादेशा भवंतीत्येवमत्र न भविष्यति॰ यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति॰ असुटा व्यवहितत्वात्॰ सिध्यति॰ सत्रं तर्हि भिद्यते॰ यथान्यास
मेवास्तु॰ ननु चोक्तं यः पूर्वः सोयउपरासः॥ असुकि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोति॰ नैष दोषः॥ इदमिह संप्रधार्यं शीभावः क्रियतामसुगि
ति किमत्र कर्तव्यं॰ परत्वादसुक्॰ अथेदानीमसुकि कृते पुनः प्रसंगविज्ञानाच्छीभावः कस्मान्न भवति॰ सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधित
मेवेति॥ ॥अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि॥ ॥अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यं॰ अश्वस्यति वडवा॰ वृषस्यति गौः॥ मैथुनेच्छायामिति
किमर्थं॰ अश्वीयति॰ वृषीयति॰ क्षीरलवणयोर्लालसायामिति वक्तव्यं॰ क्षीरस्यति माणवकः॥ लवणस्यत्युष्ट्र इति॰ अपर आह॰ सर्वप्रातिपदिके
भ्यो लालसायामिति वक्तव्यं॰ दध्यस्यति मध्वस्यतीत्येवमर्थं॰ अपर आह॰ सुग्वक्तव्यः॥ दधिस्यति मधुस्यतीत्येवमर्थं॥ ॥आमि सर्वनाम्नः सुट्॥ ॥त्रे
स्त्रयः॥ ॥ह्रस्वनद्यापो नुट्॥ ॥इमे वहव आम्शब्दाः पठ्यंते॰ कास्य सयादाममंत्रे लिटि ङ्सोसाम् ङेराम्नद्याम्नीभ्य इति॰ कस्येदं ग्रहणं षष्ठी बहु
वचनस्य ग्रहणं॰ अथास्य कस्मान्न भवति कास्यसयादाममंत्रे लिटीति॰ अननुबंधकग्रहणे हि न सानुबंधकस्येति॰ सतर्हि स्येवमर्थोनुबंधः कर्तव्य
संभवे पि ह्रस्वनद्यापो नुडिस्यत्र ह्रस्वात्परयोः संभवादिविचारः क्रियते॰ तत्रेह सामान्यग्रहणे सति यथा संभवं प्रकरणे कार्यप्रतिपत्तिः॥ अथवा पूर्वोपात्तसदृशशब्द [illegible] नरानुमानप
क्षे उत्तरसूत्रे तयोः संभवादिह विचारः॥ नत्र त्तरसूत्रे पि मस्यैवाम्नद्याम्नीभ्यां परस्य संभवः॥ स एव ह्रस्वात्परः स्यात्सा ह्वचर्यात् गृह्यते॰ नेतरदिति॰ आतिष्याश्रयेण सर्वस्य ग्रहणप्र
संगात्॰ प्रत्ययान्तादिति॰ नेचाजंताः॥ ननु हलंतेभ्य आचार क्विवंतेभ्य आमस्त्येव॰ नैतदस्ति॰ एकीयमतमेतत्॰ तंत्रापि हलंतेभ्यो न विधानादाचारक्विबभावः॥ ॥७॥

= त्रेरीति अस्मिन्पक्षे त्रस्त्रेफलाभावेपि [illegible] सामान्यरूपेण प्राथमिकेवोपस्थितिः॥ द्वितीयपक्षे तु फलाभावात्सामान्यरूपेणानुपस्थिताव पि उत्तरसूत्रानुरोधेन विशेषोपस्थिवाधपूर्वकं पार्ष्ठिकी सामान्योपस्थितिरिति विशेषः॥ अ एकीयमतमेतदिति सर्वप्रातिप

यस्त्वहीति· ई हे श्वन अे आमि कृते यणादेशप्रसंगः॥ आस्कासो रिति· अंसादचःपरे आमि सवर्णदीर्घत्वे सति विशेषाभावः॥ सति न भवितव्यमिति· रूपं न स्याद्धातुत्वाभावात्· आम
इति· अकृत एकादेश इदमुच्यते कृते त्वेकादेशे रूपं तस्याभावः॥ अपापीति· प्रतिधातुभेदाद्दामे यन्नेकार्यं न संभवतीति तन्नाभूत्· इत्संज्ञा आसिकासिचकासिषु प्रत्ययो नेषु
चई स्यादेतिकार्यसंभवात्स्यादेवेत्संज्ञा· अथवा आसादिषु विधानसामर्थ्यात्सवर्णदीर्घत्वं न स्यात् इत्संज्ञा तु स्यादेव· व्यंजनान्तेषु चाचार क्विबंते षि कार्यसंभवादित्संज्ञा मा

ननु चावश्यं मकारस्येत्संज्ञापरित्राणार्थोनुबंधः कर्त्तव्यः॥ नार्थ इत्संज्ञापरित्राणार्थेन· इकार्याभावादचेत्संज्ञा न भविष्यति· इदमस्ती कार्यं मिश्चोंसासर
इति अचामंत्सासरो यथा स्यात्· प्रत्ययांतादयं विधीयते तत्र नास्ति विशेषः· मिश्चोंसासर इति वा प्रत्ययः पर इति वा· यस्त्वर्हि न प्रत्ययांतात् इजादेश्च
गुरुमतोनृच्छ इति· अचाप्यास्कासो राम्वचनं ज्ञापकं नायमंत्सासरो भवतीति· कथं कृत्वा ज्ञापकं· न ह्यस्ति विशेष आम्यचामंत्सासरे सति असति वा· अय
मस्ति विशेषः॥ सत्यामि द्विर्वचनेन भवितव्यं सति न भवितव्यं· कथं· आमस्त्वन्म व्यपतितत्वात् धातुग्रहणेन ग्रहणात्· तदेतत्कासास्सो राम्वचनं ज्ञा
पकमेव नायमचामंत्सासरो भवतीति· अथापि कथंचिदिकार्यं स्यादेवमपि न दोषः॥ क्रियते न्यास एव आममंत्रे इति· यथैवमामामंत्रे इति प्राप्तो
ति· शकंधुन्यायेन निर्देशः॥ अथवास्तु स्वस्य ग्रहणं को दोषः॥ इकार्यां चकार हरयांचकार चिकीर्षांचकार जिहीर्षांचकार·ः ह्रस्वनद्यापोनु
डिति नुट् प्रसज्येत· लोपायादेशयोः कृतयोर्न भविष्यति· इहापि संप्रधार्य लोपायादेशौ क्रियेतां नुडिति किमत्र कर्त्तव्यं· परत्वान्नुट्· नित्यौ लोपाया
देशौ· कृतेपि नुटि प्राप्नुतोऽकृतेपि· तत्र नित्यत्वाल्लोपायादेशयोः कृतयोर्विहतनिमित्तत्वान्नुण्न भविष्यति· अथास्य कस्मान्न भवति· किमे
निङ्· व्ययधाराम्व इव्यमकर्ष इति· अननुबंधकग्रहणे हि न सानुबंधकस्येति· सत्येवमर्थोनुबंधः कर्त्तव्यः· ननु चावश्यमुगित्कार्यार्थोनुबंधः कर्त्तव्यः

ससपि भवितव्यं ८

मोति· न हि व्यंजनांतेभ्य आचार क्विब्भवतीत्यत्र किंचिल्लभ्यमानमिति· कामयांचकारेति· नुटि कृते यादेशप्रसंगः॥ अव्ययमेष इति· अव्ययत्वात्स्त्रीत्वेन योगाभावादुगितश्चेति
ङीप्नास्ति· तदभावादुगितश्चेति घास्विषु ह्रस्वविकल्पो नास्ति· किमर्थं तर्हि किमत्सम लक्षप्रतिषेधान्नुमागम उगित्कार्यं नास्ति॥ ॥७॥ ॥७॥

=अथामंतेसनेन·२=

=समुदायविशेषणमिति॰ इत्संज्ञापरित्राणात्समुदायस्य विशेषणं न तु इत्संज्ञाया एकदेशभूतायाः सप्तम्याः॥ नन्वेवमपि परित्राणस्य मकारसापेक्षत्वात्कथं समासो भवत्। प्रधानमिति॰ इत्यं च मकारस्यापरित्राणार्थेनान्वय विवक्षायां समासो नान्वयविवक्षायां तु क्रियाकारकयोः सापेक्षत्वाच्छब्दैः॥

इत्संज्ञापरित्राणार्थ इति॰ इत्संज्ञायाः परित्राणमिति साधनं कृतेति पंचमीसमासः॥ समुदायविशेषणं च मकार इति सापेक्षत्वात्समासाभावो न चोदनीयः॥ परित्राणं च प्रधानं मकारमपेक्षते॰ भवति च प्रधानस्य सापेक्षस्यापि समासः॥ अथापीति॰ मित्वमेव ज्ञापकं स्यात्॰ अन्यतोप्यभ्युदयं भवतीति॰ ततश्च स्यादेवेत्संज्ञा॰ एवं तर्हीति॰ उभयोरनित्ययोः परत्वान्नुट् प्राप्तो ह्रस्वनद्यापो नुडित्यत्र यस्य लोपस्तद्धित इति चानुवर्त्तते तेन तद्धित आनि रुत्वस्य लोपो भवति पचतितरामिति॰ अन्यस्य ताम्नो नुड् भवति

मकारस्य तर्हीत्संज्ञापरित्राणार्थोनुबंधः कर्त्तव्यः॥ इत्कार्याभावादेव तत्संज्ञा न भविष्यति॰ इदमस्ति कार्यं मिदचोन्त्यात्पर इति अचामन्त्यात्परो यथा स्यात्॰ नैतदस्ति॰ धातोरयं विधीयते तत्र नास्ति विशेषः मिदचोन्त्यात्पर इति परत्वे प्रत्ययं पर इति परत्वे वा॰ अथापि कथंचिदित्कार्यं स्यादेवमपि न दोषः क्रियते न्यास एव॰ अथवास्त्वस्य ग्रहणे को दोषः॥ इह पचतितरां पततितरां ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत॰ लोपे कृते न भविष्यति॰ इदमिह संप्रधार्यं लोपः क्रियतां नुडिति॰ किमत्र कर्त्तव्यं॰ परत्वान्नुट्॰ एवं तर्हि ह्रस्वनद्यापो नुडित्यत्र यस्येति लोपो नुवर्त्तिष्यते॰ अथास्य कस्मान्न भवति॰ राज्ञः घ्राम्नीभ्य इति॰ किं च स्यात्॰ कुमार्याः किशोर्याः खट्वायां मालायां तस्यां मस्यामिति ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत॰ आड्याड्स्याट्स्त्वबाधका भविष्यंति॰ इदमिह संप्रधार्यं॰ आड्याड्स्याटः क्रियंतां नुडिति॰ किमत्र कर्त्तव्यं॰ परत्वादाड्याड्स्याटः॥ अथेदानीं माड्याड्स्याट्सु कृतेषु पुनः प्रसंगविज्ञानान्नुट् कस्मान्न भवति॰ सकृद्गतौ विप्रतिषेधे सति यद्बाधितं तद्बाधितमेवेति॰॥ ॥श्रीग्रामणी श्छंदसि॰॥ ॥अयं योगः शक्योऽवक्तुं॰ कथं श्रीणामुदारो धरुणो रयीणां॰ अपि न अस्तु तयामणीनां॰ इह तावच्छ्रीणामुदारो धरुणो रयीणां विभाषामिनदी संज्ञा साछंदसि व्यवस्थित विभाषा भविष्यति॰ अपि न अस्तु तयामणीनामिति॰ सूताश्च ग्रामण्यश्च सूतग्रामण्यस्तत्र ह्रस्वनद्यापो नुडि सेव सिद्धाणामिति॰॥श्रीग्राम॰॥ ॥विभाषेति॰ वामी सेनेन॰ तत्र ह्रस्वानुविधिश्छंदसीति श्रीणामित्येव छंदसि न भविष्यति न तु श्रियामिति॰ सूताश्च ग्रामण्यश्च सूतग्रामणीति समाहारद्वंद्वः कृते वेकशेषः क्रियत इति बोध्यं न तेकशेषे कृते समाहारद्वंद्वः क्रियते॰ एवं हि बहुवचनं न स्यात्॰ भाष्ये खलो नयं कार्यमिति तावत्सदर्शितं क्रमस्तु स्वयमभ्यूह्य इष्टस्यार्थस्य सिद्धये॰॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे समाध्याये प्रथमे पादे प्रथममाह्निकम्॥ ॥श्रीः॥ ॥७॥ ॥७॥

श्रीजगदीश्वरी॥ इदितो नुम् धातोः। धातोरिति किमर्थम् [illegible] मिनि। किम् धातु [illegible] निवृत्त्यर्थं धातुग्रहणं। अथ धातु संज्ञाप्रवृत्त्यवस्थायामेव प्राक् प्रत्ययोत्पत्तेर्नुम्विधाना
र्थमिति प्रश्नः। आचार्यदेशीयस्तु धातुनिवृत्त्यर्थं धातुग्रहणमित्याह। अभैत्सीदिति। सिचः इदितो नुम् न भवति। उपदेशिवद्भाववर्तिनि। यथा रत्यादौ नोपदेशी नकारः प्रत्यय
विधिकाले सन्निहितस्तथा नुमपीत्यर्थः। किं प्रयोजनमिति। नंदितानंदकः इत्यादिप्रत्यये परतो नुमि क्रियमाणेऽपि सिध्यतीति मत्वा प्रश्नः। प्रत्ययविध्यर्थमिति। इष्टप्रत्यय
विध्यर्थमित्यर्थः। अनकार इति। असति नकारे यः प्रत्ययः प्राप्नोति स स्यादित्यर्थः। सांप्रतिकेषु शिद्धादिषु गुरुमत्सु संभव तु नाविगुरुमत्त्वाश्रयेण प्रत्ययविधान

श्रीजगदीश्वरी॥ इदितो नुम् धातोः। धातोरिति किमर्थं। अभैत्सीत्। अच्छैत्सीत्। नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम्। नुम्विधावुपदेशिवद्भावो
वक्तव्यः। उपदेशावस्थायां नुम् भवतीति वक्तव्यं। किं प्रयोजनं प्रत्ययविध्यर्थम्। उपदेशावस्थायां नुमि कृते इष्टः प्रत्ययविधिर्यथा स्यात्। कुंडा। कुंडेति
इतरथा ह्यनकारे प्रत्ययः। अक्रियमाणे ह्युपदेशिवद्भावे अनकारे यः प्रत्ययः प्राप्नोति स तावत्स्यात्। तस्मिन्नवस्थिते नुम्। तत्र को दोषः।
तत्रायथेष्टप्रसंगः। तत्रायथेष्टं प्रसज्येत। अनिष्टप्रत्यये अवस्थिते नुम्। अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत। धातुग्रहणसामर्थ्याद्धात
[illegible]दुपदेशे धातूपदेशे नुम् भविष्य[illegible]ति। ननु चान्यद्धातुग्रहणस्य प्रयोजनमुक्तं। अभैत्सीत्। अच्छैत्सीत्। नैनदस्ति प्रयोजनम्॥ ॥ ॥

स्यायुक्तत्वात्। तत्र को दोषः इति। नुमि कृते अपवादः प्रवर्तमान उत्सर्गं निवर्तयिष्यतीति भावः। तत्रायथेष्टप्रसंग इति। उत्पन्ने उत्सर्गे नुमि कृते सत्यामपि गुरुसंज्ञाया
मुत्सर्गेणैव प्रत्ययार्थस्य प्रत्ययोत्पत्तिनिमित्तस्याभिधानान्निमित्तवैकल्यादपवादाप्रवृत्तावुत्सर्गस्यैव श्रवणप्रसंगः। धातुग्रहणे ति। अथ धातोरिदितो [illegible] संभ
वाद्धातुनिवृत्त्यर्थं धातुग्रहणं न भवतीति धातुसंज्ञाप्रवृत्त्यवस्थोपलक्षणार्थं विज्ञायते तेन सनाद्यन्तगाधिकारे नाव्यंगत्वाश्रयः शर्वमेव नुम् भव
ति ततः प्रत्ययइत्यर्थः पद्यते॥

प्रयोजनं नामेति· नियमेनावश्यंभावेन यदन्यथाऽसाध्यपितुमशक्यं तत्प्रयोजनं· सिचश्चनुमागमो धातुग्रहणमंतरेणापि शक्योनिराकर्त्तुमित्यर्थः॥ यत्रेति· सकारस्योच्चारणार्थइकारः क्रियते इत्सकारेणापि सञ्जिते वं सकारः शक्यउच्चारयितुं तदेतदुक्तं भवति· निरनुनासिकउच्चारणार्थः सिचइकार इतीदित्वाभावान्नुमभावः॥ अमंस्तेत्यादौ हन्तः सिजि तिनलोपाथा क्कित्वविधानात् ज्ञापकादसत्यपीदित्वेन लोपाप्रसंगः॥ नन्वन्यक्कित्वविधानस्य प्रयोजनमस्ति सिजाश्रयोनलोपो यथास्यात्सार्वधातुकाश्रयोमाभूत् सिजाश्रयो हि नलोपो नोलोपे॰ सिद्धः नसार्वधातुकाश्रयः समानाश्रयं ह्यसिद्धं न तु व्याश्रयं· नैतदस्ति· असिद्धं बहिरंगमंतरंग इति सार्वधातुकाश्रयस्य नलोपस्य बहिरंगस्यांतरंगे नलोपे कर्त्तव्ये॰ सिद्धत्वादनोलोपाप्रसंगादुपदेशग्रहणानुवृत्त्या इधातुकोपदेशेयदकारांतं तस्य लोपविधानाद्वा·को सेर्दीकारउच्चारणार्थ इति नुमोप्रसंगः॥ मंताआहंताइत्यादावसिद्धवदत्राभादिति लोपस्यासिद्धत्वादनिदित्वेपि नलोपाप्रसंगः॥ ॥शेमुचादीनां॥ ॥शेतृंपादीनामिति· आदिशब्दः प्रकारे तेन नोपधागृह्यंते· तेषां नलोपे कृते नुमागमस्तस्य विधानसामर्थ्यादसिद्धवदत्राभादिति वा नलोपस्या

प्रयोजनं नाम तदुक्तं यं स्याद्यन्नियोगतः स्यात्· यत्त्वात्रैकारेण क्रियते न कारेणापि तच्छक्यं कर्त्तुं॥ ॥शेमुचादीनां॥ ॥शेतृंपादीनां· शेतृंपादीनामुपसंख्यानं कर्त्तव्यं· तृंपति· दृंपति· किमर्थमिदं· ननु मनुषक्ता एवैते पठ्यंते· लुप्तनकारत्वात्· लुप्यते च नकारः अनिदितां हलउपधायाः क्ङितीति· यदि पुनरिमे इदितः पठ्येरन्· नैवं शक्यं· इह हि लोपो न स्यात्· तृपितो दृपित इति· यदि पुनरिमे मुचादिष्वेव पठ्येरन्· न दोषः स्यात्· अथवा नैवं विज्ञायते इदितो नुम्धातोरिति कथं तर्हि इदितो नुम्· ततः धातोरिति·॥

सिद्धत्वादुपधात्वाभावान्नलोपाभावः॥ किमर्थमिति· यएवोपदेशे नकारः पठ्यते तस्यैवश्रवणं भविष्यतीति प्रश्नः॥ नुमनुषक्ता इति· नुमग्रहणं नकारोपलक्षणार्थं· यदीति· इदित्वे नुमः सिद्धिं नं च लोपः प्रसज्यते· यदि पुनरिति· नोपधानां मुचादिषु पाठान्नुमः सिद्धिरित्यर्थः॥ अथवेति· मुचादिषु तावन्न पठिताः गौरवप्रसंगश्च नोपधानां मुचादिषु पाठेऽर्थनिर्देशः कर्त्तव्यः॥ अनोपधानां अन्यत्र पाठे र्थनिर्देष्टव्य इति मत्वा परिहारांतरोपन्यासः॥ इदितो नुमिति· नन्वेवं धातूपदेशावस्थायां नुम्न लभ्यते· नैष दोषः॥ धिन्विकृण्व्योरच्चेति ज्ञापकाद्धातूपदेशावस्थायां नुम्भविष्यति अत्र घागंतुरिकारउच्चारणार्थ इत्संगत्वाभावेपि नुमनुषक्तपाठस्येदमेव प्रयोजनं धातूपदेशावस्थायामेव नुम्यथा स्यादिति· यदि धातोरिति योगविभागः क्रियते तदा सर्वस्य सर्वत्र नुम्प्रसंगः॥ शेमुचादीनामितिशग्रहणस्य धातोरित्यत्र सिंहावलोकितन्यायेनापेक्षणं योगविभागस्येसिध्यर्थता दा· अन्ये तु भाष्ये योगविभागादि कमदर्शिनेसांकुः॥ तेन शेमुचादीनामित्यत्र शइति योगविभागः क्रियते तत्र च धातोरिति वर्त्तते तेन मुचादीनामिति पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थं तेनेष्टविषये नुमः सिद्धिः॥ ॥७॥ ॥७॥

नेघलिटिरधेः॥ ॥लिघेवेति॰ इघेवलि टीसेवं नियमस्तु न भवति शास्त्रस्य प्रसिध्यतात्तक्कसौरे घिकानितिभवति द्विर्वचने सत्येवाभ्यासलोपयोः कृतयोरिटिनुमागमस्तस्योपदेशिकक्रि
लाश्रयो लोपः येनुक्तं सुच्छांदसं मन्यंते तेषां विचार एवायं नास्तिछंदसि दृष्टानुविधानात्॥ ॥आङोयि॥ ॥यत्सव स्थितइति॰ यकारादेः प्रत्ययस्य निमित्तत्वेनोपादानात्सर्वमेव
तेनोपात्तमिति भावः॥ एषस्वरइति॰ कृदुत्तरपदप्रकृतिस्वरेण एतेनावग्रहसाधुदान्तप्रसंगः॥ अंत [illegible] स्वरितसंवेष्यतइत्यर्थः॥ धातुग्रहणसामर्थ्यादिति॰ यीति विषय
सप्तमी॰ तेन [illegible] धात्वपदेशावस्थायामेव यकारादौ प्रत्यये विषयभूते नुमागमस्ततोऽनुपधत्वस्य विधानाद्यत्प्रत्यये सतीष्टस्वरसिद्धिः॥ ॥नसुदुर्भ्यां॥ ॥उपसर्गात्ख
ल्घञोरिति प्राप्तो नुम्प्रतिषिध्यते॰ केवलग्रहणमिति॰ इह केवलग्रहणेन समानजातीय उपसर्ग एव निवर्त्तयितव्य इष्यते स च सुदुर्भ्यां पूर्वो नास्त्यनभिधानात्प्रत्ययाभावात्तु

नेघलिटिरधेः॥ ॥इमौ दोषप्रतिषेधावुच्येते उभौ शक्यावक्तुं॰ कथं॰ एवं वक्ष्यामि॰ इटि लिटि रधेर्नुम्भवतीति तन्नियमार्थं भविष्यति॰ लिघेवेट् एवनान्य
स्मिन्लिङ् इदावितिः॥ ॥आङोयि॥ ॥इह कस्मान्न भवति आलभ्यते॰ अस्तु॰ अनिदितां हलउपधायाः क्ङितीति लोपो भविष्यति॰ इह तर्हि आलंभ्यागौः पोरदुप
धादिति यत्स्वव स्थितेनुम्॰ तत्र को दोषः॥ आलंभ्याइत्येष स्वरः प्रसज्येत॰ आलंभ्याइति चेष्यते॰ नैष दोषः॥ धातुग्रहणसामर्थ्यादुपदेशेनुम्विधानमिति॥ ॥न
सुदुर्भ्यां केवलाभ्यां॥ ॥केवलग्रहणं किमर्थं॰ ननसुदुर्भ्यामित्येवोच्येत॰ सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थं॰ सुदुरोः केवलग्रहणं क्रियते अन्यो
पसृष्टाभ्यामदिति॰ प्रसुलंभं॰ नैषोस्ति प्रयोगः॥ इदं तर्हि सुप्रलंभं॰ प्रेण व्यवहितत्वान्न भविष्यति॰ इदं तर्हि अतिसुलंभं॰ कर्मप्रवचनीयसंज्ञा न बाधिका भविष्यति सुः

दुर्भ्यां परे तु तस्मिन्पंचमीनिर्देशादेव व्यवधाने प्रतिषेधो न भविष्यतीति प्रश्नः॥ नैषोस्ति प्रयोग इति॰ प्रयुक्तानामिदमन्वाख्यानं न तु तेनानपूर्वः शब्दोपजनः क्रियते अपि च प्रारंभादिवि
शिष्टायाः क्रियायाः सुकरत्वं दुष्करत्वं च प्रतिपाद्यमिति पूर्वं प्रेणधातोः संबंधः पश्चान्न हि शिष्टस्य सुदुर्भ्यां॰ अतिसुलंभमिति॰ सोकर्मादिविशिष्टभावार्थस्यातिर्विशेषणमिति पूर्वं सुदु
र्भ्यां संबंधः पश्चादतिना॰ इतरस्तु पूजायामतिक्रमणस्य वा द्योतको तिशब्द इति मत्वाह॰ कर्मप्रवचनीयसंज्ञेति॰ ततश्चोपसर्गत्वाभावादतेः केवलावेवात्र सुदुरावितिनुम्प्रतिषेधेनभाव्यं
न हि विजातीयः केवलत्वं विहंति॰ यथा देवदत्तयज्ञदत्ताभ्यां केवलाभ्यां प्रवेष्टव्यमित्युक्ते पुरुषांतरस्य प्रतिषिध्यते प्रवेशः न तु पश्वादेरेवं सुदुरोः परस्परसाहित्ये विजातीयसहिता
वेकाकिनौ च केवलावेव भवतः सुदुर्लभमिति सुलभं दुर्लभमिति कृच्छ्राकृच्छ्रार्थौ च सुदुरौ क्रियाविशेषकत्वादुपसर्गावेव खल्निमित्ततां प्रतिपद्येते॥ ॥७॥ ॥

सुलभं

= सुलभमिति नुम्प्रसंगः सो कर्मप्रवचनीयत्वेनोपसर्गत्वाभावादत आह = एतेनाभिवेला पुरुसा स्पिर तं प्रपनपति॰ ५ =
अन्याय्यमेवनस्यादिति भावः॥१ =

यद्यातर्हीति॰ पूजातिक्रमणयोरर्थे ऽतेः कर्मप्रवचनीयसंज्ञाविधानादन्यत्रोपसर्गता तत्सहितयोः सुदुरोः केवलयोरभावान्नुम्भवत्येव॰ कातर्हीति॰ पंचमीपक्षेपि केवलग्रहणमतिसुलभं न भि
लेवमर्थं कर्त्तव्यमिति क्रमानुल्लंघनापत्तौ यैवाश्रयितव्येति भावः॥ वाक्यकारेण पठितं सुदुरोः प्रतिषेधो नुम्विधितलोपत्वे षिति॰ अनत्यन्तं नातिसुलभमिति सोपप
सर्गत्वाभावान्नुम्प्राप्नोति॰ भाष्यकारेण चात्र नुमागमो सुगतत्स्मा वाक्यकारस्यापि केवलयोः सुदुरोश्च विषय एव नुम्विधावुपसर्गसंज्ञानिषेधो ऽभिमतः॰ घत्वेपि पूजाया
मेव तथा च सुषिक्तं किं तवात्रेति घत्वं च क्षेपे न वलवद् विभाषा चिण्णमुलोः॥ ॥लभेश्चेति नित्ये नुमि प्राप्ते विभाषारभ्यते॰ चिण्णमुलोरिति॰ सोपसर्गस्य तु नित्यमेव नुम्भवति॰ उपसर्गा

नाम॰

यद्यातर्हि नातिक्रमणं न पूजा॰ इदं चाप्युदाहरणं॰ सुप्रलंभं॰ ननु चोक्तं प्रेण व्यवहितत्वान्न भविष्यतीति॰ नैष दोषः॥ सुदुर्भ्यामिति नैषा पंचमी का तर्हि तृतीया
सुदुर्भ्यामुपसृष्टस्येति॰ व्यवहितश्चाप्युपसृष्टो भवति॥ ॥विभाषा चिण्णमुलोः॥ ॥चिण्णमुलोरनुपसृष्टस्य॰ चिण्णमुलोरनुपसृष्टस्येति वक्तव्यं॰ इह
मा भूत्॰ प्रालंभि॰ प्रलंभं॰ तत्तर्हि वक्तव्यं॰ न वक्तव्यं॰ इहोपसर्गादित्यपि प्रकृतं ते सपि॰ तत्राभिसंबंधमात्रं कर्त्तव्यं॰ विभाषा चिण्णमुलोरुपसर्गान्ने
ति॥ ॥उगिदचां सर्वनामस्थाने ऽधातोः॥ ॥अधातोरिति किमर्थं॰ उखास्रत्पर्णध्वत्॰ अधातोरिति शक्यमकर्त्तुं॰ कस्मान्न भवत्युखास्रत्
पर्णध्वत्॰ उगित्त्वं च तिग्रहणात्सिद्धमधातोः॥ उगित्त्वं च तिग्रहणादधातोः सिद्धं॰ अंचतिग्रहणं नियमार्थं भविष्यति॰ अंचतेरेवोगितो धातो
र्नान्यस्मादुगितो धातोरिति॰ इदं तर्हि प्रयोजनं॰ अधातुभूतपूर्वादपि यथा स्यात्॰ गोमंतमिच्छति गोमत्यति गोमत्यतेः क्विप्प्रत्ययः गोमान्॥ ॥नपुंसक
स्य झलचः॥ ॥झलचोर्नुम्विधावुगित्प्रतिषेधः॥ झलचोर्नुम्विधावुगित्प्रतिषेधो वक्तव्यः॥ गोमंति ब्राह्मणकुलानि श्रेयांसि भूयांसि॰ ननु च झलक्षण

लक्षणस्य

ऽनेति॰ वाक्यभेदेन विकल्पस्य प्रतिषिध्यत इति नित्यमेव नुम्भवति॥ उगिदचां॥ ॥अधातोरिति किमर्थमिति॰ अंचतिग्रहणान्नियमार्थादधातोर्निवृत्तिः सिद्धेति भावः॥ गोमानिति॰ क्विबंतो धातु
त्वं न जहातीति धातुरयमिति संच तिग्रहणान्नियमार्थान्नस्यात्॰ अधातुग्रहणान्नुम्भवति॰ तस्य हेतुप्रयोजनमवस्थान्तरेपि यस्याधातुत्वं दृष्टं तस्य संप्रति धातुत्वेपि नुम्यथा स्यादिति
अथाच कथं दीर्घसंयावनामसंतस्य चाधातोरित्यधातोस्तद्धि धीयते॰ उच्यते॰ अधातोरिति तत्र योगविभागः क्रियते तत्र चासंतस्य सत्वं तु दृस्यातं ॰ तस्य पर्युदासाभावः॥
॥नपुंसकस्य॥ ॥गोमंतीति॰ परत्वाज्झलक्षणे नुमि कृते पुनः प्रसंगविज्ञानादुगिल्लक्षणः प्राप्नोतीति प्रतिषेधो वक्तव्यः॥ ननु चेति॰ वाक्योपदार्थसहकृतो विप्रतिषेधेय बाधि

=व्यंजनानामकालत्वमिति शिक्षाकृतांमतेनेदमुक्तमितिभावः ५=

=यद्यपिप्रयोगकालेनसंभवति विधानकालेतुसंभवतीतिभावः इदमुत्तरत्रस्फुटीभविष्यते २=

भा॰कै॰

१९

कथमन्यस्येति॰ उभयोर्तुमोः प्रसंगे परस्परप्रतिबंधादप्रतिपत्तौ प्राप्तायां विप्रतिषेधे परं कार्यमिति वचनेन परेणानुस्वारेण विधीयमान उत्तरकालप्राप्तं निमित्तवंतं पूर्वं णुमं नैव शक्नोति बाधितुं॰ तथा चोच्यते पुनः प्रसंगविज्ञानात्सिद्धमिति॰ अन्यस्येति॰ अनुमः॰ अन्यस्येति॰ सनुम इत्यर्थः॥ स्यादेतत्॰ अन्यस्याप्युच्यमानं कार्यमन्यस्य बाधकं भवति यथोक्तमग्नेर्ढीलादेरुणस्य च विप्रतिषेधेनेत्यत आह॰ असति खल्वपीति॰ क्रमेण च नुमो विधानादसंभवादेचःपरत्वं संभवति यथा पचतीति धातुपक्षे लट् इत्यपाः॥ प्रतिज्ञाभेद इति॰ एकस्यैव प्रतिज्ञाया एकोननकार इति अपरस्य द्वौ नकाराविति॰ श्रुतिभेदे सतीति॰ कथं पुनः श्रुतिभेदाभावो यावता नैकहलुच्चारणेनाधिकः कालो व्याप्यते एकहलुच्चारणे त्वल्पः॥ उच्यते॰ अचकालव्यतिरेकेण व्यंजनानि कालांतरं नाक्षिपंतीति दर्शनाश्रयेणैतदुक्तं॰ यत्तु शास्त्रे व्यंजनानां कालः प्रदिशाप्यते तद्गुरुलाघवनिरूपणाय यानेकोच्चारणे हि प्रयत्नस्य गौरवं भवति

प्र२

कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्॰ असति खल्वपि संभवे बाधकं भवति॰ अस्ति च संभवो यदुभयं स्यात्॰ किं च स्यात्॰ यद्यत्रोगित्लक्षणोऽपि स्याद् द्वयोर्नकारयोः श्रवणं प्रसज्येत॰ न व्यंजनपरस्यैकस्यानेकस्य वा श्रवणं प्रति विशेषोऽस्ति॰ ननु च प्रतिज्ञाभेदो भवति॰ श्रुतिभेदे सति किं प्रतिज्ञाभेदः करिष्यति॰ श्रुतिकृतोऽपि भेदोऽस्ति॰ इहतावच्छ्रेयांसि भूयांसि परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्रसज्येत तथा कुर्वंति कर्षतीति परस्यानुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोति॰ अत्रैकस्मिन्नुमि णत्वं कस्मान्न भवति॰ अनुस्वारीभूतो णत्वमतिक्रामति॰ कृते तर्हि परसवर्णे कस्मान्न भवति॰ असिद्धः परसवर्णः॥ ॥७॥ ॥●॥

कार

=सर्पुंषां विशनी नजानाति॰ पदस्मानुवक्ष्यते॰१=

लोकिके तु प्रयोगे गुरुलाघवानादरादत्रश्रुत्यभेद उच्यते॰ अन्ये तु व्यंजनानां कालभेदमिच्छंत्येव॰ परस्यानुस्वार इति॰ अयोगवाहानामक्षरसमाम्नाये उपदेशाकृतत्वाभावात्सर्वस्य नकारस्यानुस्वारो नास्ति॰ ननु च वर्णग्रहणे जातिग्रहणं द्वयोर्नकारयोरेकोऽनुस्वार आदेशो विधास्यते॰ नैतदस्ति॰ स्थानिभेदादनुस्वारादेशद्वयप्रसंगात्तत इति वा गुणत्वादेकसंख्याया अविवक्षितत्वादेकस्यैव नकारस्यानुस्वारः स्यान्न तु द्वयोः॥ णत्वमतिक्रामतीति॰ न प्राप्नोतीत्यर्थः॥ अनुस्वारे कर्तव्ये पूर्वत्रासिद्धमिति णत्वस्यासिद्धत्वादनुस्वारो नकारस्य भवति न तु णत्वं णत्वे कर्तव्ये सिद्ध एवानुस्वार इति णत्वाभावः॥ असिद्धश्च परसवर्ण इति॰ असिद्धप्रकरणे परसवर्णस्य विधानात्तस्मिन्कर्तव्ये तस्यासिद्धत्वात्तत्वाभावः॥

शिवः

१९

विप्रतिषेधादिति। व्यक्तिपदार्थाश्रयसहितात् तद्यथा दधीति। यद्यपि दृष्टान्ते सामान्यविशेषभावो बाधहेतुः दार्ष्टान्तिके तु विप्रतिषेधे परमेवेति तथापि विनापि विरोधेन दृष्टं बाधकत्वमिति प्रदर्शनाय दृष्टान्तोपन्यासः। परस्येति। अयोगवाहानाम [illegible] विशेषेणोपदेशाश्रयणादनुस्वारस्य झल्त्वात् सर्वस्याप्यनुस्वारो भवति। द्वयोरनु

विप्रतिषेधात्सिद्धं। विप्रतिषेधात्सिद्धमेतत्। झल्लक्षणः क्रियतामुगिल्लक्षण इति। झल्लक्षणो भविष्यति विप्रतिषेधेन। झल्लक्षण स्यावकाशः। सर्पींषि धनूंषि। उगिल्लक्षणस्यावकाशः। गोमान् यवमान्। इहोभयं प्राप्नोति। गोमंति ब्राह्मणकुलानि यवमंति ब्राह्मणकुलानि। श्रेयांसि भूयांसि। झल्लक्षणो भविष्यति विप्रतिषेधेन। ननु च पुनः प्रसंगविज्ञानादुगिल्लक्षणः प्राप्नोति। पुनः प्रसंग इति चेद् दमादिभिस्तुल्यं। पुनः प्रसंग इति चेद् दमादिभिस्तुल्यं [illegible]मेतद्भवति। तद्यथा। युष्मदस्मदोरमादिषु पुनः प्रसंगा च्छिशीलुङ्क्षु भो न भवति। एवं झल्लक्षणे कृते पुनः प्रसंगादुगिल्लक्षणो न भविष्यति। यदप्युच्यते असति खल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यादिति। सत्यपि संभवे बाधनं भवति। तद्यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्त्तकं भवति। एवमिहापि सत्यपि संभवे झल्लक्षण उगिल्लक्षणं बाधिष्यते। अथवा स्त्वत्रोगिल्लक्षणे पि। ननु चोक्तं द्वयोर्नकारयोः श्रवणं प्रसज्येतेति। परिहृतमेतत् न व्यंजनपरस्यैकस्यानेकस्य वोच्चारणं प्रति विशेषोस्ति। ननु चोक्तं प्रतिज्ञा[illegible]भेदो न भवतीति। श्रुतिभेदः सति प्रतिज्ञाभेदः किं करिष्यति। ननु च श्रुतिकृतोपि भेद उक्तः। इह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्राप्नोति। कुर्वन्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोतीति। नैष दोषः। अयोगवाहानाम विशेषेणोपदेशाश्रयणादितः। इह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे कृते तस्य झल्ग्रहणेन ग्रहणात् सर्वस्यानुस्वारो भविष्यति। कुर्वन्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः कृतयोः तस्य झल्ग्रहणेन ग्रहणात् सर्वस्यानुस्वारपरसवर्णौ भविष्यतः। नैव वा

स्वारयोः श्रुतिं प्रति विशेषाभावः कुर्वन्तीत्यत्रापि पूर्वस्य नकारस्यानुस्वारपरसवर्णयोः कृतयोः परसवर्णस्यासिद्धत्वात् णत्वस्यातिक्रमः॥ ॥७॥ ॥७॥

नचह्योरिति॰ ननुचयद्यपिप्रयोगेपूर्वंणनुमापरस्त्वनुमोंसाजपेक्षमानंतर्यंविहन्यतेतथापिक्रमेणविधानेह्योःसंभवसेवपरत्वमित्युक्तं॰ नैषदोषः॥प्रयोगाश्रयेणैतदुक्तं॰
प्राधान्यात्प्रयोगस्यासादच्चःपरोमित्प्रयोक्तव्यइतिआनंतर्यमेवात्रसंश्रितं॰ नचह्योर्नुमोरेकाजपेक्षमानंतर्यंसंभवतीति॰ पचतीत्यत्रनुसार्वधातुकेपरतःशब्विधानाद्
धिकरणव्यवधानमाश्रितमेव॰ विनिमित्तौजिन्ननिमित्ताविसर्पः॥उकारात्परआत्रआमःपरोनुम्॰ नचेति॰ झलचइतिदंद्वाश्रयणेदोषः॥बहुवज्जर्जांषेषामितिबहुऊर्जि॥

मिदचोंत्यात्परइत्युच्यते॰ नचह्ययोर्मितोरचामंत्यात्परत्वेसंभवोस्ति॰ कथंतर्हीमौद्वौमितावंत्यात्परोस्तः॥बहूनड्वांहिश्राहणकुलानि
विनिमित्तावेतौ॰ तत्रबहूर्जिनुम्प्रतिषेधः॥तत्रबहूर्जिनुम्प्रतिषेधोवक्तव्यः॥बहूर्जिब्राह्मणकुलानि॰ अंत्यात्पूर्वंनुममेके॰ अंत्या
त्पूर्वंनुममेकइच्छंति॰ किमविशेषेणआहोस्विद्बहूर्जांवेव॰ किंचातः॥यद्यविशेषेणकाष्ठतक्षीतिभवितव्यं अथकाष्ठतंक्षीतिभवि
तव्यंबहूर्जांवेव॰ एवंतर्हिबहूर्जांवेव॰ बहूर्जिसतर्हिप्रतिषेधोवक्तौ नवक्तव्यः॥अचइत्येषापंचमी॰ अंचउत्तरेयोझल्तदंतस्यन
पुंसकस्यनुमाभवितव्यं॰ यश्चात्राचउत्तरेनासौझल्तापितदंतंनपुंसकंयदंतंनपुंसकंनासोअचउत्तरः॥इहापितर्हिनप्राप्नोति
काष्ठतंक्षीति॰ अत्रयोचउत्तरोझल्नतदंतंनपुंसकंयदंतंचनपुंसकंनासावचउत्तरः॥नैतदस्ति॰ झल्ग्रजातिःप्रतिनिर्दिश्यतेअ
चउत्तरायाझल्ज्जातिरिति॰ यद्दिपंचमीकुंडानिवनानीत्यत्रनप्राप्नोति॰ एवंतर्हिइकोचिविभक्तावित्यत्रअचःसर्वनामस्थानइ
त्येतदनुवर्तिष्यते॰ एवमपिषष्ठ्यभावान्नप्राप्नोति॰ सर्वनामस्थानइत्येषासप्तमीअचइतिपंचम्याःषष्ठीप्रकल्पयि
ष्यतितस्मिन्नितिनिर्दिष्टेपूर्वस्येति॰॥

यद्यविशेषेणेति॰ काष्ठतक्ष्णुवंतीतिक्विपिकृतेजसःशिभावेचककारषकारयोर्मध्येनुम्प्राप्नोतितस्यझल्परत्वादनुस्वा रप्रसंगः॥अचइत्येषेति॰ झलचइतिनद्वंद्वः॥किंतर्हि
झलितिलुप्तषष्ठीकंपदं अचइतितुपंचम्यंतं॰ कुंडानीति॰ इगंतस्योत्तरसूत्रेणसिध्यतीसकारांतस्यैवनुमोप्राप्तिरुच्यते॰ एवंतर्हीति॰ वाक्यभेदेनाजंतस्यसर्वनामस्थाने
नुम्विधीयते॰ सर्वनामस्थानइत्येषेति॰ ननु पंचमीसप्तम्योर्द्वयोरपिसावकाशत्वात्परत्वात्पंचम्यैवप्रकल्पिकयाभवितव्यं॰ एवंतर्हीष्टवाचित्वात्परत्वात्सप्तम्यपि

इकोचिविभक्तौ॥ ॥अजग्रहणमिति हलादौ तु नुमो लोपविधानान्नलोपस्य स्वर्यमनुग्रहणं नोपपद्यते इति प्रश्नः। स्वरेण न प्राप्नोतीति। नुमाद्यन्ततया विधानात् तल्लुप्ते किन्नेति। स्वरे कर्तव्ये नलोपस्य
शास्त्रे णत्वासिद्धत्वं प्रतिपाद्यते न तु प्रयोगेन कारस्य सद्भावः। ततश्च नुमः सद्भावेपि यत्र स्वरो भवति तत्रासद्भावे कथं न स्यादित्यर्थः। संघातग्रहणमिति। अंगस्य विधानाद्बहिरंगलाच्च नुमो
तरंगः स्वरः पूर्वमेव प्रवर्तते। अतिरस्यामिति। अतिरिस्यामितिस्थिते नुमि कृते तेन व्यवधानादेशस्वत्वं न प्राप्नोति सुब्विधौ नलोपस्यासिद्धत्वाच्च अपादिपदांगाधिकारे तस्य च
ग्रहणं भवति तदुत्तरपदस्य चेति रेशब्दांतस्यांगस्यात्वं विधीयते इति नास्ति नुमांगस्य व्यवधानं तथापि नकारस्यात्वं प्राप्नोति तस्मिन्पूर्वस्य मणिसस्ततिर्यास्यामिति प्राप्नोति। पद

इकोचिविभक्तौ॥ ॥अजग्रहणं किमर्थं इकोचि व्यंजने माभूत् इकः अचीत्युच्यते व्यंजनामाभूत् त्रपुभ्यां त्रपुभिः। अस्त्वत्र नुम्। नलोपः प्राति
पदिकांतस्येति नलो[illegible]पोन विष्यति। स्वरः कथं पंचत्रपुभ्यां पंचत्रपुभ्यः इगंते द्विगौ विशेषस्वरो प्राप्नो
ति। स्वरे वै श्रूयमाणेपि श्रूयमाणेपि नुमि स्वरो भव[illegible]ति। पंचत्रपुणा पंचत्रपुणे इति। लुप्ते किन्न भविष्यति। लुप्त इदानीं किं न भविष्य
ति। किं पुनः कारणं श्रूयमाणेपि नुमि स्वरो भवति। संघातग्रहणं सोनोत्सहते वयवस्येगंततां विहंतुमिति कृत्वा ततः श्रूयमाणेपि नुमि
स्वरो भवति। इदं तर्हि अतिराम्भ अतिराणि। नुमि कृते रायो हलीत्यात्वं न प्राप्नोति। इदमिह संप्रधार्यं नुम् क्रियतामात्वमिति किमत्र कर्तव्यं पर
त्वादात्वं। इदं तर्हि प्रियतिस्त्र्यां प्रियतिस्त्रः। नुमि कृते तिसृभावो न प्राप्नोति। इदमिह संप्रधार्यं नुम् क्रियतां तिसृभाव इति। किमत्र क
र्तव्यं परत्वात्तिसृभावः। अथेदानीं तिसृभावे कृते पुनः प्रसंगविज्ञानान्नुम् कस्मान्न भवति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बा
धितमेवेति। अत उत्तरं पठति। इकोचि विभक्तावजग्रहणं नुम्नुटोर्विप्रतिषेधार्थं इकोचि विभक्तावजग्रहणं क्रियते नुमो नुड्विप्रतिषेधे

त्वादात्वमिति। आत्वम निसं नुमि कृते तेन व्यवधानादप्रसंगात्। अथवा शब्दांतरप्राप्त्या नुमि कृते नकारस्य प्रसंगात्। अकृते विकारस्य नुमप्यनित्यः कृते भाते प्राप्त्यभावात्। परत्वात्तिसृभा
व इति। शब्दांतरप्राप्त्या नुमनित्यः तिसृभावस्तु नुमि कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः। स हि यद्यपि त्रिशब्दांतस्यांगस्य विधीयते तदंतत्वाच्च नुमव्यवधायकः तथापि निर्दिश्यमान
स्यत्रेरेव तिसृभावेन भाव्यं स च नुमा व्यवहित इति तिसृभावस्याप्राप्तिस्तदेवमुभयोरनित्ययोः परत्वात्तिसृभावः॥ ॥७॥ ॥ ॥७॥

=यत्नइति·नित्यमपिनुमंबाधित्वापूर्वविप्रतिषेधवचनसामर्थ्यान्नुडित्यर्थः।२=

भा·कौ·

२९

त्रपुणामिति·सत्यजग्रहणेह्यपोरपिनुम्नुटोरनित्यत्वाद्विप्रतिषेधेसतिनुमपि चिरतृज्वद्भावेभ्योनुडितिपूर्वविप्रतिषेधान्नुड्भवतितस्मिंश्चनामीतिदीर्घत्वंअसतिजग्रहणेकृताकृतप्रसंगित्वान्नित्यत्वान्नुमेवस्यात्·नुडर्थोयत्नइति·अजग्रहणंचवक्तव्यंपूर्वविप्रतिषेधश्चवक्तव्यइतियत्नद्वयमाश्रयणीयंतत्राज्ग्रहणमकृत्वैवएकएवनुडर्थोयत्नःकर्तव्यइत्यर्थः।नुटिकृतेइति·यत्नांतरेणनुटिकृतेनुम्नप्राप्नोतीत्यर्थः।किंचसादिति·नलोपेकृतेदोषाभावंमन्यते·नामीति·नलोपस्यसुब्विधावसिद्धत्वादजंतत्वाभावात्·इहतर्हीति·इन्हन्निति नियमःसर्वस्योपधालं

त्रपुणांजतूनां·इतरथाहिनुमोनित्यत्वान्नुडभावः।अक्रियमाणेहिअज्ग्रहणेनित्यनिमित्तोनुम्कृतेपिनुटिप्राप्नोत्यकृतेपिनित्यनिमि
त्तत्वान्नुमिकृतेनुडभावःस्यात्।एतदपिनास्तिप्रयोजनं·क्रियमाणेपिवैअज्ग्रहणे·वश्यमन्यन्नुडर्थोयत्नःकर्तव्यः।पूर्वविप्रतिषेधोव
क्तव्यः।इदंतर्हिप्रयोजनंनुटिकृतेनुम्माभूदिति।किंचस्यात्त्रपुणांजतूनाम्·नामीतिदीर्घत्वंनस्यात्।माभूदेवंनोपधायाइत्येवंभविष्य
ति·इहतर्हिश्रुचीनां·इत्रहन्पूषार्यम्णांशौसौचेत्यस्मान्नियमान्नप्राप्नोतिदीर्घत्वं·अर्थवद्ग्रहणेनानर्थकस्येत्येवन्नभविष्यति।नैषापरिभा
षाइहशक्याविज्ञातुंइहहिदोषःस्यात्।वाग्मीति।एवंतर्हिलुक्सणप्रतिपदोक्तयोःप्रतिपदोक्तस्येवेति·उत्तरार्थंच·उत्तरार्थंतर्हिअज्ग्र
हणंकर्तव्यं·आस्थिदधिसक्थ्यक्ष्णामनङुदात्तः।अजादौयथास्यात्·इहमाभूत्·अस्थिभ्यांअस्थिभिः।यद्युत्तरार्थंस्यात्तत्रैवाज्ग्रह
णंकुर्वीत·इहक्रियमाणेयदिकिंचित्प्रयोजनमस्तित्रपुजतुनां·इहापिक्रियमाणेप्रयोजनमस्तिकिं·अजादौयथास्यात्·इहमाभूत्।त्रपुजतु·एतद
पिनास्तिप्रयोजनंविभक्तावित्युच्यतेनचात्रविभक्तिंपश्यामः।प्रत्ययलक्षणेन·नलुमतांगस्येतिप्रत्ययलक्षणस्यप्रतिषेधः।एवंतर्हिसिद्धेसति
यदज्ग्रहणंकरोतितज्ज्ञापयत्या[illegible]चार्योभवतीहकश्चिदन्यो।पिप्रकारः·प्रत्ययलक्षणंनामेति·किमेतस्यज्ञापनेप्रयोजनं।हेत्रपुहेजतोअत्र
गुणःसिद्धोभवति·इको।चियंजनेमाभूदस्तुलोपःस्वरःकथं।स्वरोवक्ष्यमाणेपिलुमताक्षिंनभविष्यति·मायाः·तिस्रश्चा[illegible]
व्यवधानान्नुमाअपि।नुट्वा·चडनमार्थंत्रिइहाकं।चिन्त्यमितीति॥ ॥

यम ५

शिवः

२९

णस्यदीर्घस्येतिआख्यातं·नैषेति·अनिनस्मन्ग्रहणान्यर्थवताचानर्थकेनचेति वचनात्·तथाचवाग्मिनइत्यादावपिनियमाद्दीर्घाभावः।तत्रैवायमिति·एवंस्वरितत्वंनप्रतिज्ञेयंनव
तिप्रसक्तश्रुतिसंभवेचानुमानंनाश्रयितव्यंभवति·हेत्रपुहेत्रपोइति·हेत्रपुइतिप्राप्तेहेत्रपोइतिभवतीत्यर्थः।केचित्तुरूपद्वयमिष्यतइत्याहुः।क्वचित्प्रत्ययलक्षणंनुमतात्वाभायामपिसं
ज्ञायांभवतिइत्येतदज्ग्रहणेनज्ञाप्यतेनतुसर्वत्रेतितेवदंति॥

=अज्ग्रहणंविस्पष्टार्थं·नासिकस्याकार्यमिति·२= नुमभावस्यपत्ययलक्षणप्रतिषेधाभावस्यचाज्ञापितत्वाकेचनपुइत्यमुक्तमनाह·इतिभाष्ये इति·२=

तृतीयादिषु॥ ॥किमिहेति। अन्यत्र पराश्रयाणि कार्याण्यतिदिश्यंते न तु स्वाश्रयकार्याभावः इह तु विपर्ययो दृश्यत इत्याह। कथं पुनरिति। पुंवदित्यनेन नुम्प्रतिषेधो शक्योऽतिदेष्टुं न हि पुंसि नुम्प्रतिषेधो विहितः॥ कामचारश्चेति। यत्र क्रियाशब्देन नोपात्ता तत्र कामचारः न तु ब्राह्मणवत्क्षत्रिये वर्तितव्यमित्यादावुपात्तक्रिये। अतिदेशे प्रतिपत्ता चोपमाने भावाभावयोरन्यतरमवगत्य वाक्यशेषं कल्पयति। तत्र पुंसि नुमभावदर्शनान्नपुंसके पुंवदतिदेशान्नुमभावः प्रतीयते तत्रेह शास्त्रे यथालक्ष्यं कचिद्भवतीत्यस्याभ्याहारः कचिन्न भवतीत्यस्य कचित्तु न यस्य। यथा स्थानिवदतिदेशे तथा वाय्वोरित्यादौ स्वाश्रयलोपाभावः॥ न हि किंचिदिति। तस्माच्छसो नः पुंसीति नत्वातिदेशः तृतीयादिषु पुंवद्भावातिदेशात्पूर्वसवर्णदीर्घा

तृतीयादिषु भाषित०॥ ॥किमिह पुंवद्भावेनातिदिश्यते। नुम्प्रतिषेधः कथं पुनः पुंवदित्यनेन नुम्प्रतिषेधः शक्यो विज्ञातुं। वतिनिर्देशोऽयं। कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुं। तद्यथा उशीनरवन्मद्रेषु यवाः संति न संतीति। मातृवदस्याः कलाः संति न संतीति। एवमिहापि पुंवद्भवति पुंवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे यथा पुंसो न नुम्भवत्येवं तृतीयादिषु भाषितपुंस्कस्य न भवतीति। किमुच्यते नुम्न भवतीति न पुनरन्यदपि पुंवत्स्यादिति पदं कार्यमुच्यते यत्तृतीयादिषु भाषितपुंस्कस्यातिदिश्येत। अनारंभात्पुंसि। न हि किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिषु विभक्तिषु भाषितपुंस्कस्यातिदिश्येते। नुम्प्रकृतः। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतो नुम्प्रतिषेधात्। पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्वानां प्रतिषेधो वक्तव्यः। गुणः। ग्रामण्ये ब्राह्मणकुलाय। गुणः। नाभावः। ग्रामण्या ब्राह्मणकुलेन। नाभावः। नुट्। ग्रामण्यां ब्राह्मणकुलानां। नुट्। औत्वं। ग्रामण्यां ब्राह्मणकुले। ह्रस्वत्वमप्रतिषिद्धं ह्रस्वा[illegible]श्रयाश्चैते विधयः प्राप्नुवंति। ह्रस्वाभावार्थं च। किंच नुम्प्रतिषेधार्थं च। कथं पुनरप्रकृतस्यासंशब्दितस्य ह्रस्वत्वस्य प्रतिषेधः शक्यो विज्ञातुं। अर्थातिदेशात्सिद्धं॥

किंचि ६

यत्ता दि ५

पुंवि न क्रियमा दि ४

भावाच्चेह न संभवति। नुम्प्रकृत इति। अनेन प्रत्यासत्तिमाश्रयति। ह्रस्वत्वमप्रतिषिद्धमिति। तस्याप्रकृतत्वात्। अर्थातिदेशात्सिद्धमिति। यद्यपि प्रकरणमनपेक्ष्य व्याख्यानाश्रयेणापि ह्रस्वाभावः सिध्यति तथापि संभवात्परित्यागं तरमा[illegible]श्रितं। यदि कार्यातिदेशः स्यात्तदाप्रकृतत्वादप्रकृतत्वलक्षणो भेदः स्यात् दर्थे वतिर्दिश्यमाने नास्त्ययं भेदः। नैवं विज्ञायत इति। यदा शब्देन्यपदार्थे कार्यातिदेशः स्यात्तदाप्रकृतस्यैव नुमः प्रतिषेधः स्यान्न ह्रस्वस्य॥ ॥७॥ ॥७॥

=तद्योगाद्वेति॰ अनेनार्थआधृजंनलं भाषितपुंस्काद्यस्याभिमेति॰ १२=

भा॰ कै॰

२२

भाष्यते पुमानस्मिन्नर्थ इति॰ अयोऽन्यपदार्थत्वेनाश्रीयते स चार्थो नपुंसकलक्षणेन विशेष्यत्वेनाश्रीयते न हि नपुंसकेऽर्थे पुंसो भाषणमुपपद्यते तस्मात् शब्दप्रवृत्तिनिमित्तलक्षणोऽर्थोऽन्यपदार्थत्वेनाश्रीयते तद्योगाद्वाभिधेयं नपुंसकं तदपि भाषितपुंस्कमुच्यते तस्यार्थस्य पुंस्त्वातिदेशाद्भावप्रत्ययस्तेन भवतः पुंसि द्वयोरप्यभावादर्थस्य चापौरुषेयत्वादतिदेशसंभवात्तदतिदेशद्वारेणानेककार्यातिदेश एवायं संपद्यते॰ तत्र यद्यप्यंतरंगोह्रस्वस्तथाप्यपवादविषयं प्रकल्प्योत्सर्गाणां प्रवर्त्तनान्नाप्रवर्त्तते॰ ह्रस्वाभावाच्च गुणादीनां निमित्ताभावादप्रवृत्तिः सिद्धा॰ तद्धितलुगिति॰ अर्थातिदेशस्यैव प्रयोजनांतरं चोद्यमुखेनोपन्यस्यते॰ फलेलुगिसोरन्तोलुकि कृते

[blacked out] भाष्यते पुमाननेन सोयं भाषितपुंस्कः भाषितपुंस्कस्य शब्दस्य पुंशब्दो भवतीति॰ कथं तर्हि भाष्यते पुमानस्मिन्नर्थे सोयं भाषितपुंस्कः भाषितपुंस्कस्यार्थस्य पुंवदर्थो भवतीति॰ तद्धितलुक्प्रतिषेधश्च॰ तद्धितलुकश्च प्रतिषेधो वक्तव्यः। पीलुर्वृक्षः पीलुफलं पीलुना पीलुने इति॰ न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात्॰ न वा वक्तव्यं॰ किं कारणं॰ समानायामाकृतौ भाषितपुंस्कविज्ञानात्॰ समानायामाकृतौ यद्भाषितपुंस्कं आकृत्यंतरे चैतद्भाषितपुंस्कं किं वक्तव्यमेतत्॰ न हि॰ कथमनुच्यमानं गंस्यते॰ एतदप्यपर्प निर्देशात्सिद्धं॥ ॥ईदूद्द्विवचने॥ ॥किमुदाहरणं॰ अक्षीनेऽइ द्रुपिंगले॰ नैतदस्ति॰ पूर्वसवर्णेनाप्येतत्सिद्धं॰ इदं तर्हि अक्षीभ्यां तेनासिकाभ्यां॰ इदं चाप्युदाहरणं॰ अक्षीनेऽइ द्रुपिङ्गले॰ ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धमिति॰ नुमाव्यवहितत्वात् पूर्वसवर्णो न प्राप्नोति॰ [blacked out] दस्मिन्नपुंसकस्य पुंवद्भावो वक्तव्यः। मधोर्ग्रम्णगामिमधोस्तत्वा इवासतदस्येवमर्थं पुंवद्भावेन नुमो निवृत्तिः॥ ॥७॥

पीलुशब्दो वृक्षाकृतौ पुंल्लिंगः फलाकृतौ नपुंसकलिंग इति पुंवद्भावात् लुमोप्रसंगः। न वेति॰ नन्वाकृतिरेवान्यपदार्थत्वेनाश्रिता भाषितपुंस्कशब्दस्य नु भाषितपुंस्कव्यपदेशो नैवाश्रितः। सत्यं॰ साक्षाच्छब्दस्य भाषितपुंस्कव्यपदेशो नास्त्यभिधेयद्वारकस्तु केन निवार्यते॰ तत्र पीलुशब्दो वृक्षाकृतौ पुंल्लिंगः। फलाकृतौ नपुंसकलिंग इति पुंवद्भावाप्रसंगः॥ ॥ईदूद्द्विवचने॥ ॥पूर्वसवर्णेनेति॰ अक्षिणी इति स्थिते छंदस्यालुवद्भावाच्छीभावे नुमि चासति प्रथमयोः पूर्वसवर्ण इत्यनेन॰ नुमाव्यवहितत्वादिति प्रथमयोः पूर्वसवर्ण इत्यत्राक इति वर्त्तते तेनाग चोः पूर्वसवर्णदीर्घ उच्यमानो नुम्व्यवधानेनास्ति इत्यक्षिणी इति प्राप्नोति परत्वाच्च नुम्प्राप्नोति ईकारस्तु विधीयमानः प

=केन निवार्यत इति॰ तथा च भाषितपुंस्कप्रवृत्तिनिमित्तं नपुंसके भाषितपुंस्कं भावः॰ न च प्रवृत्तिनिमित्तं वा भाषितपुंस्कं वाच्यः अन्यपदार्थमेकार =ननु समानायामाकृतौ भाषितपुंस्कमिति सुत्रार्थशब्दस्यान्यपदार्थत्वं भातितत्पुंस्कमिति पक्ते॰ नन्विति॰ ८=

=वार्यआधजनकु॰ न॰ तथा सति पु॰ स्वसमानाधिकरणप्रवृत्तिनिमित्तकालस्य फलवाचि पीलुप्रवृत्तिनिमित्ताद्येव न दवस्थायां फलवाचि... पीलुशब्दयोः समानाकृतिं फलेनैव स्यात् प्रवृत्तिनिमित्तं तत्पुंस्त्वसमानाधिकरणप्रवृत्तिनिमित्तं नपुंसकार्थस्य पुंवद्भावेन फलवाचि पीलु...

स्वशब्दस्य तद्याथार्थकं शक्यं च भासोति॰ २

=तद्धितलुगंतस्येत्यर्थः॥ १२=

॥ अनुमितमर्थं इनस्य (सा) नि सि कोपे पुंवद्भावो नेति दत्तीनमीकृति आदिति॥ [margin, partly illegible]

शिवः

=नद्विषयत्वेसत्वविषयत्वोपादानान्पुरस्तान्नित्यनपुंसकपर्युदासात् तस्माद्घस्मेति ३=

नुमिनिवृत्त इति अप्रवृत्तिरेवनिवृत्तिः। श्रीभावोपिपुंवद्भावान्नभवति। स्वरार्थइति उदात्तग्रहणानुवर्त्तनादीकारस्योदात्तः। नपुंसकस्वर इति। नद्विषयस्यानिसंतस्येत्याद्युदात्तत्वं। ननु चेति। अमुसन्निपक्षेवोघते। युसन्निपक्षेत्वशेर्निर्दिति निलाद्युदात्तत्वेन भाव्यं। मधुर्मासइति। मत्वर्थेमासतन्वोर्मधोर्नचेतिमतउत्पन्नस्यलुगकारश्चेकार्श्चवक्तव्या इति लुकिकृतेमासेपुंसिमधुशब्दोवर्त्तत इत्याद्युदात्तत्वं नस्यात्। तस्माघस्यान्यत्रनपुंसकत्वंदृष्टंतस्मात्स्वत्सपि नपुंसकत्वेभाद्युदात्तत्वं इष्यते इतिपुंवद्भावेपि स्वरानिवर्त्तनात्स्वरार्थईकारोविधेयः। सतर्हीति। मधोर्ग्लातीत्येवमाद्यर्थः। प्रकृतमिति। वाक्यभेदेनसंबंधः क्रियते। छंदसिनपुंसकंपुंवदित्येकंवाक्यं अ

नुमिनिवृत्तेपूर्वसवर्णेनैवसिद्धं स्वरार्थस्तर्हिईकारोवक्तव्यः। उदात्तस्वरोयथास्यान्नपुंसकस्वरोमाभूत्। ननु च पुंवद्भावातिदेशा देवस्वरोभविष्यति। अशक्यः पुंवद्भावातिदेशस्त्वाश्रयितुं। इह हि दोषः स्यात्। मध्वस्मिन्नस्तिमधुर्मासइति। सतर्हिपुंवद्भावोवक्तव्योन वक्तव्यः प्रकृतंपुंवदितिवर्त्तते॥ ॥नाभ्यस्ताच्छतुः॥ ॥कस्यायंप्रतिषेधः नुमइत्याह। ननुमोग्रहणंकर्त्तव्यं नकर्त्तव्यं। प्रकृतमनुव र्त्तते। क्वप्रकृतं। इदितोनु[illegible]म्धातोरिति। तद्वैअनेकग्रहणेनव्यवछिन्नमशक्यमनुवर्त्तयितुं। एवंतर्हिसर्वनामस्थानइत्य नुवर्त्तनेसर्वनामस्थानेयत्प्राप्नोतितस्यप्रतिषेधः। तद्विकृततरकेणग्रहणेनव्यवछिन्नमशक्यमनुवर्त्तयितुं। अथेदानीं व्यवहि तमपिशक्यतेनुवर्त्तयितुंनुमेवानुवर्त्स्यः इत्यर्थमुत्तरार्थंच। इहचैवप्रतिषेधः सिद्धोभवति इहचआच्छीनद्योर्नुमितिनुम्ग्रहणंनकर्त्त व्यंभवति॥ ॥आच्छीनद्योर्नुम्॥ ॥इह कस्मान्नभवति। अदतीघ्नतीलुनतीपुनती। लोपेकृतेअवर्णाभावात्

स्यादीनांछंदसिद्विवचनेईकारेभवतीतिद्वितीयंवाक्यं॥ ॥नाभ्यस्ताच्छतुः॥ ॥कस्यायमिति। आच्छीनद्योरितिनुम्ग्रहणमव्यवहितस्यानुवृत्तिर्नाश्रितानचानंतरः प्रतिषेधार्ह इतिप्रश्नः। एवंतर्हीति। उगिदचांसर्वनामस्थानेधातोरित्यतः सर्वनामस्थानंनिषेधलक्षणार्थं विज्ञायते सर्वनामस्थानेयत्प्राप्नोतितदभ्यस्ताच्छतुर्नभवतीतिनुमएव प्रतिषेधः संपद्यते। विकृततरकेणेति। नुमागमश्च तुभिर्योगैर्विछिन्नः सर्वनामस्थानंनुपंचभिरितिप्रकर्षप्रत्ययनिर्देशः॥ ॥आच्छीनद्योर्नुम्॥ ॥इह कस्मादिति। सर्वे नैवावर्णस्यनिवृत्तत्वात्। क्वचिल्लुकाक्वचिच्छुनाक्वचिदेकादेशेनक्वचिच्छ्नाभ्यस्तयोरातइतिलोपेनतत्रावश्यंकृतपूर्वगतिराश्रयितव्या अवर्णान्निवृत्तिशास्त्रस्यवानुमागमवि

इतरः पूर्वोक्तेनैवाभिप्रायेण चोदयति॰ किं नहीति॰ इतरः सांप्रतिकमवर्णान्तं दर्शयितुमाह॰ यांतीति॰ नैवं विज्ञायत इति॰ एवं हि विज्ञायमाने ऽवर्णश्रुताचोऽनयमाश्रितं स्यात्॰ अवर्णान्नुम्भवतीति॰ अवर्णात्परइत्यर्थः॥ शत्रवयवव्यतिरिक्तश्चावर्णो गृह्यते आदिशुपादानसामर्थ्यात्॰ तद्धेदवर्णमिति॰ शत्रवयवस्तकारः शत्रुशब्देनोच्यते नहन्यथैकादेशकृते शत्तुरनंतरमवर्णो भवति॰ उभयत आश्रयेचनांतादिवदिदुक्तं॰ तस्माच्छत्रवयवस्तकारः शत्रुशब्देनोच्यते॰ शत्रवयवाकारव्यतिरिक्तं चावर्णमेकादेशात्मकमाश्रीयत इति न कश्चिद्दोषः॥ ॥सावनडुहः॥ ॥आमागमः सर्वनामस्थानमात्रे विधीयमानः सोऽरन्यत्र सावकाशो निरवकाशेन नुमा बाध्येतेति मत्वाह अनडुहः सौ विति॰ अवर्णोपधस्येति॰ न चामा विना ऽवर्णोपधत्वसंभव इति निमित्तमेव नुमआमिति बाध्यबाधकभावाभावः॥ अनडुहि यावंतीति॰ अनडुहो ऽकारांतत्वासं

किं तर्ह्यस्मिन्योगे उदाहरणं यानीयांती॰ अत्राप्येकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति॰ अंतादिवद्भावेन व्यपवर्गः॥ उभयत आश्रये नांतादिवत्॰ नोभयत आश्रयः करिष्यते॰ नैवं विज्ञायते ऽवर्णान्ताच्छतुर्नुम्भवतीति कथं तर्हि अवर्णान्नुम्भवति तच्चेद्वर्णः शत्तुरनंतरमिति॰॥ शप्श्यनोर्नित्यं॥ ॥नित्यग्रहणं किमर्थं॰ विभाषामा भूत्॰ नैतदस्ति प्रयोजनं॰ सिद्धोऽत्र पूर्वेणैव नत्वारंभसामर्थ्यान्नित्यो विधिर्भविष्यति॰ तदेतन्नित्यग्रहणं तिष्ठतु सान्मा सिकं तावत्॥ ॥सावनडुहः॥ ॥अनडुहः सावाम्प्रतिषेधो नुमो ऽनवकाशत्वात्॰ अनडुहः सावाम्प्रतिषेधः प्राप्नोति॰ किं कारणं॰ नुमोऽनवकाशत्वात्॰ अनवकाशो नुम् आमं बाधते॰ न वा वर्णोपधस्य नुम्वचनात्॰ न वा एष दोषः॰ किं कारणं॰ अवर्णोपधस्य नुम्वचनात्॰ अवर्णोपधस्य नुमं वक्ष्यामि॰ तदवर्णग्रहणं कर्त्तव्यं न कर्त्तव्यं॰ प्रकृतमनुवर्त्तते क्व प्रकृतं॰ आच्छीनद्योर्नुमिति॰ य दितदनुवर्त्तते अनडुहि यावंस्यवर्णान्नित्यं सर्वनामस्थाने परे नुम्प्राप्नोति

भवारनडुहावर्णं विशेष्यते न त्ववर्णेनानुडुच्छब्दः॰ ततः सर्वावर्णानां नुम्प्रसंगः॥ पद्येवं सत्यामप्या दित्यनुवर्त्तनीय एव सन्निहितमवर्णं तस्यैव नुम्स्यात्॰ तथा च नुमाम्बाध्येत॰ नैष दोषः॥ आगमिनेदात्॰ आमनडुहो नुम्त्ववर्णस्य न स्यात्सर्वावर्णान्नुम्प्रसंग एव दोषः॥ मिदचोंत्यादिति॰ मित्वलिंगाच्च मित्स्थिताधोपतिष्ठते नडुपस्थानाद् इकारात्परो नुम्प्रसक्त आदित्यधिकाराद्वर्णाद्दृस्मात्परः॰ क्रियते न चाम्पकृते ऽवर्णो लोऽभवतीति सामर्थ्यादाभिकृते नुम्विधीयते॰ अथवोकारात्पर एव विधीयते तत्राद्यधिकारादयमर्थो भवति यथा ऽवर्णात्परो नुम्भवति तथा कर्त्तव्यमेवं चावर्णात्परो भवति यदि कृते नुम्यात्क्रियत एवं च सत्यादित्यधिकारे

व्यपवर्गाभिदः॥
*तदभावेहेतु
माहउभयतइ
ति॰

पुनःप्रसंगविज्ञानादिति· चार्थेवाशब्दोवहूनञ्ग्रहीतिपरत्वाद्दग्मिहतेपुनःप्रसंगविज्ञानान्नपुंसकस्यचझलचइतिनुम्क्रियतइतियावार्थः॥ भाष्यकारस्तुन्यायमुत्पादनार्थंविकल्पार्थंवाशब्दंव्याख्यायइष्टयित्वासमुच्चयार्थमेवव्याचष्टे· इत्तांतादिति· प्रसंगेइत्तांतश्चोद्यप्रसंगादित्यर्थः॥ अथवाइत्तोतिकोंतोयंप्रबंधश्चोद्यसमाधानःतक्षणस्तद्देनेवावस्थितंयच्चोद्यंतदुपचाराद्दत्तांतशब्दवाच्यंतस्मादित्यर्थः॥ ॥दिवऔत्॥ ॥दिवऔतइति· विशेषानुपादानाद्यातोरपिप्राप्नोति·अक्षद्यूरिति· ऊठिकृतेएकदेशविकृतस्यानन्यत्वात्

पुनःप्रसंगविज्ञानाद्वासिद्धं·अथवापुनःप्रसंगान्नुमिकृतेआम्भविष्यति·यथाआतादिषुद्विर्वचनं·तद्यथा·जक्षेममक्षेईजतुरीजुरितिआतादिषुकृतेपुनःप्रसंगाद्विर्वचनंभवति· एवमत्रापिनुमिकृतेआम्भविष्यति·नैषयुक्तःपरिहारो विप्रतिषेधेपुनःप्रसंगःविप्रतिषेधश्चद्वयोःसावकाशयोर्भवतिइहपुनरनवकाशोनुमामंबाधते· एवंतर्हिइत्तांतादेषपरिहारःप्रस्थितःकस्मादत्तांतात्·इदमयं चोद्योभवतिअनडुहःसावाम्प्रतिषेधोनुमोनवकाशत्वादितितस्यपरिहारेनवावर्णोपधस्यनुम्वचनादितितोयंचोद्योभवतियत्रतर्हिवर्णप्रकरणंनास्तितत्रनेआमानुमोबाधनंप्राप्नोतिवहूनञ्ग्रहिब्राह्मणकुलानीति· नतउत्तरकालमिदंपठितंपुनःप्रसंगविज्ञानाद्वासिद्धमिति·॥ ॥दिवऔत्॥ ॥दिवऔत्वेधातुप्रतिषेधः॥दिवऔत्वेधातोःप्रतिषेधोवक्तव्यः॥अक्षद्यूरिति·अधात्वधिकारात्सिद्धं·अधातोरितिवर्त्तते·क्वप्रकृतं·उगिदचांसर्वनामस्थानेधातोरिति·अधात्वधिकारात्सिद्धमितिचेन्नपुंसकेदोषः॥अधात्वधिकारात्सिद्धमितिचेन्नपुंसकेदोषोभवति·काष्ठतक्षिकूटतक्षि·नपुंसकस्यझलचः॥अधातोरितिप्रतिषेधःप्राप्नोति·उक्तंवा·किमुक्तं·अननुबंधकग्रहणेहिनसानुबंधकस्येति·अथवासंबंधमनुवर्त्तिष्यते·॥ ॥इतोत्सर्वनामस्थाने॥ ॥इतोद्वचनमनर्थकमाकारप्रकरणात्·इतो

त्वेनैवप्रसंगः॥अननुबंधकग्रहणइति·अव्युत्पन्नंदिविितिप्रातिपदिकमननुबंधं·व्युत्पत्तिपक्षेप्यवयवानांप्रत्ययादीनांसानुबंधकत्वेनप्रातिपदिकस्य·संबंधमिति·दिवऔदित्यत्रत्वधातोरितिवर्त्तते·उगिदचामितिनिवृत्तं॥ ॥इतोत्सर्व॥ ॥इतोद्वचनमिति·क्वचिदेकादेशविधानात्क्वचिद्दीर्घविधानाद्ध्रस्वस्यश्रवणेननभाव्यमित्याकारएवप्रसक्तइतोविधेयइत्यर्थः॥यथार्थार्थमिति·वावपूर्वस्यनिगमेइतिदीर्घविकल्पेनरूपद्वयसिद्धिराकारविधौत्वेकमेवरूपंस्याद्दीर्घविकल्पस्तुतक्षणंतक्षाणमित्याद्यर्थंस्यात्॥ ॥ ॥७॥

=पंथाइत्यादौ·२=पंथानावित्यादौ·२=

=एवंचाखरकइसस्मान्निमित्तस्वरकइत्यर्थः॥४=

१ उपदेशोस्यास्तीत्युपदेशीसकारः॥

पुंसोऽसुङ्॥ ॥असुङीति॰पानेर्डुम्सुन्निसाघुदात्तस्यपुंसः सकारस्याविद्यमानोदात्तत्वादनुदात्तस्यस्थाने॰सुङि॰क्रियमाणे अंतरतम्यादनुदात्तंपदमेकवर्जमितिवचनाद्वानुदा त्तएवभवतीतिपुमानित्यादौदोषाभावः॥परमपुमानित्यत्रत्वंतरंगत्वात्समासांतोदात्तत्वेकृते सर्वनामस्थानउत्सन्ने॰सुङ्‌क्रियमाणेनुदात्तः प्राप्नोतिउदात्तस्त्विष्यते॰ननुचोकारस्य कृतमपिसमासांतोदात्तत्वमसुङि॰कृतेनं सत्वान्व्यवतिष्ठते॰नैतदस्ति॰अंतरंगेस्वरेकर्त्तव्येबहिरंगस्यासुङोनिवृत्तत्वान्निर्दिष्टस्यचानिवर्त्तनात्॰उपदेशिवद्वचनात्तुप र्वमसुङ्‌भवतिपश्चात्समासांतोदात्तत्वं॰अस्वरकः स्यादिति॰प्रवृत्तिकालेस्वरविशेषस्यानुपादानादनिमित्तानुदात्तत्वप्रसंगाच्चास्वरकइत्युच्यते नत्वस्वरकस्याचउच्चा

मुदात्तयत्नो॰२

षष्ठ्यर्थंतर्हिअद्वक्तव्यः॰ऋन्मुक्षाणमिंद्रं॰ऋन्मुक्षाणमिंद्रं॥ ॥पुंसोऽसुङ्॥ ॥असुङुपदेशिवद्वचनंस्वरसिद्ध्यर्थंबहिरंगलक्षणत्वात्॰अ सुङुपदेशिवद्भावोवक्तव्यः॥उपदेशावस्थायामेवासुङ्भवतीतिवक्तव्यं॰किंप्रयोजनं॰स्वरसिध्यर्थं॰उपदेशावस्थायांअसुङि॰कृतेइष्टः स्वरोयथास्यात्‌परमपुमानिति॰अक्रियमाणोह्युपदेशिवद्भावेसमासांतोदात्तत्वेऽस्वरकस्यास्वरकः स्यात्॰किंपुनःकारणंसमासांतो दात्तत्वंताबद्भवतिनपुनरसुङ्नपरत्वादसुङाभवितव्यं॰बहिरंगलक्षणत्वात्॰बहिरंगलक्षणोह्यसुङ् अंतरंगलक्षणः स्वरः॰असिद्धंबहिरंगमंत रंगे॰सतर्ह्युपदेशिवद्भावोवक्तव्यः॥नवक्तव्यः॥आघुदात्तनिपातनंकरिष्यते॰सनिपातनस्वरः समासस्वरस्यबाधकोभविति॰एवमप्यु पदेशिवद्भावोवक्तव्यः॥यथैवहिनिपातनस्वरः समासस्वरंबाधतएवंप्रकृतिस्वरमपिबाधेत॰पुमान्॰तस्मात्सुष्ठूच्यते॰असुङुपदे शिवद्वचनंस्वरसिध्यर्थंबहिरंगलक्षणत्वादिति॥ ॥गोतोणित्॥ ॥किमिदंगोतःपरस्यसर्वनामस्थानस्यणित्वमुच्यतआहोस्वि

रणंसंभवति॰अथवोदात्तत्वाभावादस्वरकइत्युच्यते॰एवमपीति॰यस्मादुदात्तनिपातनेदोषस्तस्मात्तत्परित्यागेनेत्यर्थः॥प्रकृतिस्वरमिति॰पुमानित्यादावाघुदात्तत्वमित्यर्थः॥प्र कृतिस्वरस्यकोवकाशइतिचेत्सर्वायःस्यात्॥ ॥गोतोणित्॥ ॥गाङ्कुटादिसूत्रेयावंतःप्रश्लिष्टास्तेसर्वइहसंभवंति॰तत्रणकारस्येतःसर्वनामस्थानेभावात्तदनुवा दप्रयोजनाभावः॥संज्ञाकरणेपिणित्करणेसंज्ञिनोसंप्रत्ययः॥ ...आदेशःप्राप्नोतिएवमादिप्रसिद्धणित्वंप्राप्नोतितद्वन्निर्देशस्तुनिर्दिष्टवत्वादि हाश्रीयते॰भाष्येतुभावनापक्षएवाशंकानिरस्तः परत्वात्स्यापितश्च॰किमिदमिति॰एतद्धस्यतस्याभावोणित्वं॰तेनायमर्थःगोतःसर्वनामस्थानेणित्सर्वनामस्थानमादेशो

×भावाणित्वमुपदेशः×

=अत्रपक्षेउपलक्षणतास्वरकइत्युच्यते॰४=उभयंकर्त्तव्यमितिभाष्यार्थोनतयापुनरुत्पत्तपत्वादिति॰४=कर्मधारयपक्षेइदं॰बहुव्रीहिपक्षेप्याह॰एवमादिवेति॰२= भावेतस्मादिति॰उपदेशिवद्वचनंव्याख्यानमित्यर्थः॥आख्यानं...

शिवः
२४

गोतइत्येषेति· भावनापक्षे गोतइत्येषा पंचमी· तद्वदतिदेशपक्षे तु षष्ठी· तपरकरणमिति· स्थानिवत्वनिषेधादानर्थक्यमिति प्रश्नः। चित्रगुरिति· तपरस्तत्कालस्येत्यत्राणितिनानुवर्तनइस्मन
णेपि तत्कालस्यग्रहणं· इतरथा हीति· यदि स्थानिवत्वनिषेधो नाश्रीयते तदा ससपितपरकरणे संबुद्धौ जसि च [illegible] गुणे कृते स्थानिवत्वात्तत्कालत्वाच्च णित्वं स्यादिसर्थः। प्रतिषि

कश्चात्र विशेषः। गोतः सर्वनामस्थाने णित्कार्यातिदेशः। गोतः सर्वनामस्थाने णित्कार्यमतिदिश्यते· सर्वनामस्थाने णिद्वचनेऽसंप्रत्ययः षष्ठ्यनिर्दे
शात्· सर्वनामस्थानस्य हि णिद्वचनेऽयं संप्रत्ययः स्यात्· किं कारणं· षष्ठ्यनिर्देशात्· षष्ठीनिर्दिष्टस्यादेशा उच्यंते· न चात्र षष्ठीं पश्यामः। एवं तर्हि वति
निर्देशोऽयं· गोतो णिद्भवतीति· स तर्हि वतिनिर्देशः कर्तव्यः। न ह्यंतरेण वतिमतिदेशो गम्यते· अंतरेणापि वतिमतिदेशो गम्यते· तद्यथा एष ब्र
ह्मदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्याह· ते मन्यामहे ब्रह्मदत्तवदयं भवतीति· एवमिहाप्यणितं णिदित्याह णिद्वदिति गम्यते· अथवा पुनरस्तु गोतः प
रस्य सर्वनामस्थानस्य णित्वं· ननु चोक्तं सर्वनामस्थाने णित्ववचनेऽसंप्रत्ययः षष्ठ्यनिर्देशादिति· नैष दोषः। गोत इत्येषा पंचमी सर्वनामस्थान·
इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति· अथ तपरकरणं किमर्थं· इह माभूत् चित्रगुः शबलगुरिति· नैतदस्ति· ह्रस्वत्वे कृते न भविष्य
ति· स्थानिवद्भावात्तु प्राप्नोति· अत उत्तरं पठति· तपरकरणमनर्थकं स्थानिवत्वप्रतिषेधात्· तपरकरणमनर्थकं किं कारणं· स्थानिवत्वप्रति
षेधात्· प्रतिषिध्यतेऽत्र स्थानिवद्भावः। गोः पूर्वणित्वात्स्वरेषु स्थानिवद्भावो न भवतीति· स चावश्यं प्रतिषेध आश्रयितव्यः। इतरथा हि संबुद्धि
जसोः प्रतिषेधः। यो हि मन्यते तपरकरणसामर्थ्याद्धि च न भविष्यतीति संबुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात् हे चित्रगव इति· अथेदानीं स
सपि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र न भवति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति· ननु चेदानीं ससपि स्थानिवद्भावे एतया

गोहेचित्रर

ऽपि तु स्थानिवत्वे गुणे कृते गोरूपस्य लाक्षणिकत्वाभिन्नाप्रसंगः। अस्तु सन्निपाताश्रयेणैतद्भ्यते असन्निपक्षे तु सर्व एव लाक्षणिकः। नहीदानीमिति· स्वाश्रयाप्राप्तिः सा लक्षणप्रतिपदोक्तप
रिभाषावशगत्वाभूत् स्थानिवत्वनिमित्ता तु स्यादेव प्राप्तिः। न हि सा पूर्वोक्तया परिभाषया निवार्यते· स्थानिवत्वस्यानिर्विषयत्वप्रसंगात्।। ॥७॥ ॥७॥

गा॰ कै॰

२५

तृज्वत्क्रोष्टुः ॥ ॥अथात्र विभक्ताविति । तृज्वत्क्रोष्टुरित्यत्र सर्वनामस्थानाधिकारादिभक्त्यधिकारस्य न दोषो न प्रयोजनं । विज्ञायत ईत्यादिषु चीत्यत्राप्यादिशब्दस्य व्यवस्थावाचितादिभक्त्यप्रवृत्तेरिति तत्रापि न विचार इति स्त्रियां चेत्यत्रैवायं विचारः क्रियते । इष्यतोऽधिकाराणां प्रवृत्तिनिवृत्तिनिराभावात् क्रोष्ट्रीः नक्रिरिति । क्रोष्ट्री नक्रिरस्येति बहुव्रीहिः । नक्रिशब्दस्य प्रियादिषु पाठात् पुंवद्भावाभावः । अंतरंगानपि विधीन् बहिरंगो लुग्बाधत इति लुकि कृते विभक्त्यभावात् लुमतांगस्येति प्रत्ययलक्षणप्रतिषेधाच्च तृज्वद्भावो न प्राप्नोति तदभावादीकारांतत्वनिमित्तो ङीबपि न प्राप्नोति । एवं तर्हीति । विभक्तिर्निमित्तत्वेन नाश्रीयते किं तर्हि ईकारः । स्त्री ई स्त्री इति । स्त्रियां ई स्त्रीत्वस्य द्योतक ईकार इत्यर्थः । षष्ठीसमासः । अर्थगतं च स्त्रीत्वं ईकारे आरोप्य नदीसंज्ञानिमित्तत्वाभावात् क्रियते गौरादिपाठादिति । पृथिवी क्रोष्टु पिप्पल्यादयश्च छंदोध्यायिनः पठंति । न हि किंचिदिति । संहिताध्यायिनो

तृज्वत्क्रोष्टुः ॥ स्त्रियां च ॥ ॥अथात्र विभक्ताविल्यनुवर्तते उताहो न । किं चातः । तृज्वत् स्त्रियां विभक्तौ चेत् क्रोष्ट्री नक्रिर्न सिध्यति । तृज्वत् स्त्रियां विभक्तौ चेत् क्रोष्ट्रीः नक्रिरिति न सिध्यति । एवं तर्हीकार एव तृज्वद्भावं वक्ष्यामि । तदीकारग्रहणं कर्तव्यं न कर्तव्यं । क्रियते न्यास एव स्त्री ई स्त्रियामिति । ईकारे तन्निमित्तः सः । ईकारे चेत्तन्न । किं कारणं । तन्निमित्तः सः । तृज्वद्भावनिमित्तः स ईकारः । नाकृते तृज्वद्भावे ईकारः प्राप्नोति । किं कारणं । ऋन्नेभ्यो ङीबित्युच्यते । ईकारे च तृज्वद्भावः । तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । एवं तर्हि गौरादिपाठादीकारो भविष्यति । गौरादिषु न पठ्यते । न हि ■ किंचिदुक्तं गौरादिषु पठ्यते । एवं तर्हि तज्ज्ञापयत्याचार्यः भवत्यत्रेकार इति । यदयमीकारे तृज्वद्भावं शास्ति । नैव भावनं चेत्स्यादनिष्टोऽपि प्रसज्यते । यद्यपि नास्ति विशेषो ङीपो वा ङीषो वा

न पठंति । सर्वात्मना पाठं प्रतिपादयितुमेतदुच्यते ङीपो वा ङीषो वेति । उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वविधानात् ङीनपीति । ततश्चाद्युदात्तत्वप्रसंगः । ननु ईकारे तृज्वद्भावविधानात् स्वरसिद्धिः । चित्स्वरो नित्यस्वरं बाधिष्यते ततश्चोदात्तयणो हल्पूर्वादित्युदात्तविधानान्नास्ति विशेषः । नैतदस्ति । क्रोष्टुशब्द आद्युदात्त एव तत्र ङीनि कृते प्रयोजनाभावात् कृते तृज्वद्भावे नित्यस्वरेण प्रवर्तते इति पर्वत्तृज्वद्भावः परत्वात् तत्र कृते नित्यस्वरः सति शिष्टश्चित्स्वरं बाधेत यदि तु ज्ञापकेन पिप्पल्याद्यंतर्भावः क्रोष्टुशब्दस्यानुमीयते तदा न कश्चिद्दोषः । अपूर्वस्य ईकारस्यानुमानमाश्रित्य श्लोकवार्तिककारेणदोष उपात्तः शार्ङ्गरवाद्यंतर्भावानुमानमपि स्यादिति तस्याशयः ॥ ॥७॥

=ङीनु निमित्तः ।३=

शिवः

२५

पंचभिरिति॰ तद्धितार्थेति समासः॥ आर्हादिति ठक् उसन्तस्य पूर्वं तिलुक् लुक् छित लुकीति स्त्रीप्रत्ययस्य लुकि कृते न लुमतांगस्येति प्रत्ययलक्षणप्रतिषेधादीकारनिमित्तस्तृ
ज्वद्भावो न प्राप्नोति॰ अंतरंगाणां च विधीनां लुका बाधनात्सर्वमेव तृज्वद्भावो न लभ्यते॰ तत्राधेन सर्वनामस्थाने तृज्वद्भावोऽनेन तृजादिषु तृतीयादिषु विकल्प्येनेति हलादौ मध्यमेना
प्राप्तिरुच्यते॰ पंचक्रोष्टृभिरिति केचिदाहुः॥ तस्मादिति ठक् घसोऽश्वेति वाधातः पुंवद्भावो जातेश्चेति प्रतिषिध्यते तद्युक्तं भत्वाभावाच्छस्तह च रितस्य ठकोग्रहणमास्ति
रेव पुंवद्भावस्य नास्ति जातेश्चेति प्रतिषेध औपसंख्यानिकस्य नास्त्येव यथा हस्तिनीनां समूहो हास्तिकमिति॰ अंगसंज्ञा चेति॰ लब्धांगसंज्ञकस्य यत्कार्यं प्रत्ययलक्षणेन तन्न
लुमतांगस्येत्यनेन निषिध्यते न चांगसंज्ञांगस्य कार्यमिति प्रत्ययलक्षणेन भवत्येव॰ तत्र क्रियां वर्त्तमानस्य क्रोष्टुशब्दस्य लब्धांगसंज्ञकस्य तृज्वद्भावे सति ङीप्रत्ययः कार्यः

इह च न प्राप्नोति पंचभिः क्रोष्ट्रीभिः क्रीतैरथैः पंचक्रोष्टृभीरथैरिति॰ एवं तर्हि न वा परं निमित्तं संज्ञा च प्रत्ययलक्षणेन॰ न वा परं निमित्तमाश्री
यते अस्मिन्परतः क्रोष्टुस्तृज्वद्भवतीति किं तर्ह्यंगस्य क्रोष्टुस्तृज्वद्भवति अंगसंज्ञा च भवति प्रत्ययलक्षणेन॰ किं पुनरयं शास्त्रातिदेशस्तृ
चो यच्छास्त्रं तदतिदिश्यते आहोस्विद्रूपातिदेशः तृचो यद्रूपं तदतिदिश्यत इति॰ कश्चात्र विशेषः॥ तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि॰
तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि नत्प्राप्नोति॰ कथं चेचिणि॰ उक्तं तत्रांगस्येति करणादंगशास्त्रातिदेशात्सिद्धमिति आंगं यत्कार्यं तद
तिदिश्यते एवमिह पि अनङ्गुणदीर्घत्वान्यतिदिष्टानि रपरत्वमनतिदिष्टं॰ तत्र को दोषः॥ तत्र रपरवचनं॰ तत्र रपरत्वं न सिध्यतीति तदुक्तं यं
नैष दोषः॥ गुणे अतिदिष्टे रपरत्वमप्यतिदिष्टं भवति॰ कथं॰ कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यं॰ ऋतो ङिसर्वनामस्थानयोर्गुणो भव

कार्यकालत्वेतु संज्ञापरिभाषस्यांग आश्रितेऽप्रसङ्गोप्याश्रितो भवति यथा वज्रश्चेति तदंगस्येत्येतत्र नापेक्ष्यं॰ किं पुनरिति॰ शास्त्रस्य शास्त्रं प्रत्यासन्नमिति प्रत्यासत्त्या शास्त्रातिदे
शः प्राप्नोति प्राधान्याच्च रूपातिदेशप्रसंगः रूपार्थत्वाच्छास्त्रप्रवृत्तेः॥ कार्यातिदेशस्तु शास्त्रातिदेशगृहीतत्वात्पृथङ्नोपन्यस्तः॥ तृज्वदित्यादि रूपेतिदिश्यमाने सूत्रसन्नि
वेशस्यानपेक्षणात्प्रकरणकृतव्यवस्थाभावः॥ शास्त्रातिदेशेतु प्रत्यासत्त्या प्रकरणसन्निकृष्टस्यैव शास्त्रस्यातिदेशः स्यान्न विप्रकृष्टस्य यथा चिण्वद्भावेन वृध्यादि
त्येव भवति न रुत्निणिजादेशाः॥ रपरत्वमिति॰ यथोद्देशपक्षे प्रकरणं तत्र सन्निवेशादिति भावः॥ कार्यकालमिति॰ प्रधानदेशलाभेन नामांगाधिकार एव परिभाषायाः स

आहसेति॰ उच्चार्येति इत्यर्थः॥ एतस्मिन्पक्षे यथा सन्नक्रियाशब्दस्य करणिकातरेषु संयोगे वैकल्प्याश्रयः क्वाप्रत्ययः॥ तत्र यदि तच्छब्दवच्छास्त्रमतिदिश्यते न तदा तस्य यच्छास्त्र
मितिपक्षः॥ अथ ऋकार एव तच्छब्देन विवक्षितेः चकारः स्वरार्थः तकारस्तु मुखसुखार्थः कानिरत्यर्थः ऋज्वदित्युच्यमाने प्रसिद्धिरतिदेशः संभाव्येत॰ ऋच्छ इति निबन्धनस
मासान्तशास्त्रातिदेशविषयः संदेहो वा स्यात् तस्मात् ऋकारमात्रप्रतिबद्धशास्त्रातिदेशे॰ नाहत्येलेवपक्षः उद्भवति॰ अनङ्गुणरपरत्वानीति॰ ऋदुशनस्पुरुदंसोने
हसां चेत्यनङ् ऋतो ङिसर्वनामस्थानयोरिति गुणः॰ उरण्रपर इति रपरत्वं॰ दीर्घत्वमनतिदिष्टमिति॰ न हि तत्र तद्विधायिनं लक्ष्यते किं तर्हि ऋकारमात्रं जितत्वच्छब्देनोच्चारणेन
नचायं यवसमुदाययोर्युगपद्विवक्षायां तस्य प्रतिबद्धं ऋकारप्रतिबद्धं च शास्त्रमतिदिश्येत॰ नचाकृतेऽचिति॰ अचो दीर्घ एतान्याङ्गानि च क्रोष्टुशब्दस्योकारान्तस्याजुपधा

एवं तर्ह्ययमन्यो दोषो जायते आहसत्वचोयच्छास्त्रं तदतिदिश्यते॰ नाहसवेति॰ किंचातः॥ यथाहस दीर्घत्वमतिदिष्टमनङ्गुणरपरता
न्यनतिदिष्टानि॰ अथा नाहस अनङ्गुणरपरत्वान्यतिदिष्टानि दीर्घत्वमनतिदिष्टं॰ अस्तु आहस॰ ननु चोक्तं दीर्घत्वमनतिदिष्टमनङ्गु
णरपरत्वान्यनतिदिष्टानीति॰ नैष दोषः॥ दीर्घत्वे ऽतिदिष्टे ऽनङ्गुणरपरत्वान्यप्यतिदिष्टानि भवन्ति॰ कथं॰ उपधाया इति वर्तते॰ न चाकृते
ष्वेतेषु दीर्घत्वभाविन्युपधा भवति॰ कुतो नु खल्वेतदेतेषु विधिषु कृतेषु या उपधा तस्या दीर्घत्वं भविष्यति न पुनः क्रोष्टुर्योऽन्तरतमो गु
णस्तस्मिन्कृते ऽवादेशे च या उपधा तस्या दीर्घत्वं भविष्यति॰ नैकमुदाहरणं योगारम्भं प्रयोजयति॰ तत्र तज्वद्वचनसामर्थ्यादे
तेषु विधिषु कृतेषु या उपधा तस्या दीर्घत्वं भविष्यति॥ ॥७॥

संभवति॰ नच क्रोष्टे सत्यानङि कृते ऽजुपधा भवति क्रोष्टारावित्यादौ तु गुणरपरत्व
योः कृतयोः॥ न पुनरिति॰ क्रोष्टुशब्दस्य जसि चेलुकारस्य गुणे ऽस्त्ये वृत्तस्यावादेशे कृते ऽकारस्य दीर्घः स्यात् ततश्च क्रोष्टाव इति स्यात्॰ नैकमिति॰ अन्यथा दीर्घविधावेव क्रोष्टु
शब्दं निर्दिशेत् ननु दीर्घविधौ क्रोष्टुशब्दे उपादीयमाने स्त्रियां च विभाषा तृतीयादिष्वचीत्येवमर्थं तृज्वत्क्रोष्टुरिति वक्तव्यमिति गौरवं स्यात्॰ नैष दोषः॥ अचिर ऋत इति रादे
शे प्रकृते क्रोष्टुः स्त्रियां च विभाषा तृतीयादिष्वचीत्येवं रादेशविधानात् गौरवाभावात्॰ ननु रादेशे क्रोष्टुः क्रोष्ट्रीति न सिध्यति नाप्युदात्तयणो हल्पूर्वादिति स्वरः॥ एवं तर्हि
दिः क्रोष्टुग्रहणं योगविभागात् लघु तद्युक्तं अक्षराधिक्यादपि योगविभागो गरीयानिति॰ तदेवं तृज्वद्भावविधानसामर्थ्यात् अदर्शनात् उपधाया दर्शनान्यनिमित्तायाः दर्शना
एवं तादर्शनान्यनिमित्तायाः क्रोष्टुशब्दस्योपधाया दीर्घो भवति सनङ्गुणरपरत्वेषु कृतेषु दीर्घो

=नापीति॰ क्रोष्टे सति॰ तुकं तेनाप्युपलालात् [illegible] २८ दिः क्रोष्टुग्रहणमिति॰ दीर्घविधावेव क्रोष्टुग्रहणमपरं तु [illegible] क्रोष्टुः स्त्रियां विभाषा तृतीयादिष्वचीति॰ अत्र चानात् [illegible] अभ्यस्यासंभवादिति क्रोष्ट्री क्रोष्टुः क्रोष्ट्री सादेः [illegible] नचान्यथेतन्न [illegible] स्त्रियां चेति च

शिवः
२६

(कण्वित)

अस्मिन्पक्षे पूर्वोक्तगौरवप्रसंगादस्तमाध्व सम्य दिहारं तस्माह॥ अथवेति॥ तज्वदितिसमुदायएवाश्रीयतेनत्रमालिन्यायाश्रयाद्य किंचित्तचोदयं शास्त्रं तत्सर्वमतिदि
श्यते॥ एवंच ऋमोलक्ष्यंलक्षणंचानु गृहीतंभवति॥ नन्वंगप्रकरणेपाठ एवशास्त्रे निर्दिश्यमाने कोष्ट्री तियणादेशशास्त्रस्यानंगत्वादतिदेशेन स्यात्॥ एवं तर्हि
स्त्रियामंगशास्त्रातिदेशासंभवादनंगस्याप्यतिदेशः विभावात्तृतीयादिषचीसचतर्हि क्रोष्ट्रीसचगुणविधावतिदेशस्य चरितार्थत्वा क्रोष्ट्रा क्रोष्ट्रेरिति
यणादेशप्रसंगः॥ क्रोष्टुरित्यत्र ऋतउदितिशास्त्रेन प्रवर्त्तेत तत्रापितृतीयादिष्विरुण सामर्थ्यादनंगस्या प्यतिदेशोन्यथा विभावाभावे विसेषत्वाभावात्॥ स्यादे
त॥ अभावातिदेशार्थं तृतीयादिग्रहणं स्यान्न तस्यघिलक्षणेगुणेनाभावोनस्मात्तां क्रोष्टवे क्रोष्टुनेति॥ नचवक्रधीनेवाकारणेभावातिदेश एवाश्रयणीयः॥ एवं
तर्हि क्रोष्ट्रीति स्त्रियामीकारेणनप्राप्नोति॥ अ नंगमपीकारणस्यम तिदेशसामर्थ्यादतिदेशस्तद्दसेपोप्यदोषः॥ अपवोनरमोयोगमोरांरंगसाम
र्थ्याद्रूपातिदेशएवाश्रीयते पूर्वस्त्वेतुपक्षभेद विचारः॥ अथवेति॥ सूत्रत्रयेएकाकारमद्दनिर्भवतिसर्वरूपसंग्रहस्थैतिभावः॥ भागादेशेभ्य इति॥ क्रोष्टृ इसेतद्दकारां

तदीर्घत्व
अथवा किन्न एतेन आहसाना हत्येवेति आहसानाहत्यप्रवृत्तचोयच्छास्त्रंतदतिदिश्यते॥ अथवापुनरस्तुरूपातिदेशः॥ अथैतस्मिन्रूपा
तिदेशेसति भागादेशेभ्योयद्रूपंतदतिदिश्यते आहोस्वित्कृतेषादेशेषु किंचातः॥ यदि भागादेशेभ्योयद्रूपंतदतिदिश्यते ऋकारेए
कोतिदिष्टः अनङ्गुणरपरत्वान्यनतिदिष्टानि॥ अथकृतेषादेशेषु ऋकारे नतिदिष्टः अनङ्गुण रपरत्वदीर्घत्वान्यतिदिष्टानि॥

तं॥ कृतेष्विति॥ कोष्टारावितिरेफांतं॥ तत्रभागा देशे भ्योयद्रूपंतल्लक्ष्यंतज्वदित्युच्चारणत्वापकंलघुच॥ तस्मिन्नतिदिष्टेन किंमिनानामनङादीनांसर्वेषांस्वशास्त्रेणप्र
वर्त्तनात्॥ कृतेषुचादेशेषुयद्रूपंलौकिकंतत्तथानंतदर्थलौदितरस्यप्रक्रियालाघवंभवतीतिपक्षद्वयसंभवः॥ ऋकारएकइति॥ तदतिदेशसामर्थ्याच्चकार्यांतरणमप्र
संगः॥ स्यादितिमन्यते॥ ऋकारेणतिदिष्टइति॥ किंपुनः ऋकारातिदेशस्यप्रयोजनंप्रयोगसमवायिरूपातिदेशेनगतत्वात्॥ अचकेचिदाहुः॥ यत्र ऋकारस्यविकारा आ
वःपंचक्रोष्टृनीरथैरितितत्रऋकारेणतिदिष्टः स्यादितितदयुक्तं॥ नहीदंवचनंकृतेष्वादेशेष्विति लौकिकरूपोपलक्षणंत्वेनयथाचक्कचित्कृतेषादेशेषु लौकिकंरू
पंतथाक्वचित्कृतेषु इतिनास्तिविशेषः॥ अत्रोच्यते॥ यदि ऋकारमनतिदिश्यकृतेषादेशेषुयद्रूपंतदतिदिश्यते तदा क्रोष्टृसाधावुदात्तयणोहल्पूर्वादितिस्वरेणस्यात्
उदात्तयणोभावात्सतिऋकारातिदेशे तस्यानिकस्ययणउदात्तत्वात्स्वरः सिध्यति॥ ननुस्वरदोषमनंतरमेववक्ष्यतितत्किमर्थमत्राभिधीयते॥ अनेकतरपक्षाश्रयणेस्वर

=असाधारणधर्मः।१=

=पृथिव्यादिरन्तिनीलादिवत्·१=तस्मात्केऽउच्चारणाभावाद्रेफवत्समेवमनुमीयमानस्यापिभेदकमितिभावः।४=

पस्पाविरू१

नहिस्वरोरूपवानिति·ननुशब्दस्यश्रोत्रेंद्रियग्राह्यस्वभावोरूपंस्वरोपिश्रोत्रेंद्रियग्राह्यस्तद्रूपमेवाधास्यमतिरिक्तंरूपंनास्तीतिनहिस्वरोरूपवानित्युच्यतेतदातद्रूपंनास्तीतित
दपिनरूपवदितिनातिदिश्येत·रूपातिदेशश्चप्रक्रांतोनरूपवदतिदेशः।अत्रोच्यते·प्रागादेशेश्रोय ▬ रूपमित्यत्रतावल्लक्षेस्वरोशक्योतिदेष्टुंनहिरूपंशब्दनीयं
नचस्वरोरूपत्वेनाश्रितःशास्त्रेएकुल्लचाविसेतस्मिन्नुच्चारणेस्वरस्यभेदहेतुत्वेनाश्रयणात्लुङ्लङ्लृङ्क्ष्वडुदात्तइत्युदात्तादिग्रहणात्·यापिचितोंतउदात्तइतिस्व
रप्रतिपत्तिरसावप्यनुमानात्तदुच्चारणात्·कृतेप्यादेशेपिसत्रतुपक्षेपयमुच्चारणेउदात्तादिगुणनाममभेदकत्वंज्ञापितंतथापियथांतरतम्यात्स्वरआश्रीयमा

अन्यथाचस्वरोनातिदिष्टः।किंकारणं·नहिस्वरोरूपवान्·अस्तुप्रागादेशेश्रोयरूपंनदतिदिश्यते·ननुचोक्तंमकारएकोतिदिष्टोन
गुणरपरत्वदीर्घत्वान्यनतिदिष्टानीति·नैषदोषः।ऋकारेतिदिष्टेस्वाश्रयाअत्रविधयोभविष्यंति·यदप्युच्यते·अन्यथास्वरेनाति
ष्टःनहिस्वरोरूपवानिति·सचकारग्रहणसामर्थ्यात्स्वरोभविष्यति·रूपातिदेशइतिचेत्सर्वादेशप्रसंगः।रूपातिदेशइतिचेत्सर्वा
▬देशःप्राप्नोति·सर्वस्यतुन्नंतस्यतशइआदेशःप्राप्नोति·सिद्धंतुरूपातिदेशात्·सिद्धमेतत्·कथंरूपातिदेशात्·
रूपातिदेशोयं·ननुचएवमेवकृत्वाचोद्यतेरूपातिदेशइतिचेत्सर्वादेशप्रसंगइति·सिद्धंतुप्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदंत
स्यग्रहणंभवतीति·एवंतुन्नंतस्यतजंतआदेशोभविष्यति·एवमपिकिंचिदेवतजंतंप्राप्नोतिइदमपिप्राप्नोतिपक्केति·

णोभेदकस्तथातिदेशादपिकिंतूदात्तयणमपदेशाभावात्स्वरसिद्धिः।यद्येवंरूपवानितिकिमुच्यतेरूपमितिहिवक्तव्यं·तत्रकेचिदाहुः।भाष्यकारवचनात्स्वार्थिकोमतुप्·अथवास्व
रवानेवस्वरः·अर्षआदित्वादच्·नहिस्वरवानकारउदात्तादिनारूपेणरूपवान्शास्त्रेआश्रीयतेतस्याभेदकत्वात्·ऋकारेतिदिष्टइति·तदर्थत्वाहकारातिदेशस्येतिभा
वः।स्वाश्रयाइति·स्वंनिमित्तंशास्त्रंवाआश्रयोयेषामितिसमासः।सचकारेति·अन्यथात्वदिस्येवऋपात्·नचतत्तज्ज्ञस्यामन्योर्थवान्तशब्दोलियस्यग्रहणेदोषः
स्यात्·तस्मादनुमेयोपिस्वरउच्चारत्वेनाश्रीयमाणोपिचकारोच्चारणसामर्थ्याद्भवति·सर्वादेशप्रसंगइति·रूपातिदेशशब्दात्स्यान्यादेशभावो ▬ भ्युपगतोभवती
स्यनेकाल्त्वात्सर्वादेशस्तशइःप्राप्नोति·सिद्धमिति·तजंतरूपातिदेशात्।।

=नेदकइति·तेनकोष्ठेसादौस्वरसिद्धिरितिभावः।कोष्ठुसादौनुतदृतिद्धरितिभावः।४=

आंतरतम्यादिति· अर्थेन रूपेण चेत्सर्वः। तज्जिविषय इति· तज्ज्ञाव विषय इत्यर्थः। घरतिरिति· घसेश्चनेइतिभौवादिकः॥ जिघत्सी सेनत्तु घर्स्त्रणादीसोदित्स्य ब
फुलं छंदसीत्यभ्यासस्य त्वेकेनेरूपं· रशिलुशीअपहिता [illegible] अपिआप्यकारवचनात्तत्बोद्ध्यौ· प्रयुक्तानामिदमन्वाख्यानं न तस्मादपूर्वशब्दप्रतिपत्तिरि
तिनियतविषयत्वमुच्यते· अनेनैव न्यायेनास्तेर्भूरित्यादीन्यपिप्रसारव्येयानि· अबुधबोधनार्थं तु किंचिद्वचनेन प्रतिपाद्यते न्यायव्युत्पादनार्थं च· आचार्यः

आंतरतम्याञ्च सिद्धं· क्रोष्टुर्यदंतरतमं तद्वचनाद्भविष्यति· किंपुनस्तत्· क्रुशेर्यस्तृज्विहितस्तदंतं· तज्वचनमनर्थकं तज्विषये तवोग्ग्रगवाचि
त्वात्· तज्विषये एतत्स्यात्· तं ग्रगवाचि· तुनो निवृत्त्यर्थं तर्हीदं वक्तव्यं· तुनः सर्वनामस्थाने निवृत्तिर्यथा स्यात्· तुनो निवृत्त्यर्थमिति चेत्त सिद्धं यथान्य
त्रापि तुनो निवृत्त्यर्थमिति चेत्त दंतरेणापि वचनात्सिद्धं· यथान्यत्राप्युविशेषा विहिताः शब्दा नियतविषया दृश्यंते· क्वान्यत्र· तद्यथा· घरति
रस्मायविशेषेणोपदिष्टः स घस्तं प्रणाघर्म इत्येवं विषयः। रशिरस्माय विशेषेणोपदिष्टः स राशिः रश्मिः रशना इत्येवं विषयः। लुशिरस्माय
विशेषेणोपदिष्टः स लोष्ट इत्येवं विषयः। इदं तर्हि प्रयोजनं विभाषां वक्ष्यामीति· विभाषा तृतीयादिष्वचीति· वा वचनानर्थकं च स्वभावसिद्ध
त्वात्· वा वचनमनर्थकं· किं कारणं· स्वभावसिद्धत्वात्· स्वभावत एव तृतीयादिषु त्वजं तं तुजंतं च ग्गगवाचीति· गुणवृद्ध्योस्तु तज्भावे [illegible]
भ्यो नुम्पूर्वविप्रतिषिद्धं· गुणवृद्ध्योस्तु तज्भावेभ्यो नुम्भवति पूर्वविप्रतिषेधेन· तत्र गुणस्यावकाशः। अग्नये वायवे· तुमोवकाशः· त्रपुणी जतुनी
इत्येनयं प्राप्नोतिं त्रपुणे जतुने· वृद्धेरवकाशः सखायो सखायः नुमः स एव· इहोभयं प्राप्नोति· अतिसखीनि ब्राह्मणकुलानि वकाशः अग्नौ वायौ· नु
मः स एव इहोभयं प्राप्नोति· त्रपुणि जतुनीति· तज्भावस्यावकाशः· क्रोष्टा क्रोष्टुना· नुमः स एव इहोभयं प्राप्नोति· कृशक्रोष्टुने अरण्या
य· हितक्रोष्टुने वृषलकुलाय· नुम्भवति पूर्वविप्रतिषेधेन· स तर्हि पूर्वविप्रतिषेधो वक्तव्यो न वक्तव्यः। इष्टवाचीपरशब्दः विप्रतिषेप
रं यदिष्टं तद्भवतीति॥ ॥९१॥ घसादि

×औत्स्या×२

किंत्वेतत्समासाच्येन गृह्यते· कः पंथाः समाश्रीयते· अतिसखीनीति· अतिक्रांतः सखायमिति बहुव्रीहिः। कृशक्रोष्टुने इति· क्रोष्टुशब्दः स्त्रीपुंसलिंग इत्यन्यपदार्थस्य नपुंसकत्वम्

ना·के·

२८

क्रोष्टूनामिति·तृज्वद्भावः कस्तेनुघनजादित्वान्नप्राप्नोतीत्यनित्यः नुडागमोपिकृतेतृज्वद्भावेसन्निपातपरिभाषयानप्राप्नोतीत्यनित्यः॥ नवेति·नुड्रूपयोर्विप्रतिषेधउक्तः सने
सर्वः॥ समर्थैवेति·मध्येपवादाइत्येतदनाश्रित्यैतदुक्तंतत्रसाश्रीयमाणेगुणंनबाधेत·गुणपूर्वसवर्णयत्वणमुपलक्षणंऋतउदित्यस्यापिबाधनात्प्रियतिस्त
ःअग्निसादेः·यस्यामिति·नहिराद्देशेदीर्घस्यप्राप्तिरनजंतत्वान्नुडभावाच्च·एवंचविप्रतिषेधोपिनवक्तव्योज्ञापकादेवनुडभावात्॥ ॥चतुरनडुहोरामुदात्तः॥

नुमचिरतृज्वद्भावेभ्योनुट्पूर्वविप्रतिषेधेन·रवक्तव्यः॥नुमोवकाशः॥त्रपूणिजतूनि·नुटोवकाशः॥अग्नीनांवायूनां·इहोभयंप्राप्नोति·त्रपू
णांजतूनां·अचिरादेशस्यावकाशः॥तिस्रस्तिष्ठंति चतस्रस्तिष्ठंति·नुटः सएव·इहोभयंप्राप्नोति·तिसृणांचतसृणां·तृज्वद्भावस्या
वकाशः·क्रोष्टाक्रोष्टुना·नुटः सएव·इहोभयंप्राप्नोति·क्रोष्टूनां·नुड्भवतिपूर्वविप्रतिषेधेन·सतर्हिपूर्वविप्रतिषेधोवक्तव्योनवक्त
व्यः॥नवानुड्विषयेरप्रतिषेधात्·नवैतद्विप्रतिषेधेनापिसिध्यतितिसृणांचतसृणामिति·कथंतर्हिसिध्यति·नुड्विषयेरप्रतिषेधोव
क्तव्यः॥इतरथाहिसर्वापवादोरादेशःसपर्थैवगुणपूर्वसवर्णौबाधतएवंनुटमपिबाधेत·तस्मान्नुड्विषयेरप्रतिषेधः॥तस्मान्नुड्विषयेरादे
शस्यप्रतिषेधोवक्तव्यः·नवक्तव्यः॥आचार्यप्रवृत्तिर्ज्ञापयतिनरादेशोनुटंबाधतइति·यदयंनतिसृचतसृइतिनामिदीर्घत्वस्यप्रतिषेधं
शास्ति॥ ॥चतुरनडुहोरामुदात्तः॥ ॥आमनडुहःस्त्रियांवा·आमनडुहःस्त्रियांवेतिवक्तव्यं·अनडुही अनड्वाही॥ ॥ऋतइद्धातोः॥ उपधाया
श्च॥उदोष्ठ्यपूर्वस्य॥ ॥इत्वोत्वाभ्यांगुणवृद्धीभवतोविप्रतिषेधेन·इत्वोत्वयोरवकाशः॥आस्तीर्णंनिपूर्ताःपिंडाः॥गुणवृद्ध्योरवकाशःच
यनंचायकः·लवनंलावकः·इहोभयंप्राप्नोति·आस्तरणमास्तारकः·निपरणंनिपारकः॥गुणवृद्धीभवतोविप्रतिषेधेन·अयुक्तोयंविप्रतिषे

गौरादिष्वनडुहीअनड्वाहीतिपाठोऽपौराणिकः॥अनडुहःशब्दस्यङीषर्थएवपठितइतिवार्त्तिक धः·योयंगुणस्येत्वोत्वयोश्च·कथं·नित्योगुणः॥ ॥इतिसप्तमाध्या
मारब्धमामनडुहःस्त्रियांवेति॥ ॥ऋतइद्धातोः॥ ॥नित्योगुणइति·कृताकृतप्रसंगित्वात्·लक्षणांतरेणप्राप्नुवन्विधिरनित्यइत्यनाश्रित्यकार्यमात्रप्राप्तिमं
गीकृत्येदमुक्तं·लक्षणभेदापेक्षायांतुलक्षणांतरप्रवृत्तावपिप्रतिषेधविषयस्यलक्षणस्याप्रवृत्ताअनित्यमेव॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृतेमहाभाष्यप्र

वि· स·

शिवः

२८

सिचि वृद्धिः परस्मैपदेषु॥ ॥सिचि वृद्धाविति। इह निर्दिष्टस्यानिकतादिकस्य रिभाषोपस्थानादोकारस्य नाप्तिप्राप्तिः वदव्रजेत्यत्र हलश्च इति स्थानिनिर्देशग्रहणपरिभाषानुपस्थाना
दोकारस्य वृद्धिप्रसंगे वचनं। तत्र सिचि वृद्धाविस्यनेन प्रकरणं प्रदर्श्यते। अथवा सिचियावृद्धिर्वदव्रजेत्यनेनतस्यामिसर्थः। ननु च वृद्धेरेकनयायां पूर्वत्रासिद्धमिति सिज्लो
पादीनामसिद्धत्वात्सर्वं वृध्याभावंततः सिज्लोपेनततोऽलधलधुलढलोपेषु कृतेषु वालेनेति वृद्धिविधानकाले ओकारस्याभावान्नार्थः प्रतिषेधेन। उच्यते। वृद्धि
रंगापेक्षता त्यय विशेषापेक्षताच्च बहिरंगा सिज्लोपादयस्तु वर्णनिमित्तता दंतरंगा इत्यसिद्धं बहिरंगमंतरंग इति वृद्धेरसिद्धत्वात् पूर्वत्रेति निर्दिष्टस्यासि
द्धविषयस्याभावात्सलोपादीनामसिद्धत्वं नास्ति। पूर्वत्रासिद्धमित्यनेन सलोपादीनामसिद्धता दंतरंगलक्षणस्य विषयस्याभावान्न दपेक्षबहिरंगत्वस्यापि बहिरं

सिचि वृद्धिः परस्मैपदेषु॥ ॥सिचि वृद्धावोकारप्रतिषेधः। सिचि वृद्धावोकारस्य प्रतिषेधो वक्तव्यः। उदवोढां उदवोढं उदवोढ
ति। स तर्हि प्रतिषेधो वक्तव्यो न वक्तव्यः। ओकाराद्वृद्धिर्विप्रतिषेधेन। ओत्वं क्रियतां वृद्धिरिति वृद्धेर्विष्यति विप्रतिषेधेन। वृद्धि
र्विप्रतिषेधेनेति चेदोत्वाभावः। ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्वस्याभावः। उदवोढामुदवोढमुदवोढेति। नैष दोषः। उक्तं तत्र
वर्णग्रहणस्य प्रयोजनं वृद्धावपि कृतायामोत्वं यथा स्यात्। पुनः प्रसंगविज्ञानाद्वा सिद्धं। अथवा पुनः प्रसंगादत्र वृद्धौ कृतायामो
त्वं भविष्यति। यथा प्रसारणादिषु द्विर्वचनं। तद्यथा। जग्लेमम्लेईजतुरीजुरिति प्रसारणादिषु कृतेषु पुनः प्रसंगविज्ञानाद्द्विर्व
चनं भवति। इहापि तर्हि पुनः प्रसंगविज्ञानादोत्वं स्यात्। सोढामित्रिरिति। = विप्रकारान्यानुसर्पण एकलान्त: ४= ॥ ॥[illegible]

गस्याभावात् असिद्धं बहिरंगमंतरंग इ[illegible] त्येषा परिभाषा न प्रवर्त्तते। तदेवं परस्परप्रतिबंधस्य परिभाषाद्वयस्याप्रवृत्तेरोपरत्वात्सलोपादीन्कृत्वांतरंगत्वात्पूर्वं
मोत्वप्रवृत्तिमभ्युपगम्य चोदयति। वदव्रजेत्यत्र चा[illegible]तरेणं तद्ग्रहणं तदंतविधौ सिद्धे तद्ग्रहणं ओपदेशिकग्रहणं तत्प्रतिपत्त्यर्थमन्यथा प्रत्ययलक्षणेन च सिच्यरत्वे
ओकारादिति। न चांतरंग ओकारो बहुपेक्षत्वात्। उक्तं तत्रेति। ओदस्ये मुच्यमानेतादपि पर[illegible]त्परइत्प्रकारे तपरत्वा[illegible]कालस्यग्रहणं तस्यादिति तस्यापि
ग्रहणार्थं वर्णग्रहणं कृतमिति तत्सामर्थ्यात्कृतायामपि वृद्धावोत्वं प्रवर्त्तते प्रवृत्तत्वाच्च लक्षणस्य पुनर्वृद्धेः प्रवृत्तिर्न भवति। सोढामित्रिति। सोढा अभिप्रायेणेति बहुव्रीहिः
=नन्व सिद्धत्वा प्रवृत्तौ इदानीं हलं तत्त्वाभावात्क थं वृद्धिप्राप्तिरिसत आह। वदव्रजेति। २= सा २

ओकारा

[illegible]

अस्मात्रेफलकारावितिमूलाबलंति इत्येव पाठ इति विवरणं

वहिरंगलक्षणत्वादिति· यत्र विप्रतिषेधस्तत्र पुनःप्रसंगविज्ञानं इहतु वृद्धिनिमित्तेनुपजात एवांतरंगमोत्वं प्रवर्त्तते ततोर्थांतराश्रयतच्छिन्ननिमित्ता वृद्धिः॥ ॥अतोल्वां
तस्य॥ ॥अंतग्रहणमिति· अवयववचनोंतशब्दस्तदंतविधिनैव च तदर्थो लब्ध इति मत्वा प्रश्नः॥ तद्यः सामीप्य इति· अंतशब्दोपादानादेव सामीप्यार्थस्य ग्रहणं· अंगा
तादिति· रेफ्लवलकारव्यत्वं ततः षष्ठ्याः सुपां सुलुगिति लुक्· तत्र ल्वे लांग ▪ स्य विशेषणात्तदंतविधौ ल्वांतस्यांगस्य यो कारस्तस्य वृद्धिर्भवति ततोंतस्येसकारो विशे

सोढमिथो। बहिरंगलक्षणत्वात्सिद्धं· बहिरंगा वृद्धिरंतरंगमोत्वं· असिद्धं बहिरंगमंतरंगे॥ ॥अतोल्वांतस्य·॥ ॥अंतग्रहणं किमर्थं
नल्व इत्येवोच्येत· केनेदानीं तदंतस्य भविष्यति· तदंतविधिना· इदं तर्हि प्रयोजनमयमंतशब्दोस्त्येवावयववाची· तद्यथा वस्त्रांतो वस
नांतः। अस्ति सामीप्ये वर्त्तते· तद्यथा· उदकांतं गतः· उदकसमीपं गत इति गम्यते· तद्यः सामीप्ये वर्त्तते तस्येदं ग्रहणं· यथा विज्ञायेत अं
गांतौ यौ रेफलकारौ तयोः समीपे यो ऽकारस्तस्य यथा स्यात्· इह मा भूत्· अम्वक्षीत्· अवभीत्॥ ॥वदव्रजहलंतस्याचः॥ ॥हल्ग्र
हणं किमर्थं समुच्चयो यथा विज्ञायेत वदिव्रजोर्हलंतस्य चाच इति· नैतदस्ति प्रयोजनं· अज्ग्रहणादेवात्र समुच्चयो भविष्यति· वदि
व्रज्योश्च अचश्चेति· अस्त्यन्यदज्ग्रहणे प्रयोजनं· वदिव्रजि विशेषणं यथा विज्ञायेत· वदिव्रजोरच इति· यद्येतावत्प्रयोजनं स्यात्
वदिव्रज्योरत इत्येव ब्रूयात्· अथवैतदपि न ब्रूयात्· अत इति वर्त्तते· इदं तर्हि प्रयोजनं हलंतस्य यथा स्यादजंतस्य मा भूत्· कस्य पुन
रजंतस्य प्राप्नोति अकारस्य· अचिकीर्षीत् अजिहीर्षीदिति·॥ ॥

ष्यते सन्निधानाद्वल्लापेक्षं सामीप्यमकारस्य विज्ञायत इति सामर्थ्यादंगांतरेफल
कारसमीपस्याकारस्य वृद्धिरित्यर्थः संपद्यते· अम्वक्षीदवभीदिति· अत्रांगांत्ययो रेफलकारयोः समीपे ऽकारो सेनेन वृद्धिर्न भवति· हलंतलक्षणेनेटीति प्रतिषे
धः॥ ॥वदव्रज॥ ॥हल्ग्रहणं किमर्थमिति· अज्ग्रहणादेव हलंतस्य सिद्धा वृद्धिरिति प्रश्नः॥ अंगेन चाचो विशेषणं यत्र तत्र स्थितस्याचो वृद्धिर्विधीयमाना हलंत
स्य प्रवर्त्तते· अजंतस्य मा भूदिति· असति हल्ग्रहणे अचांगस्य तदंतवि धिर्विज्ञायेत ततश्चाल्लोपादीन्बाधित्वा वृद्धिः स्यात्॥ ॥छ॥ ॥छ॥

=नतस्यौकारादिर्वृद्धिः स्यात्॥२॥=सर्वथा॥प्रसङ्गाभावे गोपदेशोनतु विशेषाभावेपीतिभावः॥२॥=अंगेनाचो विशेषणादितिभावः॥४॥=

लोपोत्रेति॥ विशेषणविशेष्यभावे कामचारादंगेनाज्विशेष्यते॥ तत्राप्याक्षीदित्यादौ सावकाशा वृद्धिरतो लोपेन पूर्वविप्रतिषेधेन बाध्यते एव लोपाविषयः पणुणाद्वृद्धिर्दीर्घभ्यृ इति
अचातंगे विशेष्यमाणे वृद्धिरनवकाशा लोपं बाधेत॥ आकारस्य तर्हीति॥ स्थानेन्तरतमपरिभाषया अत्राप्रवृत्तिं मन्यते तत्प्रवृत्तौ हि प्रधानं वृद्धिविधानं विफलं तादुपरुध्ये
त॥ नास्त्यत्र विशेष इति॥ विशिष्टविषयव्यवस्थापनं प्रधानस्य गुणेन कर्त्तव्यमिति प्रसङ्गप्रसङ्गे सोर्वृद्धे विशेषाभावेपि नास्ति प्रधानोपरोध इति प्रवर्त्तत एवान्तरत
मपरिभाषेतिभावः॥ संध्यक्षरस्येति॥ ओकार ओकारस्य प्राप्नोतीत्यस्ति विशेषः॥ तस्यासिद्धत्वान्नैतदस्तीति॥ ननु मा भूदसमानं सस्थाप्य विशेषविधानात्सा

लोपोत्र बाधकोभविष्यति॥ आकारस्य तर्हि प्राप्नोति अयासीदवासीत्॥ नास्त्यत्र विशेषः ससांवा हृत्वा वससांवा॥ संध्यक्षरस्य तर्हि प्राप्नो
ति॥ नैव संध्यक्षरमं समस्ति॥ ननु चेदमस्ति ठलोपे कृते उदवोढामुदवोढमुदवोढेति॥ असिद्धो ठलोपस्तस्यासिद्धत्वान्नैतदस्ति संभव
ति॥ अत उत्तरं पठति॥ हल्ग्रहणमिटि प्रतिषेधार्थं॥ हल्ग्रहणं क्रियते इटि प्रतिषेधार्थं नेटीति प्रतिषेधार्थं॥ नेटीति प्रतिषेधं वक्ष्यति
स हलंतस्य यथा स्यादजंतस्य मा भूत्॥ अलावीदयावीत्॥ नवानन्तरप्रतिषेधात्॥ न वैतत्प्रयोजनमस्ति किं कारणं अनन्तरप्रति
षेधात्॥ अनन्तरस्य वृद्धिविधानं तत्प्रतिषिध्यते॥ कुत एतत्॥ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति॥ तत्रानन्तरार्थं॥ तत्रानन्तरं वृ
द्धिविधानमनन्तरार्थं विज्ञायते॥ कथं पुनर्ज्ञायते नंतरं वृद्धिविधानमनन्तरार्थमिति॥ अंतस्य वचनानर्थक्यात्॥ अंतस्य वृद्धिविधाने प्रयोजनं

भोति॥ एवं तर्हि पराभ्युपगमनिवृत्तिपरमेतत्॥ परेण संध्यक्षरस्यांसत्वमभ्युपगतं निवार्यते अनन्तरत्वेवोकारस्य वृद्धिर्न भवति तथा च सूत्रे प्रतिपादितं॥ ह
ल्ग्रहणमिति॥ असतीह हल्ग्रहणे नेटीत्यत्राज्ग्रहणानुवृत्तावपि याकाचिदचो वृद्धिः प्रतिषिध्येत॥ यदि त्वज्ग्रहणानुवृत्तिसामर्थ्यादचइत्येवं विहिताया
वृद्धेस्तस्याः प्रतिषेधो विज्ञायेत तदानस्याद्दोषः॥ परिहारांतरसंभवात्तु नेदमुक्तं तदाह॥ नवेति॥ अंतस्य वचनानर्थक्यादिति॥ क्वचिदंतो विधि
भाङ्न संभवति॥ अयासीदित्यादौ तु विशेषाभावः॥ ॥७॥

=नक्षेलसंज्ञास्येनित्यायात्॥३॥=

[illegible]

[illegible]

=सिद्धिवृद्धिरित्यनेन॥१॥=इअदो नित्यंगस्य वृद्धेर्नेत्येव सिद्धेः॥२॥=

दकारादी १ अथवा १

तदेवमिहार्थो हल्ग्रहणस्य नास्तीति मतान्तरं॰ अतो विनापार्थमिति॰ असति हल्ग्रहणे अकर्णीं दिलादेशावकाशः वृद्धिरचिकीर्षी दिलादेशे परत्वाल्लोपं बाधेत॰ अतो ग्
स्य विशेषणान्तरं स्यैव स्यात्तत्र नरकार्णीदिलादेशे॰ कृतायामपीति॰ अतो लोप इति चेत्सनेनेति भावः॥ अत्र शब्दांतरप्राप्तिर्लक्षणांतरप्राप्तिश्च नाश्रिता कृ
ताकृतप्रसंगितात्तु लोपाख्यस्य कार्यस्यानाश्रितोपाधिनेदस्य नित्यत्वमाश्रितं॰ परत्वादिति॰ यस्य लक्षणांतरेणनिमित्तं विहन्यते न तदनित्यमिति ना

अतो विनापार्थं तर्हीदं वक्तव्यं। अतो हलादेर्लघोरिति विभाषा वृद्धिं वक्ष्यति सा हलंतस्य यथा स्यात्। अजंतस्य माभूदिति। अचि
कीर्षीत्। अजिहीर्षीत् इति॰ अतो विनापार्थमिति चेन्न सिद्धं वृद्धेर्लोपबलीयस्त्वात्। अतो विनापार्थमिति चेन्न इतरेणापि हल्ग्र
हणं सिद्धं। कथं वृद्धेर्लोपबलीयस्त्वात्॰ वृद्धेर्लोपो बलीयान्भवतीति॰ इदमिह संप्रधार्यं॰ वृद्धिः क्रियतां लोप इति॰ किमत्र कर्तव्यं
परत्वाद्वृद्धिः। नित्यो लोपः। कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि। अनित्यो लोपः। नहि कृतायां वृद्धौ प्राप्नोति॰ परत्वात्सगि
ड्भाविनव्यम्। नात्र सगिटौ प्राप्नुतः॥ किं कारणं एकाचस्तो वलीति वा॰ एकाचः सगिटावुच्येते। अथ वा वलीति नानुवर्तते॥ किं
पुनः कारणमेकाच इत्यो वलीति वा। इट्टि प्रातर्मा भूदिति। दरिद्रितेर्न सगिड्भाविनव्यम्। उक्तमेतत्। दरिद्रातेरार्द्धधातुके लो
पः सिद्धश्च प्रत्ययविधाविति। यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धो सौ सगिड्विधौ॰ एवमर्थमेव तर्हीदं ग्रहणमनुवर्त्यं स
गिटौ मा भूतामिति॰ स एष नित्यो लोपः। वृद्धिं बाधिष्यते॰

=अतएव दरिद्रातीति दरिद्रुदत्याइंतलक्षणेनण॥ किंतजेवः १=   =सिद्धो साविति॰ नयोः प्रत्ययोलसनंतरजाविलादिनिभावः॥ २=

श्रितं॰ लोपेनात्र वृद्धौ कृतायां न भाव्यमिति तस्या नित्यत्वमित्येवता वदाश्रित्योच्यते वृद्धिरेवापवाद निमित्ततामुपयांती लोपं विहंतीति तदपेक्षया नव
स्येव लोपस्यानित्यत्वं॰ एकाच इत्यो वलीति वेति एकीयमतमेतत्॰ तथा च वाचाघतन्यामिति यदाकारलोपो दरिद्रातेर्नास्ति तदा दरिद्रासीदिति स
गिटावुदाहृतावेव॰ सिद्धश्चेति॰ आर्द्धधातुके विषय एव लोपविधानात्॰ एवमर्थमिति॰ अचिकीर्षीदित्यादौ वृद्धौ कृतायां सगिटौ माभूतामतो
लोपस्य नित्यत्वं यथा स्यादित्येवमर्थं॰ तत्र नित्यत्वाल्लोपे कृते पारिशेष्याद्धलंतस्य वृद्धेरवस्थानाल्लार्थो हल्ग्रहणेन॥ ॥

=आकारांते विशेषाभावेन सगिङ्गांबाधाच्चा इति तत्परकरणाच्चनतथा इत्सर्थं लघुग्रहणमिति भावः ॥२= अयं ग्रंथं अयवेलाद्रियं च व्रतावरणामुत्त इत्याध्यस्य द्वीपं ॥२=

अतोंगस्य तदंतविधिं मत्वाह कं पुनरिति । निसादस्यनकाशं बलवदिति लोपं बाधित्वा वृद्धिः स्यादिस अजंतनिरस्सर्थं हलग्रहणं कर्त्तव्यं । इतरस्त्विष्टसिद्धये विशेषणविशेष्यभावे कामचारस्य लघुग्रहण सामर्थ्यात्तांगेनाद्रिशेष्यते इति प्रतिपादयितुमाह नवेदिति । अदरिशसीदित्यादिसिद्धये सगिङ्भावे का च इति यदानानुवर्त्यते तदोभयोरनिसयोः पूर्वविप्रतिषेधेन लोपे कृते हलंतत्वेन वृद्धिरवतिष्ठते अथवा लक्षणेनेहाच्छहांतरभासा लोपस्यानिसत्वं योमन्यते तं प्रत्युच्यते अथवारभ्यत इति । अपिपठिषीदिति । अ

कं पुनर्भवान्वृद्धेरवकाशं मत्वाह निसोलोप इति । अनवकाशा वृद्धिर्लोपं बाधिष्यते सावकाशा वृद्धिः कोवकाशः ॥ अनंसः ॥ अकणीत् अकाणीत् क थं पुनः सत्संसेनंतस्य वृद्धिः स्यात् नवेधो ॥ तांगं विशेष्यते तस्मानं तस्य न स्यात् वयं तु खल्वंगेना कारं विशेषयिष्यामः ॥ तथानंसो वृद्धेरवकाशः अंतस्य लोपो बाधको भविष्यति । एवं वृद्धेर्लोपबलीयस्त्वात् एवं वृद्धेर्लोपो बलीयान् अथवारभ्यते पूर्वविप्रतिषेधः ॥ एयल्लोपावियङ्यण्गुण वृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धं । सानसेषानंसार्था वृद्धिर्हलंतस्य यथा स्यादजंतस्य माभूत् अपिपठिषीत् एतदपि नास्ति प्रयोजनं कथं हलादेरिति नैषा बहुव्रीहिः षष्ठी हल्व आदिर्यस्य सोयं हलादिर्हलादेरिति । कातर्हि कर्मधारयात्संचमी हल्व आदिः हलादिः हलादेः परस्येति । यदि कर्मधारयात्संचमी अचकासीदत्र प्राप्नोति । सिचा आनंतर्यं विशेषयिष्यामः ॥ हलादेः परस्य सिच्यनंतरस्येति । यदि सिचानंतर्यं विशेष्यते अकणीदकाणीदत्र न प्राप्नोति । वचनाद्भविष्यति । इहापि तर्हि वचनात्प्राप्नोति अचकासीत् येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् केन च नाव्यवधानं । वर्णेनैकेन । संघातेन पुनर्व्यवधानं भवति न च भवति । यदि सिचानंतर्यं विशेष्यते अस्तु बहुव्रीहिः षष्ठी कस्मान्न भवति अपि

लोपस्य स्थानिवद्भावादजंतमेतदंगं तत्र पश्चाद्धाकारस्य वृद्धिः प्राप्नोति हल्ग्रहणान्न भवति । अचकासीदिति । चकाराद्धल आदेः परो ऽकारो भवतीति वृद्धिप्रसंगः ॥ बहुव्रीहावप्ययं दोषः ननु चाट्कृते हल आदित्वं नास्ति नैष दोषः ॥ सिजंतस्यांगस्याडागमः क्रियमाणस्तस्यैव हलादित्वं निवर्त्तयति न तु सिचि यदंगं तस्य । येन नाव्यवधानमिति ननु वचनादतो लोपो बाध्येत सिचाद्यानंतर्यं आश्रिते ॥ नंसो नैव वृद्धेरवकाशः स्यात् नैतदस्ति । लघुग्रहणमेवमनर्थकं स्याद्व्यवधेयाभावात् तत्स्थानेस्य वृद्ध्यवकाशत्वादंसस्यापि तत्पूर्वविप्रतिषेधाभ्यां लोपाव्यवधानएव वृद्ध्याभाव्यमिति निर्दिष्टग्रहणादधिकव्यवधाननिरसार्थेन नाव्यवधानमित्याश्रीयते ॥

=अतोहलादेरिति सेषा ॥४=

=इहलातिलोकाशु ॥

मा·के·

३१

तदेवमुत्तरार्थं हल्ग्रहणं न कर्तव्यमिति स्थिते इदमुच्यते· एवं तर्हीति· प्रसक्तानुप्रसक्त्या प्रयोजनकथनप्रसंगेन हल्ग्रहणमतिस्तनं दूरमपगतमिति सर्पः। क्वचिदनुस्तनमिति पाठः। त
त्रायमर्थः· दूरं यातं स्तनं अनुस्तनं नपरिसक्तं· एतदुक्तं भवति· अत्रैव सूत्रे हल्ग्रहणस्य प्रयोजनमस्तीति दर्शयति· हल्ग्रहणमनर्थकमिति· केचिदाहुः। सति हल्ग्रहणे अवस
गवीदिति· केचित्तत्रश्च तो रिसनो धातुग्रहणानुवृत्तः। अगवीदित्यत्रातो हलादेर्लघोरिति वृद्धिर्न भवतीत्याहुः। सिचा धातोर्व्यवधाने पुनर्धातुग्रहणाद्यस्मिन् संघातु
लं संगृह्यते· तस्मादयमर्थो येन नाव्यवधानमित्येकेन हला व्यवधाने सिजन्तोऽस्य वृद्धिः स्यात् न तु संयोगेन अरांक्षीत् अत्रांक्षीदित्यादौ· हल्ग्रहणे तु सति वर्णग्रहणे जातिग्र
हणात् संयोगान्तस्यापि हल्ग्रहणसामर्थ्याद्भवति· अनर्थकमिति अस्यायमर्थो नं सो पि हल् [illegible] कथं नाम [illegible] अनन्तरग्रहणं तु विस्पष्टार्थं तदन्तरेणापि नदन्तविधिना
भवति किन्तु हलो वर्णस्य उच्यमाने जन्तस्यांगस्य हलः स्थाने वृद्धिरित्ययमप्यर्थ आशंक्येत· अन्ग्रहणमनिगर्थमिति· अन्यथेक्षत्रिभाषोपस्यानादस्मै क्षीदित्यादावेव

एवं तर्ह्यतिदूरमेवेदं हल्ग्रहणमनुसृतं· हल्ग्रहणमनर्थं अन्ग्रहणमनिगर्थं·॥ ॥ह्म्यन्तक्षणश्वस·॥ ॥किमर्थं जागर्तेर्वृद्धिप्रतिषेध उ
च्यते· सिचि वृद्धिर्मा भूदिति· नैतदस्ति प्रयोजनं· जागर्तेर्गुण उच्यते वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति· गुणे तर्हि कृते रप
रत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति नेटीति तस्याः प्रतिषेधो भविष्यति· इयं तर्हि प्रतिषेधोत्तरकाला वृद्धिरारभ्यते अतो ल्रान्तस्येति·

स्यान्तस्य पाक्षीदित्यादौ·॥ ॥ह्म्यन्तक्षण·॥ ॥किमर्थमिति· गुणेन बाधितात् वृद्धिर्न प्राप्नोतीति मन्यते· सिचि वृद्धिर्मा भूदिति· अतो ल्रान्तस्य समनेनेति भावः। इतरस्तु सि
चि वृद्धिरिति प्राप्निरनेनोक्ता सा च युक्तेति मत्वाह· नैतदस्तीति· वृद्धिप्रतिषेधविषयादन्यत्र सामान्यलक्षणेन गुणस्य सिद्धत्वाज्जाग्रो विचिण्णल्ङित्स्विति गुणविधा
नं वृद्धिप्रतिषेधविषयार्थं संपद्यते· गुणे तर्हीति· अंगवृत्तपरिभाषया तत्तु निष्ठितत्वज्ञानतादनाश्रितं· यदि तर्हि गुणे रपरत्वे च कृते तल्लक्षणं न रेण वृद्धिर्भवति तदा जा
गरकः इत्यादावजन्तलक्षणं वृद्धिं बाधित्वा गुणे रपरत्वे चानुपधाया इति वृद्धिः प्राप्नोतीति· नैष दोषः। विचिण्णल्ङित्सु गुणप्रतिषेधात् लिंगात् उपधालक्षणा वृद्धिर्न भवतीत्येव सा यते
अन्यथा विचिण्णल्ङिषु गुणे रपरत्वयोः कृतयोरुपधालक्षणया वृद्ध्या सिध्यति रूपमिति प्रतिषेधं न विदध्यात्· यदि च गुणे कृते वृद्धिमात्रा प्रवृत्तेर्लिङ्गं विचिण्णलोः प्रतिषेध
आश्रीयते तदा जागर्यग्रहणं प्रकरणं कर्तुं· इयं तर्हीति· आर्थो यमुत्सर्गापवादयोः क्रमः· नेटीति प्रतिषेधे प्राप्ते· तो ल्रान्तस्येति वृद्धेरारम्भात् प्रतिषेधोत्तरकाले सुच्यते पाठक्रमेण प

शिवः

३१

=पूर्वोक्तेन पूर्वप्रतिज्ञातान्निमित्तानीत्युक्तेनुमदर्शनादिनिमित्तेः ॥९॥

मपवादत्वाद्बाधितासिचि वृद्धिः प्राप्ता ता ४

अपर आहेति · पूर्वोक्त एवार्थो वाँचोयुक्त्यन्तरेणोच्यते · कक्ष्ययेति · कक्ष्यां विशिष्टदेशस्थम्मन्त्रं वणिजो व्यवहरन्ति · अत्र तु कक्ष्येव कक्ष्या यथा कक्ष्याद्व्याणां गुरुत्वं परिच्छिन
त्ति तथा शास्त्रं कार्याणां सामान्यविशेषावस्थाभावेन बलाबलं व्यवस्थापयति · हर्म्यावस्थावचनो वा कक्ष्याशब्द उपचारादिहावस्थावचनः । तत्र किं कार्यं सामा
न्यावस्थं किं विशेषावस्थमित्येवं कक्ष्यया कक्ष्या निमातव्या · बलं वा कक्ष्या · यथा तुल्यकक्ष्याविति · तत्र जागर्त्तेरकारे इति स्थिते वार्णादाङ्गो विधिर्बलीयानि
ति यणादेशं बाधित्वा सार्वधातुकार्धधातुकयोरिति गुणः प्राप्तः तमपवादत्वाद्बाधित्वा जाग्र इति गुणः प्राप्नोति · भाष्यकारस्तु दुर्बलत्वादुत्सर्गं प

अपर आह · कक्ष्यया कक्ष्या निमातव्या · सिचि वृद्धिश्च प्राप्नोति गुणश्च · गुणो भवति · गुणे कृते रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति ·
नेटीति च तस्याः प्रतिषेधो भवति प्रतिषेधोत्तरकालमतो हलादेर्लघोरिति विभाषा वृद्धिः प्राप्नोति न च किंचित् अतो ल्रान्तस्येति
च वृद्धिः प्राप्नोति न च किंचित् ॥ ॥नेड्वशि कृति ॥ ॥किमर्थं पुरस्तात्प्रतिषेध उच्यते · न विध्युत्तरकालः प्रतिषेधः क्रियते · तद्यथान्य
त्रापि विध्युत्तरकालाः प्रतिषेधा भवन्ति · कान्यत्र · कर्त्तरि कर्मव्यतिहारे न गतिहिंसार्थेभ्य इति देवताद्वन्द्वे च नेन्द्रस्य परस्य · तत्रा
यमप्यर्थः द्विरिड्ग्रहणं न कर्त्तव्यं भवति · प्रकृतमनुवर्त्तते · नैवं शक्यं · इडर्थं सार्वधातुकग्रहणं लिङः सलोपे सन्निहितं तद्वि
घेत · यदि पुनर्नेड्वश्यश्च तुम्य इत्यत्रैवोच्येत किं कृतं भवति · विध्युत्तरकालश्चैव प्रतिषेधः कृतो भवति द्विश्चेड्ग्रहणं न कर्त्तव्यं भव
रिहलवृद्धेरानभ्यगणायति · न च किंचिदिति · तस्याः पाक्षिकाः वृद्धेरपवादत्वं तन्न किंचिद्गुणविधानमस्तीय ॥ति · तत्रायमप्यर्थः द्विः प्रतिषेधो न कर्त्तव्यो भवति ·॥
तो जागर्ग्रहणं अकर्त्तव्यं स्यात् · गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनं पुनर्वृद्धिर्निषेधश्च यण्पूर्वाः प्राप्तयो नव तिसंयत श्लोकः ॥ ॥नेड्वशि कृति ॥ ॥प्रागिर
र्वकत्वात्प्रतिषेधस्यार्थात्पूर्वं विधिप्रकरणं पठितव्यं पश्चात्प्रतिषेधप्रकरणं क्रमव्यतिक्रमे प्रयोजनाभावादितिमत्वा पृच्छति · किमर्थमिति · तत्रायमप्यर्थ इति · नो
व्यक्रमाश्रयणादुपचयोप्यस्तीत्यर्थः । इडर्थमिति · रुदादिभ्यः सार्वधातुक इत्यत्र यत्सार्वधातुकग्रहणमिड्विधावुपात्तं तदानन्तर्यात् लिङः सलोपो नन्तस्येत्यत्र शक्यते नुव
र्त्तयितुं यदि लिड्विधेः पुरस्तादीड्जनोर्ध्वे चेत्यस्यानन्तरं नेड्वशि कृतीत्यादि प्रतिषे

तुशोषेति॰ यथा पपिथ ययिथ इत्यादावार्द्धधातुकस्येतीट्प्राप्त एकाच इति प्रतिषिद्धः क्रादिनियमात्पुनः प्राप्तो चस्तास्वत्थल्लीति पुनः प्रतिषिद्धस्तत्र कृत एव भारद्वाजस्य प्रति
षेधो नान्यस्य इति नियमात्पक्षे भवति एवं स्तुसुधूञ्भ्यो परस्मैपदेष्वित्यर्थः। तथा हि क्रादिनियमस्य बाधकमचस्तास्वदिति प्रतिषेधमतो भारद्वाजस्येति नियमो बाधते
स कथं क्रादिप्रतिषेधं न बाधेत॰ ननु च मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते इति न्यायात् भारद्वाजनियमो चस्तास्वदिति प्रतिषेधं बाधिष्यते न तु क्रादिप्रतिषेधं॰ नैतदस्ति॰ पाक्षिक एष परिहा
रो नेदेन लक्षणापेक्षायां कार्यमाचेत् तु बाध्यते नापेक्षितेनैव परिहारः॰ किं च न दृश्यश्चतुर्थस्य स्मार्द्ध्वमिदं प्रकरणं पठिष्यामि इति प्रक्रान्तं न तु कृतो भारद्वाजस्ये
त्यस्मात्सरमिति न तो भारद्वाजनियमात्पूर्वमिदं भवति न तु परमिति कुतो मध्येऽपवादा इति न्यायावतारः॰ न्यायस्य न्यायाश्रये च सर्वप्रतिषेधबाधेन भाव्यं॰ पयेषेति॰ थ

नेवं शक्यमिह हि तुशोथ दुद्रोथेति कृतो भारद्वाजस्येत्यस्मान्नियमादिट् प्रसज्येत॰ कृसभृवृस्तुद्रुस्रुश्रुवो लिटीत्येष योगः प्रतिषेधार्थो
भविष्यति॰ यघेषयोगः प्रतिषेधार्थः य एतस्माद्योगादिट् परिसमाप्यते नियमात्स न सिध्यति॰ पेचिव पेचिमशेकिव शेकिम॰ एवं तर्हि
कृसभृवृ इत्येतेषां ग्रहणं नियमार्थं भविष्यति स्तुद्रुस्रुश्रुवां प्रतिषेधार्थं भविष्यति॰ स्कृ दृञ्जो र्णाप्कार्थं॰ एवमपि सामान्यविहितस्येव
टः प्रतिषेधो विज्ञायेत विशेषविहितस्यायं पनीति॰ पुरस्तात्पुनः प्रतिषेधे सति अनारभ्यापवादोऽयं भवति तेन न यावानिएनामतस्य स
र्वस्य प्रतिषेधः सिद्धो भवति॰ यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियेत इति पुरस्तादपि प्रतिषेधे सति तन्न करिष्यते॰ कथं इदमस्ति नेड् शि
ति (लि)ति ततो वक्ष्याम्यार्द्धधातुकस्येड्वलादेरिति॰ इडिस

लि [illegible] भारद्वाजनियमादिटः प्राप्तस्य प्रतिषेधे विधेये संभवति नियमार्थत्वानुपपत्तिः। एवं तर्हीति॰ योगे
कदेशः पूर्वयोगशेषेऽनेनाप्यो दके न तु समस्त एव योगः प्रतिषेधार्थो नेनोक्त इति मत्वाचोदितं॰ पयेषेति॰ तत्र क्रादीनामकारान्तत्वान्नास्ति भारद्वाजनियमादिट् प्राप्तिरि
ति तेषां नियमार्थं ग्रहणं स्तुद्रुस्रुश्रुवां तु भारद्वाजनियमात्क्रादिनियमाच्च प्राप्तस्येटः प्रतिषेधार्थं॰ स्कृ दृञ्जोरिति॰ एकयोगस्याप्यपि ना वक्ष्यमेकधर्माणस्त्रेण्प्रस
ति तेषां (?) पाश्रयोपीट् प्रतिषेधो नियम्यते इति स्कृ दृञ्जोर्ग्रहणेन ज्ञाप्यते॰ एवमपीति॰ स्तुद्रुस्रुश्रुभ्यः प्रतिषेधो येन नाप्राप्तिन्यायेन क्रादिनियमप्राप्तस्य वेट्‌नियतनियमस्य
तु भारद्वाजनियमप्राप्तमित्यर्थः॰ सहिपत्वे व प्राप्तस्तत्रश्चायोऽस्यादेव॰ पुरस्तादिति॰ इण्मात्रमनाश्रितविषयविशेषमनारभ्याधीतेन प्रतिषेधेन बाध्यत इत्यर्थः॥ यदि तु भारद्वा
जनियमात्परः प्रतिषेधः क्रियेत मध्येऽपवादा इति चाश्रीयेत तदा विप्रतिषेधे

अथकद्ग्रहणमिति· अकृतिं क्रादिनियमादिड्भविष्यतीति मत्वा प्रश्नः। नात्रेति· भिन्नजातीयत्वादिति भावः। क्रादिनियमो हि प्रकृत्याश्रयप्रतिषेधविषयमेवेटं प्रापयेत् बिभेदिषेति ने
ष्टुरीति तु प्रत्ययाश्रयः प्रतिषेधस्तद्विषये क्रादिनियमाभावादिण्न भवेदिति दिवेतिष्ट इति कद्ग्रहणमकृति प्रतिषेधनिवृत्त्यर्थं· ह्रस्वङ्ङोर्ग्रहणादिति· सामान्यग्रहणं विशेषनिवृत्त्यर्थं संपद्य
त इति प्रदर्शनार्थं ह्रस्वङ्ङोरित्यिति भेदेनोपादानं· ह्रस्वग्रहणस्य प्रयोजनं वक्ष्यते इह साधाविण्मा भूदिति· यदि च क्रादिनियमः प्रकृत्याश्रयमेव प्रतिषेधं बाधेत न प्रत्ययाश्रयं त
दानेङ्ङुश्रिश्रुकः किती तियोगबध्येन यथायोगं सिद्धत्वात्प्रतिषेधस्यानार्थो ह्रस्वग्रहणेन क्रियमाणं प्रत्ययाश्रयस्यापि प्रतिषेधस्य निवृत्तिं ज्ञापयति· ननु थलर्थं ह्रस्वग्रहणं स्या

अथकद्ग्रहणं किमर्थं· इह मा भूत्· बिभिदिव बिभिदिमेति· नैतदस्ति प्रयोजनं· कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीत्येतस्मान्नियमादत्रेड्भवि
ष्यति· नात्रानेन परिप्रापणं प्राप्नोति· किं कारणं· प्रकृतिलक्षणस्य प्रतिषेधस्य संप्रसारणं· प्रत्ययलक्षणश्चायं प्रतिषेधः। उभयोः
संप्रसारणं· कथं ज्ञायते ह्रस्वङ्ङोर्ग्रहणात्· कथं कृत्वा ज्ञापकं· इमौ ह्रस्वङ्ङावुदात्तौ तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति· प
श्यति त्वाचार्यः उभयोः संप्रसारणमिति ततो ह्रस्वङ्ङोर्ग्रहणं करोति· किं च न खल्वपि कश्चिदुभयवान्प्रकृतिलक्षणः प्रत्ययलक्षणश्च
तत्र· किं तुल्यजातीयेऽसति यथैव प्रकृतिलक्षणस्य नियामकोऽभवत्येवं प्रत्ययलक्षणस्यापि नियामकोऽभविष्यति· इदं तर्हि प्र

तस्य सकिलादवस्यादित्याञ्चेड् प्रतिषेधार्थौपनिः। नैतदस्ति· ववर्थेति निगम इति निपातनं क्रियमाणं भाषायां ववरिथेतीदमभ्यनुजानाति· स्यादेतत्· तुल्यजातीय एव प्रतिषे
धो नियमेन बाध्यतां एकैकाश्रयस्तु कथं बाध्यत इत्याशंक्याह· न खल्वपीति· कृसृभृवृभ्यो लिटि प्रकृत्याश्रय एवैकाच उपदेशेऽनुदात्तादितीट् प्रतिषेधः प्राप्नोति केवलायाः प्र
कृतेः शब्देनोपादानात्· अथोच्यते च कृपपरत्वाद्धेश्रुकः कितीतीट्प्रतिषेधः प्राप्नोति स चोभयवान् प्रकृतिप्रत्ययविशेषाश्रयणादिति तन्न· अत्रापि तरंगत्वात् कृत्याश्रय
एव प्रतिषेधस्तस्यैव नियमे विज्ञायमाने ह्रस्वग्रहणमनर्थकं स्यात्तस्मात्प्रत्ययाश्रयोऽपि प्रतिषेधो नियम्यत इत्येवं च ह्रस्वग्रहणं लिंगं प्रकृतं कृतं चापेक्षायां च न खल्वपीत्युच्यते न त

= श्रुकः किती लस्पोऽभयवतःसत्वात् न खल्वपीत्युक्तमत्र आह प्रकृतेति· १ =

मा॰ के॰

३३

रुदिवः रुदिम इति। असति ग्रहणे रुदादिभ्यः सार्वधातुकस्येटो प्रतिषेधः स्यात्। तस्मात् वशादेर् अकाशोरो दितीसादो। यदेत दिति। प्रतिषेधप्रकरणमिसर्थः। ततः सार्वधातुके इट्
प्रतिषेधाभावः। यद्यन्यार्थमार्द्धधातुकग्रहणं कर्त्तव्यं तदा योगविभागेन साध्यते यद्यतस्यान्यप्रयोजनाभावः तदा लाघवार्थं कृद्ग्रहणमेव कर्त्तव्यं प्रत्यास्त्यास्मते च न त्वार्द्धधातुकग्रहणं। न
स्मति। नन्वत्रैव वक्ष्यसुणादय इति न तत्र आश्रुतसाश्रयणं देवेतन्न विष्यति। अन्येभ्योपि दृश्यत इत्यनेनात्र मन्निन्नसयपइस दोषः॥ ॥तितुत्र॥ निकुचितिरिति। कुचेः क्तिन्नादिभ्य इति

रुदिवः रुदिमः। एतदपि नास्ति प्रयोजनं उपरिष्टाद्योगविभागः करिष्यते। आर्द्धधातुकस्य यदेतदनुक्रान्तं तदार्द्धधातुकस्येड्वलादेरिति
तत्रैव तावद्द्रष्टव्यं। यदि किंचित्तत्रान्यदप्यार्द्धधातुकग्रहणस्य प्रयोजनमस्ति अथ न किंचित् इहैव कृद्ग्रहणं क्रियते तत्र वार्द्धधातुकग्रहणं क्रियते नको
न्वत्र विशेषः। नेड्वशि कृतीति। वरमनादौ कृति। वरमनादौ कृतीट्प्रतिषेधं प्रयोजयति। ईशिता ईशितुं ईश्वरः। वर। दीपिता दीपितुं दीप्रः। र। म। भसिता भसितुं भ
स्म। म। न। यतिता यतितुं यत्नः। अथान्ये येवशादयस्तत्र कथं। उणादयो बहुलमिति प्रातिपदिकानि॥ ॥तितुत्रथसि॥ ॥तितुत्रेष्वग्रहादीनामिति
तुत्रेष्वग्रहादीनामिति वक्तव्यं। निगृहीतिः उपस्निहितिः निकुचितिः परिपठितिः॥ ॥एकाच उपदेशेनुदात्तात्॥ ॥एकाज्ग्रहणं किमर्थं। एकाज्
ग्रहणं जागर्त्यर्थं। एकाज्ग्रहणं क्रियते [illegible] जागर्तेरिट्प्रतिषेधो माभूत्। जागरिता जाग[illegible]रितुं। नैतदस्ति प्रयो
जनं। उपदेशेनुदात्तादित्युच्यते जागर्तिश्चोपदेशेउदात्तः। न ब्रूम इहार्थं जागर्त्यर्थमेकाज्ग्रहणं कर्त्तव्यमिति किं तर्ह्युत्तरार्थं श्र्युकः किति इट्प्रतिषेधं व
क्ष्यति स जागर्तेर्माभूत् जागरितः [illegible] जागरितवानिति। एतदपि नास्ति प्रयोजनं जागर्तेर्गुण उच्यते वृद्धिविषये प्रतिषेधविषये च।

क्तिन्। कुच शब्दे तारे इत्यस्माद्धात्वोः स्त्रियां क्तिन्॥ ॥एकाच उप॥ ॥एकाज्ग्रहणमिति। एकाचामेवानुदात्तत्वप्रतिज्ञानादनुदात्तग्रहणेनैवातिप्रसंगनिवारणात् प्रश्नः। इतं उत्तरार्थ
तमभिप्रेत्याह। एकाज्ग्रहणं जागर्त्यर्थमिति। स जागर्तेर्माभूदिति। जागर्तिरवेगं तोनेकाच्संभवतीति तन्निवृत्यर्थमेकाज्ग्रहणं जगर्तेस्तु नुवभावात् प्रतिषेधो भवत्येव। चो द्कः। प्र

शिव॰

३३

=नन्वातिसृीर्षतीसन्वापिरुलादेरेवसनः किन्तादिरमप्यानुपूर्व्यासिद्धमिलाशंक्य ...

प्रष्टावसरवार्ड

प्रतिषेधम्

सबाधक इति । इड्प्रतिषेधस्येत्यर्थः । उपदेशाधिकारादिति । अस्यार्थमुपदेशग्रहणमनुवर्त्य उपदेशे च जागर्तिरुगंतो भवतीति संगः । इतर उपदेशाधिकारस्य प्रयोजनांतरमपश्यन्नाह । उपदेशग्रहणं निवर्त्स्यते इति । स्तीर्वापूर्वेति । इत्यादिषु कृते ऽनुगंतत्वात् कृते सौत्रो ऽसौ प्रतिकोगंतसंभवे ऽनंतरपूर्वगत्याश्रयणस्यानुक्तत्वादिड्प्रतिषेधो न स्यात् उपदेशाधिकारात्तु उपदेशे ऽगंतत्वात् संप्रत्यनुगंतत्वे ऽपि प्रतिषेधः प्रवर्त्तते । आनुपूर्व्येति । स्तृतादिति । स्थिते कित्वनिषेधाश्रय इड् ... श्रयश्च कित्वनिषेध इति प्रागेव सन्निहितं कित्वमाश्रित्य इट्प्रतिषेधः प्रवर्त्तते ततः इत्वादीनीत्यर्थः । अत्र चोद्यते । कृते पि त्वादिषु प्रतिषेधनिमित्तोगंतता ... पगमात्पुनरिड्प्राप्नोति । तस्मिंश्च सति नत्कासे ऽति कित्वप्रतिषेधात् पुनः सति ... प्राप्नोति । नैष दोषः । पूर्वमेव प्रसक्तस्येड्लक्षणस्य प्रतिषेधेन बाधितत्वात् लक्ष्यस्य संस्कृतत्वात् पुनः प्रवृत्त्यभावात् । आतिस्तीर्षतीति । श्रयुकः किती सत्र विशिष्टानुबंधोपलक्षितः प्रत्यय आश्रितः स निग्रहगुणो ऽश्च ...

सबाधको भविष्यति । तत्र गुणो ऽरपरत्वे च कृते ऽनुगंतत्वादिड्प्रतिषेधो न भविष्यति । ननु चोपदेशाधिकारात् प्राप्नोति उपदेशग्रहणं निवर्त्स्यते । यदि निवर्त्तते स्तीर्वापूर्वाइत्वोत्वयोः कृतयोः रपरत्वे चानुगंतत्वादिड्प्रतिषेधो न प्राप्नोति । नैष दोषः । आनुपूर्व्यासिद्धमेतत् न चाकृते इड्प्रतिषेधे इत्वोत्वे प्राप्नुतः । किं कारणं । न क्त्वा सेडिति प्रतिषेधात् । इदं तर्ह्यातिस्तीर्षतिनिपुपूर्षतीति । इत्वोत्वयोः रपरत्वे चानुगंतत्वादिड्प्रतिषेधो न प्राप्नोति । मा भूदेवं श्रयुकः किती ति इट्स निवत्स्यते भविष्यति ।

न तु सात्वादिति विशेषमाश्रित्यास्योपन्यासः । अत्र त्वरपरत्वयोः कृतयोरनुगंतत्वादिड्प्रतिषेधो न प्राप्नोति । श्रयुकः किती त्यनेन तत्र प्रतिषेधो नास्ति । इड्प्रतिषेधो न स्यादुपदेशाधिकारात्वनुगंतावस्थायामपि भवति । सनिग्रहगुहोश्चेत्यत्र च शब्देनोगनुकृष्यते । श्रयुकः किती त्यनेन तत्र प्रतिषेधो नास्ति । इड्प्रतिषेधाश्रयत्वात् गुणादित्वस्य गुणादित्वाश्रयत्वा कित्वस्य कित्वाश्रयत्वादिड्प्रतिषेधस्येतीतरेतराश्रयप्रसंगात् । इट्सनि वेति । स्तृ स इति स्थिते ऋकारांतावस्थायामेव पक्षे इडभावः । तथाहि । इड्विकल्पस्य निरवकाशत्वात् सांप्रतिकाभावे ऽनंतरपूर्वगत्याश्रयणान्नित्यत्वाद्वा न तावद्गुणस्य प्रवृत्तिः । तत्रेट्पक्षे कृते ऽपि निरवकाशविकल्पे रूपद्वयमातिस्तरिषति आतिस्तरीषतीति इडभावपक्षे त्वातिस्तीर्षतीति । अत्रोच्यते । इडभावपक्षे कित्वाद्गुणनिषेधे इत्वरपरत्वयोः कृतयोः पुनरिट्प्राप्तिः । न चेट्सनि वेति विकल्पविधानमनर्थकं ऋकारांतावस्थायां पक्षे इडभावे कित्वे सतीत्वरपरत्वयोः कृतयोरिटि सति गुणे च सत्यातिस्तरिषतीति रूपसंपादनेनार्थवत्वाद्विकल्पस्य ।

=इतरेतराश्रयेति । स्तीर्वापूर्वेत्यादेः किल स्योपदेशिकत्वादानुपूर्व्यासिद्धिकृता । सनः कित्वस्य सातिदेशिकत्वाच्चाक्रमः आपातसापेक्षत्वादसतीतरेतराश्रयमिति ... =सनिग्रहे त्यत्र तु किती त्यनेन पक्षणन्नत्वो ... इति भावः ॥५॥ =भाष्ये श्रयुकः किती त्यस्य ... इत्यर्थः ॥६॥ ... इति भावः ॥४॥

=स्तीर्षतीति मूर्वा ... रंगलत्व =पाक्षिकमिति कार्यकालपक्षे =इडप्रतिषेधयोः समत्वात्सव =त्वात् प्रतिषेधप्रवर्त्तते य =थोः इत्थम् ... =स्य कित्वस्य ... =रमिः प्रत्यान ... =तिप्रतिषेधात् ... =स्वंप्रत्यनिर्णीतिभावः ॥४॥

आस्तीर्णमिति· कृते कृते वेटि किंदेव निष्ठेत्यनेन विशेषणस्योपन्यासः। यस्य विभाषेति· ननु कृकारान्तस्य सनि विकल्पविधानाल्लिसत्वादिलो लयोः कृतयोरन्तकारान्तत्वाद्यस्य विभा
षेति प्रतिषेधाप्रसंगः। नैष दोषः। सनि विकल्पविधाने कृकारान्तत्वस्यापेक्षणेऽपि यस्य विभाषेत्यत्र यस्य कश्चिदपि विकल्पो दृष्टः स धातुराश्रीयते न तु विकल्पकारणं कृकारान्
तत्वं भवति चेत्वो लयोः कृतयोरपि स एव धातुरिति प्रवर्त्तते प्रतिषेधः। तदेवमुपदेशग्रहणस्यान्तरङ्गानुपयोगादनन्तु वर्ण्णनाज्जागरित इत्यत्र गुणे रपरत्वे लयोः कृतयो
रनुगन्तता च्युकः किती ति प्रतिषेधाभावादुत्तरार्थमेकाज्ग्रहणं न कर्त्तव्यं· वध्यर्थमिति· वधशब्दोऽकारान्तोऽनेकाज्झि देशः। इतर उपदेशग्रहणमनुदात्तस्यैव विशेष
णं न त्वेकाच इति मन्यमान आह· एतदपीति· वधिषीष्टेति· आशिषि लिङ् कर्म्मण्यात्मनेपदं अतो लोप इत्यकारलोपे कृते वधिरेकाच् अकारोच्चारणं त्ववधीदित्यादौ ह

इदं तर्हि आस्तीर्णनिपूर्त्ताः पिंडाः इत्वोत्वयोः रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति· मा भवानेविमिट् सनिवेति सनि विभाषा यस्य वि
भाषेति प्रतिषेधो न सिध्यति· सूत्रार्थमेव तर्हि वध्यर्थमेकाज्ग्रहणं कर्त्तव्यं वधेरिट्प्रतिषेधो माभूदिति· वधिषीष्टेति· एतदपि नास्ति प्रयो
जनं· क्रियमाणेऽपि वै एकाज्ग्रहणे वधेरिट्प्रतिषेधः प्राप्नोति वधिषीष्टेति· किंकारणं वधेरिट्प्रतिषेधं सन्निपात एकाच्त्वात्प्रकृतेश्चा
नुदात्तत्वात्· सन्निपाते चैव हि वधिरेकाच् श्रूयते प्रकृतिश्चास्यानुदात्ता· किं पुनः कारणमेवं विज्ञायते उपदेशेऽनुदात्तादेकाचः श्रू
यमाणादिति यङ्लोपे मा भूदिति· बेभिदिता बेभिदितुं चेच्छिदिता चेच्छिदितुं· एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तवि
शेषणं चेत्कृत्वा दिस्मा लिटि नियमानुपपत्तिरप्रामतात्मति

लेन लक्षणं इति विस्तर्थस्यात् प्रकृतेश्चानुदात्तत्वादिति· यस्मात्प्रकृतिरिहेतिरनुदात्तात
स्याश्चोपदेशत्वस्याश्रयते सैव चानेन रूपेण वस्मिन्नेति संप्रत्ययः ततः प्रतिषेधः प्राप्नोति· ततश्च कृतमप्येकाज्ग्रहणमनर्थकं· किं पुनरिति· उभयविशेषणमुपदे
शग्रहणमस्तु ततो वधेरुपदेशेऽनेकाच्त्वात्प्रतिषेधाप्रसंगः। बेभिदितेति· द्विःप्रयोगो द्विर्वचनं भवति भिदिरुपदेशेऽनुदात्तः उपदेशे एकाजिति सतो लोपे कृते सं
प्रत्यनेकाच्त्वेऽपि प्रतिषेधप्रसंगः। श्रूयमाणे त्वेकाच्त्वाश्रीयमाणे आवृत्तिसंख्यैकत्वसंख्यायाबाधनात्प्रतिषेधाभावः। समुदायस्य चैकाङ्गसंज्ञा न तु प्रत्येकमित्ये
काचोऽङ्गादित्याश्रयणात्परमिट्(?)रूपाश्रयोऽपि प्रतिषेधो न भवति॥ ॥७॥ ॥

अनुदात्तविशेषणं चेदिति। उभयविशेषणेप्यनुदात्तविशेषणं भवतीति सामर्थ्यादनुदात्तस्यैव यदि विशेषणमिति सवधारणं द्रष्टव्यं। असति नियम इति। क्रादिसूत्रं प्रतिषे
धार्थमस्तु एवमपि चकृषे इत्यादि सिध्यति। बिभिदिव सादेश्चैकाच्त्वाभावात्प्रतिषेधाभावादिट् सिध्यतीति भावः। पेचिवेति। एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाण
दितीट्प्रतिषेधप्रसंगः। नीत्त इति। ददात्तेः क्तप्रत्यये च उपसर्गात्त इति त्वे कृते न च कृतादेकाच्त्वाभावादिट्प्रतिषेधाप्रसंगः। तस्य द्विपदाश्रयत्वाद्बहिरंगत्वादंतरंग

एकाचउपदेशेनुदात्तादिसुपदेशवचनमनुदात्तविशेषणंचेल्लृत्रादिभ्यो लिटि नियमस्यानुपपत्तिः। किंकारणं। अप्राप्त[illegible]त्वात्प
तिषेधस्य। द्विर्वचने कृते उपदेशेनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति। असतीट्प्रतिषेधे नियमो नोपपद्यते। असति
नियमे को दोषः। तत्र पचादिभ्य इड्वचनं। तत्र पचादिभ्य इड्वक्तव्यः। पेचिव पेचिम शेकिव शेकिम। सनश्चेट्प्रतिषेधः। सनश्चेट्प्रतिषे
धो वक्तव्यः। बिभित्सति चिच्छित्सति। द्विर्वचने कृते उपदेशेनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति। इट् च नीत्तः। ततेन कृतादि
ट्प्रतिषेधो न प्राप्नोति। नैष दोषः। आनुपूर्व्यात्सिद्धमेतत्। नात्राकृते इट्प्रतिषेधे त्वं प्राप्नोति। किंकारणं। नीत्ती सुच्यते। यद्प्युच्यते ए
काच उपदेशेनुदात्तादिसुपदेशवचनमनुदात्तविशेषणं चेल्लृत्रादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्येति। मा भूल्लि
यमः। ननु चोक्तं तत्र पचादिभ्य इड्वचनमिति। नैष दोषः। उक्तं तत्र थल्ग्रहणस्य प्रयोजनं समुच्चयो यथा विज्ञायेत थलि च सेटि क्ङिति च से
टीति। यद्प्युच्यते सनश्चेट्प्रतिषेध इति। उभयविशेषणत्वात्सिद्धं। उभयमुपदेशग्रहणेन विशेषयिष्यामः। उपदेशेनुदात्तादुपदेशे एका

इट्प्रतिषेधे सिद्धत्वादिति परिहारः। परिहारांतरस्य सत्त्वान्नाश्रितः। तदेव दर्शयति। आनुपूर्व्यात्सिद्धमिति। थल्ग्रहणस्येति। आरंभसामर्थ्यादित एकमध्येनादेशादेर्लिटी ति स
नुवर्त्तनाद्यंतरेणापि थल्ग्रहणं थल्येव सेट्येत्वाभ्यासलोपयोः सिद्धत्वात्थल्ग्रहणं क्ङितां समुच्चयार्थं तत्र चाटिकृते एत्वाभ्यासलोपयोर्विधाने पेचिव सादीनि रूपाणि सिध्यं
तीति नार्थः क्रादिनियमेन। उभयविशेषणत्वादिति। एवं सत्युभयं विशेषणत्वेन संस्पर्शादनुग्रहीतं भवति। एतदर्थं चोपदेश इति मध्ये पठितं। उभयविशेषणे च क्रादिनि

=अकिंकाः सतोलिट् स्यात् एवं सनवादिलर्थः। २= क्ङितीति सेटीत्युभयविशेषणं। तत्र सेड्ग्रहणं कार्यावधारणार्थं। ३=

×नन्वेवं किमिति सतीत्यपि प्रतिषेधाप्रसंगः।२४

सन्यङः तस्येति॰ सन्यङोरिति षष्ठी तत्र भिघश्ब्दस्य प्रकृतिप्रत्ययसमुदायस्य सर्वस्य सर्वपदादेशाः इति शङ्कान्तरमादेशे कृते यं धातुरयं प्रत्यय इति विभागाभावादिट्प्रतिषेधाभावः इडप्यस्मिन्पक्षेन प्राप्नोति स दोषः। अथवा व्यासमाश्वासालक्षान्तराश्रयेण॰ अथापीति॰ नलस्येति॰ आचार्यस्य भिघुपदेशाश्रये सैकाच्त्वादनुदात्ततात्वाच्चेट्प्रतिषेधः स्यात्तयङं तस्यत्वपदेशेऽगृह्यमाणे तस्यानेकाच्त्वादुदात्तत्वाच्च प्रतिषेधाप्रसंगः। ननु च प्रत्यक्षमाख्यानमुपदेश इत्युक्तं यङादीनां च प्रत्ययानामुपदेशोऽस्ति न तु तदन्तानां शङ्का मनुमेयरूपाणां॰ नैष दोषः। संकीर्णत्वुद्देशोप[illegible]देशाविसर्पितत्रैवोक्तमत एवेत्संज्ञायां करणसाधनउपदेशशब्दः शास्त्रवाच्याश्रितः इह तु भावसाधन आश्रीयते तेन प्रतिपादनमात्रं गुणेर्वा प्रत्यक्षेणवोपदेश इत्युच्यते यद्विधानद्वारेण च बेभिघ इत्यस्य समुदायस्य क्रिया विशेषवचनस्याप्रतिपत्तिरस्तीति बेभि

सन्यङः तस्य स्थाने द्विर्वचनं तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः सन्भवतियः स एकाचउपदेशेऽनुदात्तः। अथापि द्विः प्रयोगो द्विर्वचनमेवमपि न दोषः। नलस्य भिघुपदेशउपदेशः किं तर्हि बेभिघुपदेशउपदेशः। अथापि भिघुपदेशउपदेश एवमपि न दोषः। अकारेणाव्यवहितत्वान्न भविष्यति॰ ननु च लोपे कृते नास्ति व्यवधानं॰ स्थानिवद्भावाद्व्यवधानमेव॰ पूर्वविधौ स्थानिवद्भावो न चायं पूर्वविधिः। पूर्वस्मादपि विधिः पूर्वविधिः। कः पुनरुपदेशोन्याय्यः। यः कृत्स्नः। कश्च कृत्स्नः। यउभयोः। यदि तर्हि यउभयोः स कृत्स्नः स च न्याय्यः।

घुपदेश इत्युक्ते बेभिघशब्दादिकृतिपावितीकृप्रत्यये ह्लोपयलोपयोर्बेभिदि इति भवति॰ अथवेत्संज्ञाविधावुच्चारणवचनउपदिशिर्गृह्यते तदुक्तमुद्देशश्च प्रातिपदिकानां नोपदेश इति॰ इह तु प्रतिपादनवचन इति विरोधाभावः। अथापि भिघुपदेश इति॰ उच्चारणवचने त्वुपदिशौ गृह्यमाणे प्रत्यक्षमाख्यानवचने वा भेदो नेत्यर्थः। द्विप्रकारउपदेश इत्युक्ते पृच्छति॰ कः पुनरिति॰ किं भिघुपदेशोऽथ बेभिघुपदेश इत्यर्थः। यः कृत्स्न इति॰ कृत्स्नकारित्वात्कृत्स्नः। स च भिघुपदेश एव॰ स हि सर्वसाधारणेन भेत्ता बेभिघत इत्येवमादीनां प्रतिपत्तिहेतुत्वात् उभयोरिति॰ केवलस्य भिदेर्बेभिघादेश्च तदवयवसमुदायस्य धातोर्ग्राहक इत्यर्थः। एतदुक्तं भवति॰ भिदादीनामेवोपदेशोऽस्ति न तु सनाद्यन्तानामवयवसमुदायानामुपदेशशब्दस्य साक्षात्प्रतिपत्तिहेतुशास्त्रवाचिन आश्रयणात्॥

शिवः
३५

वधइट्प्रतिषेधइति॰ भिद्युपदेश स्थानीयो हल्युपदेशस्तत्रहंतिरेकाजनुदात्तश्चेति सत्यपिवधेरुपदेशेऽनेकाच्त्वे हल्युपदेशधर्माश्रये इट्प्रतिषेधप्रसंगः। नचा
कारलोपस्ययं तत्रत्वात्रापि स्थानिवद्भावेनव्यवधानं सत्यपिस्थानिवत्वे प्रकृतिप्रत्यययोरानंतर्यात् घञि तेतु स्थानिवत्वादकारेण भिद्प्रत्यययोरानंतर्यं

वधइट्प्रतिषेधः प्राप्नोति॰ वधिषीष्टेति॰ नैषदोषः। आद्युदात्तनिपातनंकरिष्यते सनिपातनस्वरः प्रकृतिस्वरस्यबाधकोभविष्यति॰
एवमप्युपदेशिवद्भावो वक्तव्यः। सयथैव निपातनस्वरः प्रकृतिस्वरंबाधते एवं प्रत्ययस्वरमपिबाधेत॰ आवधिषीष्टेति॰ नैषदो
षः। आर्द्धधातुकीयाः सामान्येनभवंति अनवस्थितेषुप्रत्ययेषु तत्रार्द्धधातुके सामान्येवधिभावे कृते सति शिष्टत्वात्प्रत्ययस्वरो
भविष्यति॰ अथकेपुनरनुदात्ताः। आदंताअदरिद्राः इवर्णांताश्चाश्वि श्रिडीशीदीधीवेवीङः। उवर्णांताः युरुणुस्नुक्षुणुस्नूर्णुवर्ज
ऋदंताश्चाजागृवृङ्वृञः। शकिः कवर्गांतानां॰ पचिवचिसिचिमुचिरिचिविचिप्रच्छियजिभजिसञ्जिसृजित्यजिभुजिभ्रस्जिमस्जिरुजि
युजिणिजिविजिसंजिस्वंजयश्चवर्गांतानां॰ सदिशदिहदिछिदितुदिनुदिस्विदिभिदिस्कंदिसृदिखिद्यतिविंदिविद्यतिराधिसु
धिबुधिरुधिशुधिक्रुधिसाधिव्यधिबंधिसिध्यतिहनिमन्यतयस्तवर्गांतानां॰ तपितिपिवपिशपिक्षिपिलुपिलिपिस्वप्यापिक्षिपिस
पितृपिदृपियभिरभिलभियमिरमिनमिगमयः पवर्गांतानां॰ रुशिरिशिदिशिविशिलिशिस्पृशिदृशिक्रुशिमृशिदंशिलिषिमृ
षिकृषिश्लिषिविषिपिषिरुषिपुषिद्विषिघसिवसि ~~~~ दहिदिहि ~~ दुहिनहिरुहिवहिलिहिमिहयश्चोष्मांतानां॰ वसिः प्रसा
विबेदात॰ आद्युदात्तनिपातनमिति॰ तत्सामर्थ्यादुपदेशविषयानुदात्तताश्रयइट्प्रतिषेधोनभवति नह्येतदाद्युदात्तत्वंप्रयोगसमवायिप्रत्ययस्वरेणतस्य
बाधनात्॰ आर्द्धधातुकीयाइति॰ आर्द्धधातुकेभवाइतिवृद्धाच्छः। यदितआर्द्धधातुकविशेषनिमित्ता अपिअनवस्थितेषुप्रत्ययेषुभवंति तदायदुक्तंवधिभावा
त्सीयुटिचिण्वद्भावो विप्रतिषेधेनेतितद्विरुध्यते॰ अंतरंगत्वाद्वधेर्बहिरंगत्वाच्चिण्वद्भावस्यविप्रतिषेधायोगादिति चिंत्योत्र समाधिः॥ ॥७॥ ॥७॥

=आतोप्रत्ययइतिकर्तव्यं= =लनेपदं॰ २=

अत्रायमपाठः मृष सितिक्ष्वोपिसेट्। निवविधानात्॥

=तन्वेकाच [illegible] नित्यत्वे उपदेशग्रहणं [illegible] तदा श्रयणमिति विशेषं [illegible] =

भा॰के॰

३६

प्रतिषेध

४३॥ ॥कृञोऽसुट इति॰ कृञो पि सुट्कि करोतेर्भवत्येवेति कृञ्ग्रहणं॥ गुणोऽर्त्तिसंयोगाद्योरिति॰ ऋतश्च संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्त्तव्यमिति वचनेन॰ अनुगं
तत्वादिति॰ श्र्युकः कितीत्यत उगग्रहणमिहानुवर्त्तत इति मन्यते॰ एवमपीति॰ यद्यपि संप्रति नोगंतः तथाप्युपदेशे उगंत इति स्यात्प्रतिषेधः॥ किमर्थमुपदेशग्रहणमनु
वर्त्तत इति चेत्तु श्रेधेत्यादौ कृते पि गुणे इट्प्रतिषेधार्थं॰ यद्येवमुकस्तर्हि नानुवर्त्यं॰ एवं तर्हि एतदनेनोक्तं भवति सत्यपि सति चोगधिकारे कृञोऽसुट इत्यवश्यं
वाच्यमिति नार्थ उगधिकारेण॥ ॥श्वीदि॥ ॥स्तीर्त्वा स्तीर्णमित्यादीनामुपदेशग्रहणानुवृत्तिमंतरेण सिद्धेरभिधानादुपदेशाधिकारे ऽत्र नास्तीति मत्वा
ह॰ श्विग्रहणं किमर्थमिति॰ ननु च श्वित इति स्थिते संप्रसारणात्परत्वादिट् प्राप्नोति॰ नित्यत्वात्संप्रसारणं भविष्यतीति मन्यते॰ यस्य लक्षणांतरेण निमि
त्तमाश्रीयते इति पूर्वमेवोक्तं संप्रसारणनिमित्तत्वादिडभावस्य न स्थानिवत्त्वे ऽप्रवर्त्तनादनित्यत्वं संप्रसारणस्य तु कृताकृतप्रसंगित्वान्नित्यत्वं॰ श्विग्र
हणमिदं न तत्वादिति॰ एकाज्ग्रहणेनतरार्थता प्रत्याख्यानायानुपूर्व्या सिद्धमित्यादि तचोक्तं तत्रैकाज्ग्रहणमन्यार्थं स्वरुत्तरत्रापि प्रतिपत्तिगौरवपरिहाराय नुवर्त्यं

४४॥ ॥कृञोऽसुटः॥ कृञः अ सुट इति वक्तव्यं॰ इरुमा भूत्॰ संचस्करिव संचस्करिम॰ तत्तर्हि वक्तव्यं न वक्तव्यं॰ गुणे कृते रपरत्वे
चानुगंतत्वादिट्प्रतिषेधो न भविष्यति॰ एवमप्युपदेशाधिकारात्प्राप्नोति॰ तस्मादसुट इति वक्तव्यं॥ ॥श्वीदितो निष्ठायां॥ ॥श्वि
ग्रहणं किमर्थं॰ न प्रसारणे कृते प्रसारणपरपूर्वत्वे च उगंतात् इत्येव सिद्धं अत उत्तरं पठति॰ श्विग्रहणमिदं न तत्वादुपदेश

तनश्च जागरितइत्यत्र श्र्युकः कितीति इट्॥ स्य॰ श्विग्रहणं क्रियते इदं न तत्वादुपदेशस्य॰ उपदेश उगंतादिति उच्यते श्वयतिश्चोपदेशे इदंतः॥

प्रतिषेधो न भवति॰ ननु च यदा पर्यनेकाज्ग्रहणं प्रत्याख्यातमेवाद्युदात्तनिपातनाश्रयेणेदंत्युपदेशे गृह्यमाणे न तूक्तं॰ न ह्युपदेशे त्वाश्रीयमाणे एकाज्ग्रहणे
नैव बधेरिट् साध्यते॰ आद्युदात्तनिपातनेनाश्रीयमाणे वधिवीष्टे साद्युदात्तत्वप्रसंगनिवारणाय लिङीति विषयसप्तम्याश्रयणीया तथा च घानिषी
ष्टेति विप्रतिषेधाच्चि एवञ्भावानुपपत्तिरंतरंगत्वाद्वधिभावप्रसंगात्॰ यङ्लुग्निवृत्त्यर्थं चैकाज्ग्रहणं कर्त्तव्यं तस्मिन्क्रियमाणे यत्रैकाज्ग्रहणं किं
चित्सं चैतानि न यङ्लुकीति वचनात्वेभिदितेत्यादावयी इट्सिध्यति॰ उपदेशग्रहणमपि श्र्युकः किती सत्रानुवर्त्यं अन्यथास्तीर्त्वेत्यादि सिद्धये ऽनंतप्रका
रपरिहाराश्रयणे प्रतिपत्तिगौरवानुषंगः॥ इदमेवाश्विग्रहणमुपदेशाधिकारस्य न त्रज्ञापकं अन्ये तिहाश्विग्रहणं सर्वविधिभ्य इड्विधिर्बलीयानित्यस्य

=तेन श्वयिते संप्रसारणं सूर्वमिट्तत्तोनत्कासेडिति किल [illegible] भाष्यसंवादः

पे २

[illegible]

शिवः

३६

यस्यविभाषा॥ ॥विभाषागमहनविदविशामितिक्सेविकल्पविधानादेर्निष्ठायांप्रतिषेधःप्राप्नोतीतिमत्वाह। यस्यविभाषाविदेरिति। वेत्तिरत्र विवक्षितः। विद्लृलाभेइत्यस्यप्रतिषेधोभवत्येवविन्नइति। विद्यतिविनसोस्तुअनुदात्तत्वादिट्प्रतिषेधः। यदुपाधेरिति। उपाधिरभिधेयादिर्भेदकः। शविकरणस्यविभा षेति। विशिनातौदादिकेनसाहचर्यात्तौदादिकस्यैवलाभार्थस्यविभाषेतिलाभार्थस्यसत्यपिविदिरूपत्वेऽर्थस्यभेदकत्वेनरूपवदाश्रयणात्प्रतिषेधाभा वः। यद्यपिहंतिसाहचर्यंविदेरस्तितथापिशब्दपरविप्रतिषेधाद्विशिर्व्यवस्थाहेतुर्नहंतिः॥ ॥आदितश्च॥ ॥एवंतर्हीति। रूपाभेदेपियदुपाधीनांभेदकत्वंन स्याद्योगविभागोनर्थकःस्यात्। भेदकत्वेतुतेषांभावादिकर्मणोर्विकल्पविधानात्कर्त्तरिनिष्ठायांप्रतिषेधोनस्याद्भावादिकर्मणोरपिविकल्पप्रतिषेधयोर्वि

यस्यविभाषा॥ ॥यस्यविभाषाऽविदेः। यस्यविभाषाऽविदेरितिवक्तव्यं। इहमाभूत्। विदितः विदितवानिति। तर्हिवक्तव्यंनवक्त व्यं। यदुपाधेर्विभाषातदुपाधेःप्रतिषेधः। शविकरणस्यविभाषालुग्विकरणस्यायं॥ ॥आदितश्च॥ विभाषाभावादिकर्मणोः॥ ॥कि मर्थोयोगविभागः। नआदितोविभाषाभावादिकर्मणोरित्येवोच्येत। केनेदानींकर्त्तरिप्रतिषेधोभविष्यति। यस्यविभाषेत्यनेन। ए वंतर्हिसिद्धेसतियद्योगविभागंकरोतितज्ज्ञापयत्याचार्यः यदुपाधेर्विभाषातदुपाधेःप्रतिषेधइतिकिमेतस्यज्ञापनेप्रयोजनं यस्यविभाषाऽविदेरित्युक्तंतन्नवक्तव्यंभवति॥ ॥क्षुब्धस्वान्तध्वान्त॥ ॥क्षुब्धंमन्थाभिधानइतिवक्तव्यं। क्षुभितंमन्थेनेत्येवान्यत्रक्षु ब्धं। स्वान्तंमनोभिधानइतिवक्तव्यं। स्वनितंमनसेत्येवान्यत्रस्वान्तं। ध्वान्तंतमोभिधानइतिवक्तव्यं। ध्वनितंतमसेत्येवान्यत्रध्वान्तं॥ ॥

रोधात्प्रतिषेधोनस्यादितिकर्त्तृकर्मनिष्ठार्थोयोगविभागः। यदितर्ह्युपाधिर्भेदकस्ततउदितोवेतिक्त्वाप्रत्ययेभाववाचिनिविकल्पविधानाद्भाववाचिन्यामेवनिष्ठायां प्रतिषेधःस्यान्नकर्त्तृकर्मवाचिन्यां। नैषदोषः। तेननिर्वृत्तंनिर्वृत्तोऽक्षद्यूतादिभ्यइतिलिंगात्प्रत्ययार्थोभेदकत्वेननाश्रीयते॥ ॥क्षुब्ध॥ ॥क्षुब्धमिति। यदिधात्वर्थो पाधित्वेनमन्थादयआश्रीयेरन्मन्थादिसाधनेधात्वर्थेक्षुब्धादयोनिपात्यन्तइतितदाक्षुभितंमन्थेनेत्यत्रापिभावेक्तस्यप्रतिषेधःस्यादितिसमुदायाभिधेय भावेनमन्थादयइहोपात्ताइतिप्रदर्श्यते। द्रवद्रव्यसंपृक्ताःसक्तवोमन्थः। क्षुब्धांगिरिनदीमिवेत्यादयस्तुप्रयोगाअसाधवइत्याहुः। अन्येतुयत्नान्माश्रित्यसम

र्थयंते। स्वान्तंतत्रहृदेनवाद्येषुविषयेषुविक्षिप्तमनाकुलंमनउच्यते॥ ॥७॥

= प्रत्ययार्थोभेदकत्वेनेति। शब्देनाश्रीयमाणउपाधिरेवभेदकइत्यनेनज्ञाप्यते। साहचर्यत्वन्योपिप्रदेशान्तरे क्तोभाववाचित्वंतुप्रत्ययेननाश्रितमितिभावः॥ =

ढषि॰।। ।।वियातआवइति॰ विरूपंयातंगमनंयस्य सवियातोऽविनीतः।। ।।दढः।। ।।नदहेरिति॰ दृहदृहिदृह्यदृहिदृंहवृद्धावितिधातुषुपठ्यतेतत्रदृढःस्थूलबलयो रितिइडएवप्रतिषेधोविधेयइतिमतंमापमः।। दढनिपातनमिति॰दादेर्धातोर्घइतिघत्वस्यप्रतिषेधोवक्तव्यःस्यात् अनिड्वचनेहीति॰यदीणोघत्वस्यचप्रति षेधोविधीयतेततोढत्वधत्वष्टुत्वढलोपेषुयथाप्राप्तेदृढइतिरूपंसिध्यतितथापिपूर्वत्रासिद्धमितिढलोपस्यासिद्धत्वात्संयोगेगुर्वितिगुरुसंज्ञायांसत्यां तन्निबंधनकार्यप्रसंगोलघुसंज्ञाहेतुककार्याप्रसंगश्च॰दृढीयानिति॰रविधोपथुमइत्यादिपरिगणनमनपेक्ष्यैतेपरिगणनेहिविशेषणंनाप

धविशसीवैयासे॰।। ।।किमिदंवैयासइति॰वियातभावोवैयात्यं।। ।।दढःस्थूलबलयोः।। ।।दढइतिनिपातनंकिमर्थंनदहेर्नेङ्व तीत्येवोच्येत॰दढनिपातनेनकारहकारलोपार्थंपरस्यचढत्वार्थं॰दढनिपातनंक्रियतेनकारहकारलोपार्थं॰नकारहकारयो र्लोपोयथास्यात्परस्यचढत्वंयथास्यात् अनिड्वचनेहिरभावाप्रसिद्धिरलघुत्वात् अनिड्वचनेहिरभावस्याप्रसिद्धिःस्यात् द ढीयान्॰किंकारणंअलघुत्वात् नलोपवचनंच॰नलोपश्चवक्तव्यः।।इहचपरिदृढव्यगतःत्यपिलघुपूर्वस्येत्ययादेशोनस्यात् इहचपारिदृढीकन्येतिगुरूपोत्तमलक्षणःष्यङ्प्रसज्येत॰।। ।।परिपरिदृढः।। ।।परिदृढइतिकिमर्थंनिपात्यतेनपरिपूर्वाद्दृंहे र्नेङ्वतीत्येवोच्येत॰परिदृढइतिनिपातनंच॰किं॰नकारहकारलोपार्थंपरस्यढत्वार्थं॰अनिड्वचनेहिरभावाप्रसिद्धिरलघुत्वात् नलोपवचनंचेत्येव॰परिदृढीयानितिरऋतोहलादेर्लघोरितिरभावोनस्यात् इहचपरिदृढव्यगतइतिल्यपिलघुपूर्वस्येत्यया

ख्यानाद्भावःसिध्यति॰नलोपवचनंचेति॰दंहेरिदित्वान्नलोपोनप्रा ((देशोनस्यात् इहचपारिदृढीकन्येतिगुरूपोत्तमलक्षणःष्यङ्प्रसज्येत॰ प्नोतिदृहेस्तुस्थूलबलयोरिदिद्धितमितीष्यते॰दृहिदृहिदृंहिबृहिवृद्धावेवधातुपठ्यतेइतिवार्त्तिककारामिप्रायंकेचिदाहुः।तथाचदृंहेरप्यनिदितिनलोपमुक्तवान् भाष्यकारस्तत्वचनप्रत्याख्यानात्तुचतुष्टयमिदंपारिदृढीति॰दतोमनुष्यजातेरितिङीष्।। ।।प्रणौ।। ।।परिदृढव्येति॰कथंपुनरत्रल्यबादेशोयावतापरि दृढमाचष्टेइतिणिचिकृतेक्त्वाप्रत्ययेचक्त्वांतस्यकृदंतत्वात्तत्रैवपरेरंतर्भावात्पुनःसमासाभावः।।नैषदोषः।संग्रामयतेरेवसोपसर्गात्प्रत्ययोत्पत्तिर्नान्यस्मादिति

दरिशब्दंपक्षवाद्दढशब्दादेवणिक्रियतेततोवृद्धिशब्दस्यधातुत्वात्क्त्वाप्रत्ययकृतेप

मावितिरु

=एवंतर्हिईशे तुघोषिरितिस्यादितिभावः।९=

घुषि॰॥ ॥किमर्थमिति॰घुषिरविशब्दनेन्चुरादौपठ्यते स विशब्दने नैव वर्त्तते यस्तु घुषिर्विशब्दने इति चुरादौ पठ्यते तस्मान्निचा भवितव्यं केवलश्चेद्घुषि रूपात्तश्
तिनार्थो विशब्दन इति प्रतिषेधेन॰विशब्दनं स्वाभिप्रायस्य शब्देन प्रकाशनमुच्यते॰एवं तर्हीति॰अविशब्दन एवेडभावे सिद्ध इत्यर्थः॥किमेतस्येति॰किं निष्ठायां
घुषितं घोषितमिति रूपद्वयसिद्धिः प्रयोजनमथान्यदपीति प्रश्नः॥जुघुषुरिति॰घोषयांचक्रुरित्यपि भवति॰अन्ये त्वनित्यत्वं णिचोऽस्य ज्ञापकमाहुः॥इति साम
न्येन ज्ञाप्यत इत्याहुः॥केचित्तु तिस्मिन्सामिनी दिवं चुरादिणिचो ऽनित्यत्वस्य ज्ञापकमाहुः॥इदित्वेन नुम्विधाने प्रयोजनं चिंतितः इत्याशेन लोपाभावः यदि
च चुरादिणिच् नित्यः स्यात्तदा चिंतस्मिन्नामिसे वपठेत् णिचि सति नलोपाप्रसंगात्॥ ॥णेरध्य॰॥ ॥किंपुनरिति॰किमभिधेयत्वेन क्रांतस्याध्ययनम

घुषिरविशब्दने॰॥ ॥किमर्थमविशब्दन इत्युच्यते न विशब्दने चुरादिणिचा भवितव्यं एवं तर्हि सिद्धे सति यदविशब्दन इत्याह तज्
ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज्भवतीति॰किमेतस्य ज्ञापने प्रयोजनं॰महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः एष
प्रयोग उपपन्नो भवति॥ ॥णेरध्ययने वृत्तं॥ ॥किंपुनरिदमध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते आहोस्विदध्यय
ने चेद्वृत्तिर्वर्त्तन इति॰किं चातः॥यद्यध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते सिद्धं वृत्तो गुणः वृत्तं पारायणं॰वृत्तं गु
णस्य वृत्तं पारायणस्येति न सिध्यति॰अथ विज्ञायते ऽध्ययने चेद्वृत्तिर्वर्त्तत इति न दोषो भवति॰यथा न दोषस्तथास्तु॰अध्यय
ने चेद्वृत्तिर्वर्त्तत इत्यपि विज्ञायमानेन सिध्यति॰किं कारणं॰वृत्तिरयमकर्मकः॥अकर्म

श्रीयते अध्यायत्वर्थसाधनत्वेनेति प्रश्नः॥अध्ययने चेदिति॰(ने चेद्वृत्तिर्वर्त्तत इत्यपि विज्ञायमानेन सिध्यति किं कारणं वृत्तिरयमकर्मकः॥
अध्ययनविषये धात्वर्थे इत्यर्थः॥वृत्तो गुण इति॰अध्ययनसामान्यं वृत्तशब्दस्याभिधेयं ननु तद्विशेष इति विशेषवाचिशब्दप्रयोगाविरोधः॥गुणः पदक्रमसं
हितारूपोऽध्ययनविशेषः॥वृत्तो निष्पादित इत्यर्थः॥वृत्तं गुणस्येति॰भावे निष्ठा तस्या अध्ययनं नाभिधेयमिति वृत्तशब्दप्रयोगाप्रसंगः॥न सिध्यतीति॰एवं
तस्येति भावः॥एवं तस्य सकर्मकत्वाद्वृत्तं गुणस्येति भावे निष्ठाया अप्रसंगात् योरेव...सकत्वलर्थाइ सत्र भावे ऽकर्मकेभ्य इत्यनुवर्त्तनात्॥वृत्तिरयमिति॰केव
लस्य सकर्मकत्वाशंकानिराकृतत्वं तस्य सकर्मकत्वं प्रतिपादयति॰प्रयोज्यमंतरेण णिचो भावात्तेनास्य सकर्मकत्वं॥ ॥छ॥ ॥श्रीः॥ ॥

=अध्ययनशब्दे...कर्मत्युक्ते...अध्ययने चेद्वृत्तिर्वर्त्तत इति भाष्यमनुपपन्नमत आह॰अध्ययनविषय इति॰४=

=कर्त्तृशेषविवक्षायामित्यर्थः॥२=

तवैतत्स्यात्‌ भवतु सकर्मकत्वं कर्मण्येवाच निष्ठा भवतिस्यात्‌ अकर्मकश्चात्रेति॰ वृत्तं गुणस्येत्यादावित्यर्थः॥ अकर्मकाणामिति॰ भावे क्तविधानादकर्मकत्वं प्र
तीयत इत्यर्थः॥ कर्त्तणि क्ते वृत्तो गुण इति सामानाधिकरण्येन भाव्यं भावे तु क्ते शेषविवक्षायां षष्ठी भवति॰ तस्मान्नैतदेवं तस्य वृत्तेरूपमपि तु केवलस्य तस्य
चमस्य विभाषेतीट्‌प्रतिषेधोऽस्त्येव॰ एवं चाध्ययनमभिधेयं भवतु विषयो वेति न कश्चिद्दोषः॥ अत्राहुः॥ वृत्तं गुणस्येति सकर्मकादपि एवं तान्नपुंसके
भावे क्त इति भावे कोऽस्त्येव॰ यस्तु निष्ठेति मूले क्तः स एवाकर्मकेभ्यो भावे भवति वृत्तं गुणस्येत्यत्र च वर्त्तमानत्वं प्रतीयते न भूतत्वं॰ अत्रोच्यते॰ नपुंसके
भावे क्त इत्ययमपि क्तः सकर्मकेभ्यो न भवति॰ तयोरेवकृत्यक्तखलर्था इत्यत्र क्तमात्रस्य ग्रहणात्तत्र च भावे चाकर्मकेभ्य इत्यनुवर्त्तनात्‌ अवश्यं

अकर्मकश्चात्र वृत्तिः॥ कथं पुनर्ज्ञायते अकर्मकोऽत्र वृत्तिरिति॰ अकर्मकाणां भावे क्तो भवतीत्येवमत्र भावे भवति॰ ततउदितः क्ति विभाषाय
स्य विभाषेतीट्‌प्रतिषेधो भविष्यति॰ अथ णिग्रहणं किमर्थं॰ वृत्तनिपातने णिग्रहणमण्यन्तस्यावधारणप्रतिषेधार्थं॰ वृत्तनिपा
तने णिग्रहणं क्रियते अण्यन्तस्यावधारणं माभूदिति॰ केमर्थ्यान्नियमो भवति विधेयं नास्तीति कृत्वा॰ इह चास्ति विधेयं ण्यधिका
दृते रिट्‌प्रतिषेधो विधेयः॥ तत्रापूर्वो विधिरस्तु नियमोऽस्त्विति अपूर्व एव विधिर्भविष्यति न नियमः॥ कुतो नु खल्वेतत्‌ अधिकार्थमा
रंभे सति ण्यधिकस्य भविष्यति न पुनः सन्नधिकस्य वा स्यात्‌ णिऽधिकस्य वेति॰ तस्मात्‌ णिग्रहणं कर्त्तव्यं॰ अथ किमर्थं निपातनं क्रियते॰ नि
पातनं णिलोपे गुणप्रतिषेधार्थं॰ निपातनं क्रियते णिलोपार्थमिड्गुणप्रतिषेधार्थं च॥

तास्मयोगेष

चेन बोद्धव्यं॰ अन्यथा नपुंसके भावे उपसंख्यानमित्यस्मिंश्छेष वि
ज्ञानात्सिद्धमिति प्रत्याख्याते सकर्मकाद्भावे क्ते विधीयमाने कर्मणो द्वितीयाप्रसज्येत यथा भगवतं मोदनं भुक्तमिति॰ अथ णिग्रहणं किमर्थमिति॰ केवलस्य यस्यावि
भाषेति प्रतिषेधस्य सिद्धत्वात्सामर्थ्यादण्यन्तस्य निपातनं विज्ञास्यते॰ वृत्तनिपातन इति॰ असति णिग्रहणे एवं तस्यैवेदं निपातनं न तु सन्नन्तस्य यडन्तस्येति निश्चया
भावादिदिधिरभावो मा भूदुपगंतुमिति नियमो विज्ञायते॰ णिलोपार्थमिति॰ निष्ठायां सेटीति वचनादनिटि निष्ठायां णिलोपो न प्राप्नोति गोरनिटीत्यनेनापि
तकौं डिन्यन्यायेन सेटि निष्ठायां विधीयमानेन णिलोपेनानिटि निष्ठायां णिलोपस्य बाधनात्‌ प्रत्ययलक्षणेन प्राप्तस्य गुणस्य प्रतिषेधश्चाभावो निपात्यते॥

=अध्ययनमल्येनेत्येवमित्यर्थः॥२= =शेषत्वाविवक्षायां॥४= विधिरभावाइति॰ एवं तस्यैवेदं तेनर्थकत्वेहि तस्मान्निष्ठायां णिलोपे प्रतिषेधयोर्लक्षणं तरेणा प्राप्स्यात इत्यर्थमिदं समाधानमित्यर्थः॥२=

वर्ण्यविशिष्टानीत्यत्र तात्पर्यं अन्यथा पदांते युक्ति र्विकल्पेत

वादांत॥ ॥उपधादीर्घत्वमिति॥ पूर्वत्रासिद्धेन स्थानिवदिति वक्तव्यं तस्मिंश्चोच्यमाने द्विर्वचनादौ निवृत्ते लोपस्वरपदांतवर्जं न वक्तव्यानीति दीर्घविधौ स्थानिवत्वनिषेधादनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वाप्रसंगः॥ क्वात्रं आश्रयेणानुदीर्घत्वासिद्धिं भाष्यकृन्मन्यते॥ ॥हृषे॥ ॥क्तः अकारो लोमशब्दं सामा

वादांतशांत॥ ॥दांतशांतयोः किं निपात्यते॥ दांतशांतयोरुपधादीर्घत्वं च॥ किंच॥ णिलोपे इट्प्रतिषेधौ च॥ उपधादीर्घत्वमनिपात्यं यद्यसिद्धं न सिध्यति॥ मितां ह्रस्व इति ह्रस्वत्वेन भवितव्यं॥ एवं तर्ह्यनुनासिकस्य क्विझलोः क्ङितीत्येवात्र दीर्घत्वं भविष्यति॥ न सिध्यति॥ किं कारणं॥ णिचा व्यवहितत्वात्॥ णिलोपे कृते नास्ति व्यवधानं॥ स्थानिवद्भावाद्व्यवधानमेव॥ प्रतिषिध्यते च स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति॥ अपस्पष्टच्छन्नयोः किं निपात्यते॥ स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च॥ किंच॥ णिलोपे इट्प्रतिषेधौ च॥ ॥क्ष्व्यमत्वर॥ ॥घुषिस्वनो र्वावचनमिट्प्रतिषेधाद्विप्रतिषेधेन॥ घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्भवति विप्रतिषेधेन॥ घुषेरिट्प्रतिषेधस्यावकाशः असंपूर्वाद् विशब्दनं॥ घुष्टा रज्जुः॥ घुष्टो मार्गः॥ वावचनस्यावकाशः संपूर्वाद्विशब्दनं॥ संघुष्टं वाक्यं॥ संघुषितं वाक्यं॥ संपूर्वाद्विशब्दने उभयं प्राप्नोति॥ संघुष्टा रज्जुः॥ संघुषिता रज्जुः॥ वावचनं भवति विप्रतिषेधेन॥ स्वन इट्प्रतिषेधस्यावकाशः॥ अनाङ्पूर्वान्मनोभिधाने॥ स्वांतं मनः॥ वावचनस्यावकाशः॥ आङ्पूर्वादमनोभिधानं॥ आस्वांतो देवदत्तः॥ आस्वनितो देवदत्तः॥ आङ्पूर्वान्मनोभिधाने उभयं प्राप्नोति॥ आस्वांतं मनः॥ आस्वनितं मनः॥ वावचनं भवति विप्रतिषेधेन॥ ॥हृषेर्लोमसु॥ ॥हृषेर्लोमकेशकर्तृकस्येति वक्तव्यं॥ हृष्टानि लोमानि हृषितानि लोमानि॥ हृष्टं लोमभिः॥ हृषितं लोमभिः॥ हृष्टाः केशाः॥ हृषिताः केशाः॥ हृष्टं केशैः॥ हृषितं केशैः॥ विस्मितप्रतिघातयोरिति वक्तव्यं॥ हृष्टो देवदत्तो हृषितो देवदत्तः॥ हृष्टा दंताः॥ हृषिता दंताः॥ ॥अपचितश्च॥ ॥अपचित इति किं निपात्यते॥ चायश्चिभावो निपात्यते॥ अपचितः॥ किमिति

न्यशब्दं मत्वा केशग्रहणं न कृतवांस्तत्पाच्च लोमन एवं स्पर्शो चं कर्तव्यमिति युक्ते केशस्पर्शे पि लोमेत्यं चक्रियते॥ वार्त्तिककारस्तु स्पष्टमिति वक्तव्यं॥ अपचितिः॥ मूर्द्धजाः केशाः अंगांतरजानि लोमानीति भेदं मत्वाह॥ हृषेर्लोमकेशकर्तृकस्येति॥ ॥अपचि॥ ॥चिभावइति॥ एतच्चोपलक्षणं इट्प्रतिषेधस्यापि निपातनात् किं

आर्द्ध॰॥ ॥रुधादिभ्य एवेति॰ सार्वधातुक एवेति नियमस्तु रुदविदेति क्वासनोः कित्वविधानान्न भविष्यति अनिटः सनो रुदादेर्हलंतात्वेति कितस्य सिद्धत्वात्को
प्यनिट् औपदेशिककित्वस्याभावात्॰ स्त्रुभ्यामिति॰ किंवताधातुत्वं न जहातिरूपापर्यवैकल्यात्॰ विहितविशेषणमिति॰ यद्यपि कृत इत्धातोरित्यत्र धातुग्रहो

आर्द्धधातुकस्येड्वलादेः॥ ॥आर्द्धधातुकग्रहणं किमर्थं॰ यथा वलादिग्रहणमार्द्धधातुकविशेषणं विज्ञायेत वलादेरार्द्धधातुकस्येति
अथाक्रियमाणे आर्द्धधातुकग्रहणे कस्य वलादिग्रहणं विशेषणं स्यात्॰ अंगस्येति वर्त्तते॰ अंगविशेषणं॰ तत्र को दोषः॰ अंगस्य वलादे
रादितं इट् प्रसज्येत॰ अगाङ्गतु॰ तद्यथा अगवां गस्यादितो न वतस्तद्वत्॰ क्रियमाणे प्यार्द्धधातुकग्रहणे॰ निष्ठः शक्यो विज्ञातुं व
लादेरार्द्धधातुकस्य यदंगमिति॰ अक्रियमाणे चेष्टमंगस्य यो वलादिरिति॰ किंचांगस्य वलादिर्निमित्तं यस्मिन्नंगमित्येतद्भव
ति॰ कस्मिंश्चैतद्भवति प्रत्यये॰ यावता क्रियमाणे चानिष्टं विज्ञायते अक्रियमाणे चेष्टं तत्राक्रियमाण एवेष्टं विज्ञास्यामः॥ इदं तर्हि
प्रयोजनं॰ इह मा भूत्॰ आस्ते शेते॰ एतदपि नास्ति प्रयोजनं॰ रुदादिभ्यः सार्वधातुक इत्येतन्नियमार्थं भविष्यति॰ रुदादिभ्य एव
सार्वधातुक इड्भवति नान्येभ्य इति॰ एवमपि रक्षसं रक्षतात्र प्राप्नोति॰ धातोरिति वर्त्तते॰ एवमपि त्वभ्यां पद्भ्यामत्र प्राप्नोति
एवं तर्हि विहितविशेषणं धातुग्रहणं धातोर्यो विहितः॥ ननु च धातोरेवायं विहितः॥ न चायं धातोरित्येवं विहितः॥ क्व पुनर्धा
तुग्रहणं प्रकृतं॰ कृन्नरधातोरिति॰ न द्वेषषष्ठीनिर्दिष्टं पंचमीनिर्दिष्टेन चेह विहितं शक्यते विशेषयितुं॰ अथेदानीं षष्ठीनिर्दिष्टे
[ना]पि विहितं शक्यते विशेषयितुं शक्यमार्द्धधातुकग्रहणमकर्त्तुं॥ ॥इति महाभाष्ये स

र्षपदार्थकस्तथापि सदृशाप्राप्तांतरानुमानादि इह धा
तोरित्येतत्स्वरूपपदार्थकमाश्रीयते धातोरित्येवं विहितस्येति॰ पंचमीनिर्दिष्टेनेति॰ पंचम्यंतानुकरणे धातोरित्यस्मिन्धातोरित्येवं विहितस्येति तस्य
तेनान्यथा॰ अथेदानीमिति॰ धातुशब्देन धातुशब्दस्यानुकरणं तेन धातुशब्दस्य संबंधी यः प्रत्ययस्तस्येड्भवति यश्च धातुशब्दव्यापारे सन्न स्तत्संबंधी भवति॥ ॥

=अन्यथा निषेधबाधकतया विधित्वमेव स्याद्विधिनियमसंभवे विधेर्गरीयस्त्वान्नतु नियमत्वं·१ =अक्रमीत् अक्रमीदित्यादौ·१= प्रक्रोषीदिप्रक्रंसीदित्यादौ·१= स्नुक्रमोरात्मनेपदनिमित्त इति प्रतिषेधवाधनार्थत्वं तस्य स्याद्यात्मनेपदपरत्वात् प्रस्नुद्भ्यादिति·२= एवंच प्रतिषेधार्थमेवेदं सूत्रं नतु कित्वादेर्विध्यर्थं·४=

स्नुक्रमो॰ ॥ ॥स्नुक्रमोः कृदादितानादिति सिद्धे नियमार्थं वचनं अनात्मनेपदनिमित्त एव यथा स्यादात्मनेपदनिमित्ते मा भूत् कित्वि सनि च स्नोतेः प्रस्नुतः प्रस्नुस्नूषती तिक्र मेश्च निष्ठायां क्रान्त इति स्नुकः कितीति सनियमहत्वहोश्चेत्यस्य विकल्पेति निषेध एव पुरस्तात्प्रतिषेधस्य हेतदेव प्रयोजनं एतावस्य प्रतिषेधो यथा स्यात्तेन प्रतिषे धबाधनार्थमेतत् भवति· अथवाईधातुकस्येड्वलादेरित्यस्यानुवर्तमानस्यमनर्थो भवति यच्चपूर्वेलेट्विहितस्तत्रैवानेन भवति पूर्वस्त्रेण प्रतिषेधवि षयपरिहारेण विधानात्त्रैवायं विधिः प्रवर्त्तमानो नियमाय संपद्यते· अथवा आत्मनेपदनिमित्तत्वेन भवतीति प्रसज्यप्रतिषेधे आश्रीयत इति किदादौ न दोषः प्रस्नविते ति· य एवात्मनेपदविषयः स्नौतिः स एवात्रापि योग्यताश्रयेणानिमित्तव्यवहारदर्शनादात्मनेपदनिमित्तं भवतीति इडे प्राप्नोतीति वचनं· कर्मकर्तृविषयश्चास्नौतिरिति कर्मकर्तर्यात्मनेपददर्शनाद्भवतिनयोग्यः एवं प्रस्नवितुं प्रस्नवितव्यमिति भावकर्मविषयता भावक

स्नुक्रमोरनात्मनेपदनिमित्ते॥ ॥स्नुक्रमोरनात्मनेपदनिमित्ते चेत्युपसंख्यानं कर्त्तव्यं· प्रस्नविता प्रस्नवितुं प्रस्नवितव्यं·प्रक्रमि ता प्रक्रमितुं प्रक्रमितव्यं· तत्तर्हि वक्तव्यं न वक्तव्यं·अविशेषेण स्नुक्रमोरिडागममुक्त्वा आत्मनेपदेनेति वक्ष्यामि· आत्मनेपदपरप्रति षेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः आत्मनेपदपरपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः तत्परपरे तावत् प्रस्नुस्नूषिष्यते प्रचिक्रंसिष्यते सी

परप्रतिषेधेन

र्णयोरात्मनेपदोपलंभादात्मनेपदनिमित्तं स्नौतिः प्रक्रमितेति· आदिकर्मणि ल्युट् च प्रशंसेति विज्ञेयः आदिकर्मणि तु कर्तरि चात्मनेपदविषया स्नौतीति प्रतिषेधेन भावः प्रक्र मितुं प्रक्रमितव्यमिति· भावकर्मविषयता तात्पर्यं भावविषयता ह्यात्मनेपदनिमित्तत्वं· प्रस्नुस्नूषिष्यत इति· आत्मनेपदपरः सः तत्परः सन्निति स्यन व्यवहितत्वात्सन इ ट् प्रतिषेधो न प्राप्नोति· ननु च व्यवहितेपि परशब्दस्य वर्त्तमानः प्रतिषेधो न विष्यति· नैतदस्ति· आत्मनेपदपरेनेति नस्त्वन्यासः किंतर्ह्यर्थप्रदर्शनपरमेतत् स्नु क्रमोरनात्मनेपदनिमित्त स्त्वन्यासः न च तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद् व्यवहितस्य प्रतिषेधाप्रसंगः ननु च सनियमहत्वहोश्चेति प्रति षेधो न विष्यति· न स्यान्निमित्तधिः पूर्व प्रतिषेधविषय इति प्रागेवोक्तं यद्यप्युक्तमविशेषेणेति न सोयमर्थः पूर्वसूत्रेण नः स्नुक्रमोरविशेषेणोक्तः न म द्यात्मनेपदपरप्रतिषेधो विधेयः एवं तर्हि प्रचिक्रंसिष्यत इत्येतदेवात्रोदाहरणं प्रस्नोषीष्ट इति· आत्मनेपदमेवात्र सीयुड् आर्द्धधातुकं सीयुक्तस्तु क्रमेरात्मनेपदनिमित्तता

=भावकर्मविषयत्वे हि भोपाभ्यां समर्थाभ्यामित्यात्मनेपदनिमित्तता प्रक्रमते उपक्रमत इत्यादौ वृत्तिसर्गतायनेषु क्रमः इत्यात्मनेपदं सामर्थ्यं·५=

=ननु कर्मकर्तृविषये ·२= यथा स्नौति प्रस्नौति ·२=

=नत्वेकादेशेप्रसतनिषेधाप्रवृत्तिः प्रकारांतरेणापिसिद्धा·प्रश्लोष्यतइसादेसमप्राप्तयोर्विधिनिषेधयोर्विधिबाधेनचरितार्थस्यनिषेधस्यप्रश्लोष्यंतइसत्रोक्तरीसेकादेशेप्रसतिप्राप्यमाणस्य ततःप्रागेवप्राप्तविधिबाधकत्वायोगादत्रआह्अतएवेति·नत्रत्वे

भा·के·

४०

प्रश्लोष्यंतइति· अर्थांतरंगत्वान्नित्यत्वाच्चपूर्वमेकादेशेनभाव्यमिट्प्रतिषेधस्तुबहिरंगोनित्यश्च·याणीदांगवलीयइत्यनेनत्वेकनिमित्ताप्रवृत्तिर्वार्णस्यप्रतिषिध्यतेनतुभिन्ननिमि त्ततिस्यादेवेडागमः·अतएवेधपिकर्त्तव्येयाणीदांगइत्यस्यानुपस्थानं·एकादेशःपूर्वविधाविति·नतुचार्धधातुकस्येट्प्रतिषेधउच्यतेनचार्धधातुकमेकादेशात्पूर्वव्यपव र्गाभावात्·अत्राहुः·पूर्वस्मादपिविधिःपूर्वविधिरितिसमासाश्रयणाददोषः·प्रस्तविश्रीयतइति·तज्जंतात्यइरीडृतइतिरीङादेशः·बहिरंगलक्षणामिति·तज्जं तादन्यारलक्षणेक्रियांतरेऋइतितआत्मनेपदमिडागमस्तुपूर्वमेवतज्जंतावस्थायामुसन्नोनशक्योनिवर्त्तयितुमित्यर्थः·यद्येवंप्राचिकेसिष्यतइत्यत्रात्मने

एकादेशेप्रश्लोष्यंतेप्रक्रंस्यंते·एकादेशेकृतेव्यपवर्गाभावान्नप्राप्नोति·अंतादिवद्भावेनव्यपवर्गः·उभयतआश्रयेनांतादिवत्·एवंतर्ह्येका देशःपूर्वविधौस्थानिवद्भवतीतिस्थानिवद्भावाद्व्यपवर्गः·तत्परपरस्मीमुद्देस्तर्हिप्रतिषेधोवक्तव्यः·सिद्धंतुस्लोरात्मनेपदेनसमान पदस्थस्येट्प्रतिषेधात्·सिद्धमेतत्·कथं·स्लोरात्मनेपदेनसमानपदस्थस्यनेड्भवतीतिवक्तव्यं·यदिस्लोरात्मनेपदेनसमान पदस्थस्यनेड्भवतीत्युच्यतेप्रस्नवितेवाचरतिप्रस्नविश्रीयतेअत्रनप्राप्नोति·बहिरंगत्वाच्च·बहिरंगलक्षणमचात्मनेपदं·क्रमेश्च·क्र मेश्चात्मनेपदेनसमानपदस्थस्यएनभवतीतिवक्तव्यं·अथकिमर्थंक्रमेःपृथग्ग्रहणंक्रियतेनस्नुक्रमिभ्यामित्येवोच्येत·कर्त्तरिचात्म नेपदविषयात्कृतिनेतिवक्ष्यतितत्क्रमेरेवयथास्यात्स्नोर्मामूत्·प्रस्नवितायतिप्रस्नवितारौप्रस्नवितारः·कर्त्तरिचात्मनेप दविषयात्कृतिप्रतिषेधः·कर्त्तरिचात्मनेपदविषयात्कृतिप्रतिषेधोवक्तव्यः·प्रक्रंताउपक्रंता·तत्तर्हिवक्तव्यं·स्लोरात्मनेपदेनस मानपदस्थस्यएनभवतीतिवक्तव्यंक्रमेश्चेतिवक्तव्यंकर्त्तरिचात्मनेपदविषयात्कृतीतिवक्तव्यं·सूत्रंचभिद्यते·यथान्यासमेवास्तु·॥

पदस्यबहिरंगत्वात्प्रतिषेधोनप्राप्नोति·नैषदोषः·समानपदस्थस्येतिवचनादिडागमेनपदावस्थापेक्षणीयातत्रतत्रचिविभक्त्याकुसन्नायांलब्धेपिपदत्वेआत्मनेप दस्यासन्निधानादिडागमःप्रवर्त्तते·प्राचिकंसिष्यतइत्यत्रतुपदावस्थायामेवात्मनेपदसन्निधानात्प्रतिषेधप्रवृत्तिः·आत्मनेपदविषयादिति·तद्योग्यादित्यर्थः·प्रक्रंते ति·प्रारंभविषयात्क्रमेःप्रोपाभ्यांसमर्थाभ्यामित्यात्मनेपदविषयत्वं·॥

शिवः

४०

स्नुक्रमीएवेति॰ अनात्मनेपदनिमित्ते इति प्रथमाद्विवचनं ननु सप्तमी सप्तम्यां हि आवादेरात्मनेपदनिमित्तस्य ■श्रयणं स्नस्तवितव्यमित्यादावपि प्रतिषेधः स्यात् कथं पुनरिति॰ हसा
दिरर्थ आत्मनेपदस्य निमित्तं न धातुरिति भावः॥ धातुरेवेति॰ हसाद्यर्थविशिष्टः॥ भावकर्महन्तादिति॰ भावकर्मणोर्धातोरेव विषयभावेन विशेषणेऽयमर्थः॥ सस्यात्मनेपद
इति॰ न योग्यतामात्राश्रयमिह निमित्तत्वमाश्रीयते किंतु कार्यं कुर्वतः॥ यद्येवमर्थेऽपि निमित्तत्वेनाश्रीयमाणे दोषाभावात्कस्मात्स्नुक्रमी एवेत्युक्तं॰ उच्यते॰ अर्थे निमि
त्तत्वेनाश्रीयमाणेऽनुपसर्गाद्वेत्यात्मनेपदमर्थनिरपेक्षत्वादसंगृहीतं स्यादिति धातुरेव निमित्तत्वेनाभिमतः॥ यदि सति कार्ये निमित्तमाश्रीयते तदा निमित्तग्र

ननु चोक्तं स्नुक्रमोरनात्मनेपदनिमित्ते चेत्क्रसुपसंख्यानमिति॰ नैष दोषः॥ स्नुक्रमी एवात्मनेपदनिमित्तत्वेन विशेषयिष्यामः॥ न चेत्स्नुक्र
मीआत्मनेपदनिमित्ते इति॰ कथं पुनर्धातुर्नात्मनेपदस्य निमित्तं स्यात्॰ धातुरेवात्मनेपदनिमित्तमित्याह॰ आह हि भगवाननुदात्तङित
आत्मनेपदं शेषात्कर्त्तरि परस्मैपदमिति॰ पचति हि धातुर्नाश्रीयते भावकर्मणोरात्मनेपदमिति॰ अत्रापि धातुरेवाश्रीयते भावकर्महन्ता
धातोरिति॰ कथं प्रक्रमितव्यं॰ सत्यात्मनेपदे निमित्तशब्दे वर्त्तते॰ कथं प्रक्रंता उपक्रंता॰ तस्मादसत्यपि॰ कथं प्रक्रमितव्यमुपक्रमितव्यं
तस्मात्सत्येव॰ कथं प्रक्रंता उपक्रंता॰ वक्तव्यमेतत्॰ कर्त्तरि चात्मनेपदविषयात्कृतीति॰ अथवा कृतीति वर्त्तते॥ ॥ग्रहोऽलिटि दीर्घः॥ ॥ग्रहे
र्दीर्घत्वेऽग्रहणं रकर्त्तव्यं॰ इटो दीर्घ इति वक्तव्यं॰ न वक्तव्यं॰ प्रकृतमनुवर्त्तते॰ क्व प्रकृतमार्द्धधातुकस्येड्वलादेरिति॰ एवमपि कर्त्तव्यमेव॥

हणं न कर्त्तव्यं॰ आत्मनेपद इति सत्सप्तम्याश्रयणात्॰ नैतदस्ति॰ तस्मिन्निति ॥अकरणे ह्यसंप्रत्ययः षष्ठ्यभावात्॰ अक्रियमाणे हीड्ग्रहणे असंप्रत्ययः स्यात्॰
निर्दिष्टे पूर्वस्येति परिभाषायां सत्सप्तम्याश्रयणस्याशक्यत्वात्॰ अथवा कृतीति वर्त्तत इति॰ तच्च कृद्ग्रहणं वाक्यभेदेन क्रमित्यैव संबध्यते न स्नौतिना॰ अ
नात्मनेपदनिमित्त इति च प्रसज्यप्रतिषेधस्तेनायमर्थः॥ यदास्यात्मनेपदयोग्यः क्रमिस्तदा ततः परस्य कृत इडागमो भवति॥ ॥ग्रहो॥ ॥इड्ग्रहणमिति॰
आदेशस्य स्थानिनिर्देशार्थं षष्ठ्यर्थं इड्ग्रहणं कर्त्तव्यं॰ एवमपीति॰ सत्येव प्रथमांत इड्ग्रहणे षष्ठ्यंतमन्यत्कर्त्तव्यमित्यर्थः॥ अक्रियमाणे हीति॰ प्रथमांतमिड्ग्रहणम
योग्यत्वान्न संबध्यते॰ अपरिभाषोपस्थानाच्चानन्तरस्य ग्रहेः परस्य दीर्घप्रसंगः॥ असंप्रत्यय

वर्त्तते॰
=आत्मनेपदे [illegible] सतीत्यर्थः॥४=

=[illegible]=

क्रियमाणेऽइति·प्राकरणिकमिटंनपेक्षेत इत्युच्यमानेसर्वस्येटोविशेषाभावाद्दीर्घप्रसंगाच्चिण्वदिटोदीर्घप्रतिषेधः।जरीगृहीतेति·जरीगृहमाहान्त्यइत्य
ल्लोपयलोपयोःकृतयोर्द्विःप्रयोगोद्विर्वचनमितिसरनगृहिरिटोदीर्घप्रसंगः।दीर्घविधौस्थानिवत्त्वनिषेधादकारेणव्यवधानाभावः।यदिपुनरितिःइडिनिव
र्त्तनेदीर्घइतिनिर्दिश्यतेतत्रदीर्घइड्भवतीतिसामर्थ्याद्व्यक्तिपरित्यागेनेकारजातिराश्रीयतेदीर्घग्रहणाच्चदीर्घव्यक्तिसमवेतासाविधीयतेटकारोदेशविध्य
र्थइतिसामर्थ्यादीडागमविधिःएवंचषष्ठीनिर्दिष्टमिड्ग्रहणंनकर्त्तव्यं·चिण्वदिडस्यापवादइतितत्रदोषाभावः।नचकस्यचित्स्थानिनोदीर्घत्वंविधीयतइ
तिस्थानिवत्त्वानिषेधात्पूर्वस्मादपिविधौस्थानिवत्त्वादकारेणव्यवधानाद्यङ्लोपेईटोऽप्रसंगः।अथत्वागमांतरेपिदीर्घत्वमस्तीत्येवापंदीर्घविधिस्तदाय

किंकारणं·षष्ठ्यभावात्·षष्ठीनिर्दिष्टस्यादेशाउच्यंतेनचात्रषष्ठीपश्यामः।क्रियमाणेचापीड्ग्रहणेचिण्वदिटःप्रतिषेधोवक्तव्यः।या
हिष्यते·यङ्लोपेचप्रतिषेधोवक्तव्यः।जरीगृहिता·जरीगृहितुं·जरीगृहितव्यं·यदिपुनरिडागमांतरंविज्ञायेत·इटोदीर्घइतिचेद्विप्र
तिषिद्धं·इटोदीर्घइतिचेद्विप्रतिषिद्धंभवति·यदीएनदीर्घःअपदीर्घोनेट्·इटोदीर्घश्चेतिविप्रतिषिद्धं·[illegible]प्रतिषिद्धस्यपुनर्विधानेदीर्घत्वाभा
वः।प्रतिषिद्धस्यचपुनर्विधानेदीर्घत्वस्याभावः।वुवूर्षतेविवरिष[illegible]तेविवरीषते·अत्रापीटोदीर्घइत्यनुवर्त्तिष्यते·य[illegible]तर्हिविदेश
स्यंप्रतिषिध्यपुनर्विधानंतन्नसिध्यति·न्द्रव्रश्च्यो[illegible]त्किश्रुकः·कितीत्यनेनप्रतिषिद्धेदीर्घत्वंनप्राप्नोति·जरीता·

ल्लोपेदोषोनपरिहृतः।इतरोव्यक्तिपदार्थाश्रयेणाह·इटोदीर्घइतिचेदिति·विवरीषतइति·सनीटिप्राप्तेवृतोवेत्यनेनपक्षेईटिचप्रसक्तोसनिग्रहगुहोश्चेत्यनेनोभयस्मिन्न
पिप्रतिषिद्धेइट्सनिवेतिपक्षेइड्विधीयतेततःपुनरीटोविधानाभावादीर्घईकारःपक्षेनश्रूयेत·इट्त्सुपक्षेदीर्घविधौदोषाभावः।अत्रापीति·इड्सनिवेत्यत्रदी
र्घइतिवृतइतिचानुवर्त्तनइतिसिद्धंत्रैरूप्यं·विदेशस्थमिति·दीर्घग्रहणानुवृत्तेरत्रासंभवः।जरीत्वेति·उदात्तत्वादिट्प्राप्तेवृतोवेत्यनेनईट्·त्वश्रुकः·
कितीतिप्रतिषिद्धःईकारजातसाश्रयणादीटोपिप्रतिषेधःप्रवर्त्ततेततोन्द्रव्रश्च्यो[illegible]क्कीत्यनेनइटिविधीयमानेपक्षेदीर्घोनस्यात्॥ ॥७॥ ॥७॥

एतत्परिहरति· ईटो विधिरिटः प्रतिषेध इति· हृतो वेत्यनेन पक्षे ईडागमो विधीयते श्रुकः किती त्यनेन तु नेडित्यधिकाराच्च क्तिप्रत्याश्रयणाच्च निषेध इटो न लीटः। पाठान्तरं तु प्रकृतेर्थे दुर्योजत्वादस्माभिर्नोपन्यस्तं· सन्मार्गसंभवे को हि विमार्गमतिमान्भजेत्· यदि तर्हि तिङ् इट् प्रतिषेध ईटो यथा न भवत्येवं कार्यान्तरस्याप्यप्रसंगः। तस्मान्नेत दिति· इङ्ग्रहणे इकारान्तं प्रति राश्रयणीया न तु व्यक्तिः। भवतिचेदिति· जङ्गभ्योः क्ङितीति दुषो दोष एवेत्यर्थः। नन्वनुवादरूपविधावपीकारान्तत्वाश्रयणाज्जरीतेति रूपद्

ईटो विधिरिटः प्रतिषेधो यथा प्राप्तं इट् दीर्घो न विष्यति· यदि तर्हीटो ग्रहणे ईटो ग्रहणं न भवति जरीता न कासेडिति किं त्वप्रतिषेधो न प्राप्नोति· इहचाग्रहीदिति इट ईटीति सिज्लोपो न प्राप्नोति· इहचाग्रहीत्वमिति वद् प्रतिषेधो न प्राप्नोति· मा भूदेवं त्वंता नामिलेवं न विष्यति अत्रापि नेटीत्येवानुवर्तनेन तच्चावश्यमिड्ग्रहणमिहानुवर्त्यम् अथाग्रहीदित्येवमर्थं तथा अग्रहीध्वम् अग्रहीढ्वं विभाषेटीति मूर्धन्यो न प्राप्नोति· तस्मान्नैतच्छक्यं वक्तुं इटो ग्रहणे ईटो ग्रहणं न भवतीति न वति चेत्यतिषिद्धस्य पुनर्विधाने दीर्घत्वाभावस्येव· तस्माद शक्य इट् दीर्घ आगमान्तरं विज्ञातुं न चेद्विज्ञायते इटो ग्रहणं कर्तव्यं न कर्तव्यं· आर्धधातुकस्येति वर्तते· ग्रहः परस्यार्धधातुकस्य दीर्घत्वं वक्ष्यामि· इहापि तर्हि प्राप्नोति· ग्रहणं ग्रहणीयं· वलादेरिति वर्तते· एवमपि ग्रहीता ग्रहीतुमत्र न प्राप्नोति· अतपूर्वगत्वात् न विष्यति· एवमपि ग्राहकः अत्र न प्राप्नोति· किं च इट् प्रतिघातेन खल्वपि दीर्घत्वमुच्यमानमिटं बाधेत तस्मादिटो ग्रहणं कर्तव्यं न कर्तव्यं प्रकृतमनुवर्तते क्व प्रकृतमार्धधातुकस्येड्वलादेरिति· ननु चोक्तमेवमपि कर्तव्यम् अग्रहणे स्यसंप्रसयः षष्ठ्यनिर्देशाद्धिति· नैष दोषः। ग्रह इत्येषा पंचमी इडिति प्रथमायाः षष्ठी प्रकल्पयिष्यति तस्माद्धि लुत्तरस्येति· एवं च कृत्वा सोप्यदोषो भवति यदुक्तं चिण्वदिटः प्रतिषेध इति यं न विष्यति· नैतदस्ति· विधौ ज्ञासाम्प्रयेत्वविते त्यादावपि दीर्घः

स्यात् तस्माद्धिहितस्य दीर्घस्येड्ग्रहणेन ग्रहणं न तु विधेयस्य· ग्रह इति· इडागमे कृते न हास्येरार्धधातुकस्यादेः परस्येति इट एव दीर्घः। वलादेरिति· वलादित्यपहृत्य मित्याश्रीयते· इतरः सांप्रतिकं वलादित्वमाश्रित्याह· एवमपीति· अतपूर्वगत्येति· सांप्रतिकाभावाद्रलिटीति प्रतिषेधाच्च· इट् प्रतिघातेनेति· येन नाप्राप्तिन्यायेनेटं बाधितात्कृते

=लिङ्सिचोरिति सूत्रानुवृत्तेर्निर्देशार्थमित्यर्थः॥ अन्यथा परस्मैपदेष्विति विकल्पः स्यादित्यर्थः स्यात्॥=

=यङ्लुकोऽभ्यासस्य ग्रहणम्...=

भा॰के॰

४२

नचेति॰ जृव्रश्च्योश्च क्त्वी सनेनेतु वलादिलक्षण एवेट् प्रतिप्रसूयते इत्यप्राकरणिकत्वाभावाद्दीर्घः सिध्यति॰ यङ्लोपे चेति॰ सन्यङन्तस्यास्यानेद्विर्वचनमिसस्मिन्नपक्षे प्रकृतिप्रत्यय सम्बोहान्त यः सम्प्रहिः॥ ननु च द्विःप्रयोगो द्विर्वचनमिति पक्षस्तत्र स्थितस्तत्कथमस्थितपक्षाश्रयेण परिहारः॥ अत्राह॥ यङ्लोपे चोक्तमित्यत्रायमभिप्रायो वार्त्तिककारस्य द्विःप्रयोग एव द्विर्वचने पूर्वस्मादपि विधावल्लोपस्य स्थानिवत्त्वादकारेण व्यवधानाद्दीर्घाभावः॥ न पदान्तेत्यत्र पूर्वत्रासिद्धे न स्थानिवदिति वक्तव्यं तस्मिंल्लुप्यमाने पदान्त वरे यलोपस्वरवर्जं द्विर्वचनादीनि न वक्ष्यामीति साम्प्रतमिके दीर्घविधौ स्थानिवत्त्वं नवत्त्वेन॰ सूत्रकारमते पिग्रहे विहितस्येत्येवं विहितविशेषणाश्रयणाद्यङ्लोपे दीर्घाभावसिद्धिः॥ भाष्यकारेण तु स्थितमपि पक्षमाश्रित्य तदन्तद्विर्वचनादिति विवृतं अन्यत्रास्य दोषस्य सम्यक्परिहाराऽभिधानादनादरात्॥ ॥स्वरतिसूति॰॥ ॥अथेति॰ इट्सनि वेत्यतः॥ लिङ्सिचोर्निर्देशार्थमिति॰ ननु स्वरतिग्रहणं क्रियते लिङ्सिचोरनुवृत्तिर्न भविष्यत्यृतश्च संयोगादेरिति द्विकल्पस्य सिद्धत्वात् नैतदस्ति॰ नित्यार्थत्व

नचचिणवदिट्प्रकृतः॥ यङ्लोपे कथं॰ यङ्लोपे चोक्तमिति सर्वत्र कसर्वत्रयथेवप्रकृतस्येटो दीर्घत्वमथापि इड्दीर्घ आगमान्तरं विज्ञायते॰ यङ्लोपे चोक्तं किमुक्तं तदन्तद्विर्वचनादिति॰॥ ॥स्वरतिसूति॰॥ ॥अथवेति वर्त्तमाने पुनर्वावचनं किमर्थं॰ पुनर्वावचनं लिङ्सिचोर्निर्देशार्थं॰ पुनर्वावचनं क्रियते लिङ्सिचोर्निर्देशार्थं॰ अथ किमर्थं स्वरतिसूतिसूयतीधूञूदितो वा इति पृथग्ग्रहणं क्रियते सुवतेर्मा भूदिति॰ अथ किमर्थं धूञः सानुबंधकस्य ग्रहणं क्रियते धुवतेर्मा भूदिति॰ किं पुनरियं प्राप्ते विभाषा आहोस्विदप्राप्ते कथं च प्राप्ते कथं

स्वरतिग्रहणमित्यज्ञापकं लिङ्सिचोर्निवृत्तेः॥ अथ किमर्थमिति सूयग्रहणं क्रियतामिति भावः॥ सुवतेरिति॰ अननुबंधकग्रहणे न सानुबंधकस्येति सुवतेरेव ग्रहणं स्यात्सूङ्ग्रहणे पि क्रियमाणे लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति सूयतेरेव ग्रहणं स्यात्॰ अस्याश्च परिभाषायाः सूङ्ग्रहणे कर्त्तव्ये सूतिसूयतीति निर्देशो पादानमेव ज्ञापकं॰ धूञ इति॰ धूञ्कंपने इति स्वादौ क्र्यादौ च पठ्यते इति द्वयोरपि सामान्येन ग्रहणं॰ धुविधुनने इत्यस्य तु नित्यमिड्भवति॰ किं पुनरिति॰ स्वरत्युद्देशेनायं विचारो न्येषां तूदात्तत्वात्प्राप्ते विभाषा निश्चया द्विभाषा वाच॰ स्वरतेस्तूदात्तानुदात्तप्रतिज्ञानेऽशेषदर्शनादिचारः॥ कृतां च वृङ्वृञां वितिपरिगणनाद्भ्यो दात्तत्वं न प्रतिज्ञातं॰ न च किमुदात्तत्वप्रतिज्ञाने न दोषः परिक्रियते अथानुदात्तत्वप्रतिज्ञानेन्यायेनेति प्रश्नः॥

=ननु सतेः॥२=

=एकाचो...=

शिव॰

४२

यदि स्वरतिरुदात्त इति । ननु किति प्रसये श्युकः किती ति प्रतिषेधात्तत्राप्राप्ते विभाषेयं स्यात् नैतदस्ति । अल्पविषयत्वप्रसंगात् स्वरतेः प्राप्तविभाषायां तु महाविभाषेयं भवति । किमर्थमिति । यदि पक्षे इण्निरसर्थं तदा ऋद्धनोः स्ये इतीममपीटं पक्षे निवर्तयेदिति प्रश्नः । निरसर्थमिति । निरस्तिः कुचिदेव विधिं बाधते न सर्वमिति भावः । स विधिरिति । ऋद्धनोः स्य इत्येषः । अयं प्रतिषेध इति । प्राप्तविभाषापक्षे यथा वलादिलक्षण इट् प्राप्ते निषिध्यते तथा स्यलक्षणोऽपि प्रतिषिध्येत । अनुदात्तविज्ञाने तु द्वयोरपि विधित्वाद्विप्रतिषेधोपपत्तिः । सोपीति । वेधर्मेण द्वयं तत्र यथा सगुकार्पासस्ततो रज्ज्वादिर्दुर्बलो नैवं ऋद्धनोः स्य इत्ययं विधिः । सपथैवेति । करिष्यतीसादेः ।

यदि स्वरतिरुदात्तस्ततः प्राप्ते अथानुदात्तस्ततोऽप्राप्ते । स्वरतिरुदात्तः पठ्यते किमर्थं तर्हि वावचनं । वावचनं निरसर्थं । वावचनं क्रियते निरसर्थं । अनुदात्ते हि किति वा प्रसंगः प्रतिषिध्य पुनर्विधानात् । अनुदात्ते हि किति सति पुनर्विभाषा प्रसज्येत तस्वात् किंकारणं । प्रतिषिध्य पुनर्विधानात् प्रतिषिध्य किलायं पुनर्विधीयते । स यथैवैकाज्लक्षणं बाधते एवं श्युकः किती सेतमपि बाधेत । यदि तर्ह्युदात्तः पठ्यते विप्रतिषेधं स्वरतेर्वेट्त्वाद्वतः स्ये विप्रतिषेधेनेति तन्नोपपद्यते । किंकारणं । स विधिरयं प्रतिषेधः । विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः । सोपि विधिर्नन्वहनामिव कार्पासानां कृतः प्रतिषेधविषय आरभ्यते । अपवाये न नाप्राप्ते तस्य बाधनं भवति । न वाप्राप्ते वलादिलक्षण इयं विभाषा रभ्यते स्यलक्षणे पुनः प्राप्ते चाप्राप्ते च । अपवाद मध्ये पठितः पूर्वान्विधीन्बाधंते नोत्तरानेवमियं विभाषा वलादिलक्षणामिटं बाधिष्यते स्यलक्षणं न बाधिष्यते । अथवा पुनरस्त्वनुदात्तः । ननु चोक्तमनुदात्ते हि किति वा प्रसंगः

×सपथैवैकाज्लक्षणं प्रति× ×षेधं बाधते एवमिममपि× ×बाधते ×२

एवमिममपीति । न च स्वरतेरुदात्तत्वेऽनेनाप्राप्तिन्यायोक्तियेनैकाज्लक्षणमेव प्रतिषेधं बाधेत न स्वरतिलक्षणं । यद्येवं विप्रतिषेधानुपपत्तिः स्यलक्षणस्य विधेरपवादत्वादन्यभापीह स्यासिद्धत्वमोपपादि विप्रतिषेधः । अथवा स विधिरयं प्रतिषेध इति विधेर्दुर्बलत्वं यदुक्तं तदनेन निरस्तं तत्र द्वयोस्तुल्यबलत्वादुपपद्यते विप्रतिषेधः । अथवेति । परिभाषाश्रयणादुत्सर्गाभावे पतीतद्वयोर्विप्रतिषेधोपपत्तौ परत्वेन व्यवस्था । उदात्तत्वे द्योषं प्रतिविधायानुदात्तत्वे दोषं प्रतिविधत्ते । अथवेति ॥ ॥

=येन नाप्राप्ते इति न्यायपाठात् इति तेलर्थः ।९=

=एवंचार्द्धविप्रतिषेधेन निषेधो भवतीति वाक्यशेषा व्याहारेण भाव्यं वाक्यशेषं॰ २८

नचाप्राप्त एकाज्लक्षणमिति॰ अयमेवपाठो युक्तः॥ केचित्तु वलादिलक्षणमिति पठंति॰ वलादिमात्रविषयता वलादिलक्षणस्याचक्षते॰ श्र्युकः किती सेत स्मिन्निति॰ तत्र सत्त्वेसत्रोभयप्रसंगे पूर्व्वविप्रतिषेधो भवतीति वक्तव्यं॰ येन्यश्चानुदात्तेभ्य इति॰ प्रतिषेधकांडस्य पुरस्तात्करणस्य सर्वे इप्रतिषेधार्थतात् मन्यमिति॰ यथुक्तलक्षणं प्रतिषेधमयं विकल्पो बाधेत ततः स नियम्‌ उहोश्चे सस्य प्रतिषेध [illegible]स्याभावाद्‌ नेनैव सति विकल्पस्य सिद्धत्वात्‌ पुनस्तन्न विदध्यात्‌॥ ॥इणि॰॥ ॥सिद्धेति॰नि

अथवाशेषसहम्याशेषेलोपोविधीयते॰ युष्मदस्मदोर्लोपइतीयतां सस्यलोपः सिद्धः सोयमेवंसिद्धे सतियच्छेषग्रहणं करोति तस्यैतत्प्रयोजनमवशिष्टस्यलोपोयथास्यादिति॰ नुपशिष्टे हितस्याकुः कार्यसिद्धिमनीषिणः॥ एवं तर्हाचार्यप्रवृत्तिर्ज्ञापयतिनसर्वे षांत्यदादीनामत्वंभवतीति॰ यद्ययंकिमः कइतिकादेशंशास्ति॰ इतरथाहि किमोप्यत्वतीत्येवब्रूयात् सिद्धे विधिरारभ्यमाणोज्ञापका र्थोभवतिनचकिमोऽत्वेन सिध्यति॰ अत्वे हि सत्यंत्यस्यप्रसज्येत॰ सिद्धमंत्यस्यपूर्वेणैवृत्तत्वारंभसामर्थ्यादिकारस्यभविष्यति॰ कुतोनु खल्वेतदनंत्यार्थआरंभेसतीकारस्यभविष्यति नपुनः ककारस्यस्यात् यत्तर्हि किमोग्रहणं करोति॰ इतरथाहि कादेवतीत्येवब्रूया मःकंनविद्ध्यात् किमइत्येवब्रूयात्तपूर्वस्यत्वाददकार॥ तः एवमपिककारमात्रासरस्यप्राप्नोति॰ त्यदादीनामितिवर्ततेनचान्यत्किमस्त्यदादिषु स्यानुवृत्त्यापूर्वेणांतस्यात्वेकृते इकारस्यतु किमइत्यनेनद्वयोरकारयोः पररूपेण कइत्यादेः सिद्धत्वात् नपुनः ककारस्येति॰ अनंत्यविकारेस्य देशस्येतिपरिभाषाप्रयोजनाभावात्ससाख्याता॰ कादभवतीति॰ ककारेऽकार उच्चारणार्थः कादित्येतावत्स्वचंक्रियतेऽकारस्तुपूर्वसूत्राददनुवर्त तेसचादेः परस्येतिइकारस्यभवति मकारस्यतुपूर्वेण॰ ककारमात्रादिति॰ कुकवाकुरित्यादावपि॰ नचान्यदिति॰ यद्यपिसर्वाणिस दा दीन्यकचाककारवं तितथापितेषांकासरोऽकारएवेतिनास्तिविशेषः॥ किंशब्दस्यतुसदाघत्वंभवत्येव॥ ॥

शिवः

५४

=उत्तरार्थत्वादिति। कुतिहोः क्वात्स्वेकवत्स्यत्वभावायत्तेः। उतिहोरिती दिग्भ्यासेङकारस्यांत्यादेरलोपनिर्देशेतदर्थेनानर्थक इत्यारंभेगौरवमंगस्त्वपरिभाषयाणवारलेवत्कोशभक्तिभावइतिविवरणकारः। उक्तिहोःवातीतिन्यासेतु तंत्राश्रयणेन प्रयोजनं॥=

एवमपीति। विशेषस्य निश्चेतुमशक्यत्वात्प्रमाणाभावात्। साकच्कार्थं इति। सर्वस्य साकच्कस्य कादेशो यथा स्यादित्येवमर्थं किमः क इति कर्त्तव्यं। तेनाज्ञाताद्य
र्थविवक्षायां क इत्येव भवति नतु ककः इति। ननु निर्दिश्यमानस्यादेशा भवंतीति साकच्कस्य कादेशो न प्राप्नोतीति न च शक्यं वक्तुं किमः क इति वचनसामर्थ्या
द्भवतीति। किम इति स्यादिनिर्देशस्योत्तरार्थत्वात्। एवं तर्हि तंत्राश्रयणात्साकच्कस्यापि भविष्यतीत्यदोषः॥ ॥क्वाति॥ ॥किमर्थमिति। कुत्रापेक्षते अंगवृ
त्त इति वचनाद्गुणो न भवति। यणादेशस्त्वनांगत्वाद्भविष्यतीति भावः। न सिध्यतीति। निष्ठितत्वस्य दुर्ज्ञानत्वात्॥ ॥तदोः॥ ॥किमर्थमिति। विशेषण

एवमप्यनैकांतिकं ज्ञापकं एतावचुज्ञाप्यते न सर्वेषां त्यदादीनामत्वं भवतीति तत्र कुत एतद् द्विपर्यंतानां भविष्यति न पुनर्युष्मदस्म
दंतानां वा स्यादवदंतानां वा। किंचावश्यं खल्वप्युत्तरार्थं किमो ग्रहणं कर्त्तव्यं कुतिहोः क्वातीति कादेशः खल्वप्यवश्यं साकच्कार्थो व
क्तव्यः। कः को क इत्येवमर्थं। तस्माद् द्विपर्यंतानामत्वं वक्तव्यं। त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः शेषे लोपस्य लोपेन ज्ञापनेप्राकृतादि
ति अपि चोपसमस्तार्थमत्वाभावात्तत्र भवेत्। द्विलोपश्चावश्यवार्थः कर्त्तव्य इति तत्रत्वं अथवा शेषसमन्वयाच्छेषे लोपो विधीयते। लुमवि
षे हि तत्स्यात्। कार्यसिद्धिं मनीषिणः॥ ॥क्वाति॥ ॥किमर्थं कादेश उच्यते। न कुतिहात्विसेवोच्येत। कारूपासिद्धिः। क्व। यणादेशेन सिद्धं। न सि
ध्यति। ओर्गुणः प्रसज्येत॥ ॥तदोः सः सावनंत्ययोः॥ ॥किमर्थमनंत्ययोरित्युच्यते। अंत्ययोर्माभूदिति। नैतदस्ति प्रयोजनं। असमंत्ययोर्बाध
कं भविष्यति। अनवकाशा हि विधयो बाधका भवंति। सावकाशं चात्वं कोवकाशः। द्विशब्दः। सत्वमपि सावकाशं। कोवकाशः। अनंत्यः॥ ॥

विशेष्यभावे कामचारात्त्यदादीनां च द्विपर्यंतानामध्ये नकारांतस्य कस्यचिदसंभवात्त्यदादिभिर्विशेषितयोस्तदोः सत्वं विधीयमानमनंत्ययोः सावकाशमं
त्ययोरत्वेन बाधिष्यत इति प्रश्नः। अंत्ययोरिति। परत्वात्प्राप्नोतीति कारस्य सत्वस्यासंभवेपि सत्वे श्रोरूपापादनाद्यंत्ययोरित्युक्तं। नैतदस्तीति। पूर्वविप्रति
षेधमाश्रित्य चोदयति। द्विशब्द इति उदाहरणमात्रमेतत्। अन्यत्र स्यः सर्व एव स्यदादयो वकाशः। सत्वमपीति उभयोः सावकाशयोः परत्वात्सत्वप्रसंगः॥

=सर्वविप्रतिषेधात्‥=

=अथवेत्यादिपक्षद्वयेपि कथं पुनरित्यादिग्रंथः सिद्धांतिन इति विशेषः। तृतीयेवक्ष्यमाणभाष्यं हृदि निधाय सिद्धांती पर्यनुयुंक्ते कृति द्वितीयादि शेषः॥२॥

गो·के·

५५

कथं पुनरिति· आचार्यदेशीयः शिष्यबुद्धिपरिज्ञानाय पृच्छति· सत्तुशयावष्टव्यसन्निधावुभयोरनुपशयावयवेन सत्तुशयो विशेष्यते एवं हि सत्तुशयस्यापि कार्ये
ण संबंधः प्रतिपादितो भवति· अलोंऽत्यस्येति वचनादवयवस्यापि भवेदिति· व्याप्तिन्यायाश्रयणात्तकारांतासंभवात् त्यदादिभिः न दौ विशेष्येते· रू
मपीति· सिद्धांतवादी· अथवा सत्वमपीति चोदकस्य ग्रंथः सत्वपूर्वविप्रतिषेधं मन्यते· कथं पुनरिति चोदकमाचार्यो बुद्धिपरीक्षार्थं पर्यनुयुंक्ते· भ
वेदिति चोदकः एवमपीत्याचार्यः। अथवा कथं पुनरित्यस्यायमर्थः। अनंत्यस्यैव कथं सत्वं लभ्यते यावतांत्यस्यापि परत्वात्प्राप्नोति· चोदकस्त्वगृही
ताभिप्राय आह· भवेदिति· आचार्यः स्वाभिप्रायमाह· एवमपीति· किं च स्यादिति· अंत्यस्यापि स्यस्य सत्वे कृत्यादिलोपेन सह त्यादीनि सिध्यंती

कथं पुनः सत्वं स्ये अनंत्यस्य सत्वं स्यात्· भवेयत्तकारदकाराभ्यामंगं विशेष्येत स्यानंत्ययोर्न स्यात्· वयं तु स्वत्वं गेन तका
रदकारौ विशेष्य [illegible] यामः। एवमप्युभयोः सावकाशयोः समवस्थितयोः परत्वात्सत्वं प्राप्नोति· किं च स्यात्· यथं सयोः सत्वं
स्यात्त्यस्य इति एष [illegible] स्यादिति संबुद्धेर्लोपेन स्यात्· इत्यचमास्मा अनत इति टाप्न स्यात्· तस्मादनंत्ययोरिति वक्तव्यं न वक्त
व्यमेवं वक्ष्यामि· तदोः सः सौ· ततः अदसः। अदसश्च दकारस्य सो भवतीति· इदमिदानीं किमर्थं नियमार्थं अदस एव दका
रस्य नान्यस्य दकारस्येति· यदि नियमः क्रियते हीयते रपसयः इदृति प्राप्नोति स्वश इति चेष्यते· यथालक्षणमप्रयुक्ते॥

तिमत्वाप्रश्नः। लोपेन स्यादिति· सत्वे सति त्यस्यांत्याभावात्· ननु सदाघत्वे पि [illegible] सन्निपातपरिभाषया संबुद्धिलोपाप्रसंगः। अनित्यत्वादस्याः परि
भाषायाः नायं दोषः। इत्यचेति· नयास्तयोरिति लिंगआश्रीयमाणेऽनेकोर्थः कल्पनीयः स्यात्· ततो रस्स इति· तत्रांत दोः सः सौ विति वर्तनेन तकारो
संभवात्सज्यते· हीयते रिति· [illegible] तिहीयतितततः क्विप् अकारस्य कारादत्तलोपः ततः साविकारस्य सदाघत्वे सति स्वश इति तस्यावेतु इति प्रा
प्नोति· यथालक्षणमिति उपसर्जनत्वान्नात्र सदादिकार्येण भाव्यमिति· अथवाप्रयुक्तानां [illegible] मन्वाख्यानार्थं आद्दृशद्दृस्यचक्वजंतस्याक्विप्प्रयोगाभावान्नकेनचि

हीति सेव भवति·२

शिवः

५५

अदसओ॰॥ ॥अदस इति॰ अदसः परस्य सोरौत्वं विधीयते तच्च सन्नियोगेन टिलोपश्चेति टिलोपे चासाविति सिध्यति॰ हृस्वादिति॰ यदि तदा यत्नं क्रियेत त
दा हृस्वांतत्वात्संबुद्धिलोपप्रसंगः॰ तस्मादेव सुलोपो विधीयते॰ नरुल इति॰ नायं दोषो यस्मात् सोरुलोलोपो विधीयते ते नौकारस्य न भविष्यति॰ हे अ
साविति॰ अतेटापि च सति यावर्णदागंवली यद इति टिलोपे तीति टिलोपे कादेशं बाधित्वा आङ्चापः इत्येत्वं प्राप्नोति॰ प्रश्लिष्टनिर्देशोयमिति॰ आ

अदस औ सुलोपश्च॥ ॥अदसः सोर्नवेदौत्वं किं सुलोपो विधीयते॰ अदस एव सोर्नवेदौत्वं किं [illegible] मर्थं सोर्लोपो विधीयते
हृस्वात्सुलोपेन संबुद्धिः॰ इह हे असाविति एङ्हृस्वादिति संबुद्धिलोपः प्रसज्येत॰ नरुलः॰ हलो लोपः संबुद्धिलोपः॰ तत्सुलोपग्रहणं क
र्तव्यं॰ न कर्तव्यं॰ प्रकृतं हि तत्॰ प्रकृतं हल्ग्रहणं॰ क्व प्रकृतं॰ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति॰ तद्वै प्रथमानिर्दिष्टं षष्ठीनि
र्दिष्टेन चेहार्थः॰ हृस्वादिसेषा पंचमी हलिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति॰ आप एत्वं भवेत्तस्मिन्॰ इह
हे असौ ब्राह्मणि आङि चापः संबुद्धौ चेत्येत्वं प्रसज्येत॰ नङ्ङीस[illegible]नुवर्तनात्॰ ङ्ङीति नत्रानुवर्तते॰ क्व प्रकृतं॰ सुपि च ब
हुवचने झल्येदिति॰ प्रत्ययस्थाच्चकादित्वं॰ इह च असको ब्राह्मणीति प्रत्ययस्थात्कात्पूर्वस्येतीत्वं प्रसज्येत॰ नैष दोषः॥ प्रश्लि
ष्टनिर्देशोयं॰ आ आविति॰ इहापि न हि [illegible] न प्राप्नोति॰ कारिके हारिके इति॰ =तस्मादेव वान्मलोपः इति नायः॥१॥=

कार रूपोपयत्रान तत्रेत्वं भवतीह तु रत्रोकरतायां औकाररूपं कारिके इति॰ ओङ् आप इति शीभाव आङ्गुणे च कृते एकारः॰ अयतर इतीत्वं न प्राप्नोति॰ संबुद्धौ वा का
रिके इति रूपं॰ ननु चाचांतरंगत्वात् आक्लबुलन्ते रित्वं भविष्यति॰ असकाविस न तु आक्लबुलन्ते [illegible] एवं तर्हि [illegible] एकादेशः पूर्ववाणदागंवली
यइतीत्वं प्राप्नोतीति आकाररूप एवाबिति किं प्रश्लेषनिर्देशन तस्मात्सामर्थ्याद्यथावार्णदाङ्गमिति बाधित्वैकादेशो भवत्येवं कारिके सत्याप्यन्तरंगेत्वात्पूर्वविप्रकित

=समानाश्रय एवेदमिति तत्र न मानं॰१॰=

शीभावश्चेति॰ औङ इति वचनादौकारस्य यदा ङिदादेशानुमानं वर्णमात्रनिर्देशो वाङ्कारस्तच्चारणार्थस्तदा शीभावप्रसंगः यदा तु पूर्वसूत्रेण निर्देशस्तदा प्रथमाद्वितीयाद्विवचनयोरेव शीभावेनाप्यमिति दोषाभावः॥ एतमपि प्रश्लेषनिर्देशेन शकं परिहर्तुं॰ न च कारिके ह्यत्र दोषः समानं प्रातिकमेवैकादेशमि

शीभावश्च प्रसज्येत॥ इह त्वशीभावश्च प्राप्नोति॥ अतो ब्राह्मणी आपः तत्र स्य औङः शीभवतीति शीभावः प्राप्नोति तस्मात्कोर्लो पो वक्तव्यः॥ सो औत्वप्रतिषेधः साकच्काद्यस्तापुंस्त्वं च॰ सो औत्वप्रतिषेधः साकच्काद्यवक्तव्यः॥ साच्च परस्य उत्वं वक्तव्यं॰ अ सकौ॰ असुकः॥ उत्तरपदभूतानामादेशाउपदेशिवद्वचनं॰ उत्तरपदभूतानां त्यदादीनामादेशाउपदेशिवद्भावो वक्तव्यः॥ पर माहं॰ परमायं॰ परमानेनाहिं प्रयोजनं॰ अनाद्विदृष्टार्थं अकृते एकादेश आदेशाय यथास्युरिति॥ किं पुनः कारणं एकादेशस्ता वद्भवति॰ न पुनरादेशाः॥ न परत्वादादेशैर्भवितव्यं बहिरंगलक्षणत्वात्॰ बहिरंगा आदेशाः अंतरंग एकादेशः॥ असिद्धं बहिरंगमंतरंगे॥ सत ईपदेशिवद्भावो वक्तव्यो न वक्तव्यः॥ आचार्यप्रवृत्तिर्ज्ञापयति॥ पूर्वोत्तरपदयोस्तावत्कार्यं भवति॰ नैकादेश इति॰ यदयं नेदस्य प रस्येति प्रतिषेधं शास्ति॰ कथं कृत्वा ज्ञापकं॰ इदं दावचो॰ तत्र कोयस्येति लोपेनापि क्रियते॰ अपर एवादेशोन॰ अनक॰ इदं कृतं दं तः तत्र कोदु कः प्रसंगः पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति॥ नैकादेश इति॰ ततो नेदस्य परस्येति प्रतिषेधं शास्ति॰ अदसः सोर्भवदोत्वं किंमुलोपो विभक्तौ कृत्वाल्लुप्येतसंबुद्धिर्न हलः प्रकृतं हि तत्॥ आपएत्वं भवेत्तास्मिन्न शलीत्यनुवर्जना॥

तंप्रतीक्षतेन तु भिन्नकालप्राप्तिकं॰ साकच्कादिति॰ साकच्कोयः सुर्विहितस्तस्मिन्निसर्गः॥ प्रतिषेधसन्नियोगेन सासरस्याकारस्योत्वं भवति॰ बहिरंगा आदे शा इति॰ समासाद्याविभक्तिरलघतेतदपेक्षत्वात् तौ तरंगत्वादेकादेशं कृतेन स्यादि परावादादेशे कृक्रिय प्राणेषु परमहंपरमयमित्यादिरनिष्टप्रसंगः॥

सृजेः ॥ ॥ कंसपरिमृड्भ्यामिति । विभक्तिमाश्रित्य इट् प्राप्नोति क्रिति चेति प्रतिषेधः । क्रिन्निमित्तायाः एव वृद्धेरित्यत्र न प्रवर्त्तते । ननु सृड्भ्यामिति । भ्यां प्रत्ययो गत्वादिर्यकि भवतीत्यागमप्रसंगः । प्रणड्भ्यामिति । नशेर्वेति कुत्वमप्यत्र न भवतीति केचिदाहुः । तदयुक्तं । परत्वनिबंधनत्वाद्भ्यां प्रत्ययानपेक्षणात् । मस्जि नशोर्झलीति नुमागमः तु प्रत्ययापेक्षत्वाद्धातुप्रत्ययेन भवतीति । वार्त्रघ्न इति । हनस्तोचिल्लकोरिति तिन त्वं न भवति कुमतिं चेति णत्वं तु कुप्व्वाये हा हेरोषु

सृजेरिड् ॥ ॥ सृजेरिड्विधौ क्रिप्रतिषेधः । सृजेरिड्विधौ कृते तस्य प्रतिषेधो वक्तव्यः । कंसपरिमृड्भ्यां कंसपरिमृड्भिः । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धं । अथवा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धं । धातुप्रत्यये कार्यं भवतीत्येषा परिभाषा कर्त्तव्या । का न्वेतस्याः परिभाषायाः प्रयोजनानि । सृजि दृशि मस्जि नशि हं लिगिरत्यर्थं । सृजि । ननु सृड्भ्यां रज्जुसृड्भिः । सृजि । दृशि । देवदृग्भ्यां देवदृग्भिः । दृशि । मस्जि उदकमग्भ्यां उदकमग्भिः । नशि । प्रणड्भ्यां प्रणड्भिः । नशि । हंति । वार्त्रघ्नः श्रौ णघ्नः । गिरि । देवगिरौ देवगिरः । यदि स्वरूपग्रहणे इत्युच्यते प्रसृड्भ्यां प्रसृड्भिः अनुदात्तस्य चर्दुपधस्यान्यतरस्यामिति सम्प्राप्नोति । एवं तर्हीयं परिभाषा कर्त्तव्या धातोः कार्यमुच्यमानं न प्रत्यये भवतीति । सा तर्ह्येषा परिभाषा कर्त्तव्या न कर्त्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषा यदयं ज्योणहलेन त्वं शास्ति ॥ ॥ अचो ञ्णिति ॥ ॥ अज्ग्रहणं किमर्थं । इग्लक्षणावृद्धिर्यथा स्यात् । गोरिति । नैतदस्ति प्रयोजनं । णित्करणसामर्थ्याद्देवात्र वृद्धिर्भविष्यति । अस्त्यन्यत्सिंत्करणे प्रयोजनं । किं । गावौ गावः इत्यत्रान्त्योपधाया प्रतिषेध इति न भवति । देवगिरा विति । अचि विभाषेति लत्वं न भवति । अम्प्राप्नोतीति । तद्विधौ धातोः स्वरूपेणानुपादानात् ॥ ॥ अचो ॥ ॥ अज्ग्रहणमिति । अंतरेणाज्ग्रहणमिका दिग्भाषेयं स्यानादिगंतस्य वृद्धिः सिध्यति अकारस्य तु चिकीर्षकः इत्यादावतो लोपेन मायं आकारस्य तु विशेषो नास्ति संध्यक्षराणामात्वेन भाव्यमिति प्रश्नः । गोर्थमिति । असत्यज्ग्रहणे इक्परि

गा॰के॰

५७

अथयोगविभागइति॰यद्यपिगौरित्युक्तेनोदाहरणेनयोगविभागस्यप्रयोजनंलभ्यतेतथाप्यनेकप्रयोजनोपन्यासायप्रश्नप्रतिवचने॰सखायावितिसखिशब्दौ
इतिस्थिनेवृद्धेरप्रसंगः॥णित्वंतुसखायइत्यत्रजसिगुणेकृतेयादेशेकृते॰अतउपधायाइतिवृद्ध्यर्थंस्यात्॰सखायाइत्येतत्तुप्रसंगेनोपन्यस्तंणित्वावकाशप्र
दर्शनार्थंवा॰व्यंजनाद्यर्थइति॰व्यंजनादिर्यःप्रत्ययस्तत्परस्यार्थः॥जैत्रमिति॰जिशुभ्यांक्तोष्ट्रनिदिकाभ्यइति॰चोत्रमिति॰जनिदाच्युसृवृमदीत्यादिनाष्ट्रन्त्रमितिच

अथयोगविभागःकिमर्थः॥नञ्णित्यतउपधायाइत्येवोच्येत॰कारूपसिद्धिः॥चायकोलावकःकारकोहारकः॥गुणेकृतेऽयवोरपर
त्वेचअतउपधायाइत्येवसिद्धं॰योगविभागःसखिव्यंजनाद्यर्थः॥योगविभागःक्रियतेसख्यर्थोव्यंजनाद्यर्थश्च॰सख्यर्थस्तावत्॰सखा
योसखायः॥व्यंजनाद्यर्थः॥जैत्रंयौत्रंचौत्रं॰योगविभागेचेदानींसखिव्यंजनाद्यर्थेक्रियमाणेऽज्ग्रहणमपिकर्त्तव्यंभवति॰किंप्र
योजनंगोरर्थं॰ननुचोक्तंणित्करणसामर्थ्याद्गोर्वृद्धिर्भविष्यति॰अस्त्यन्यत्णित्करणप्रयोजनं॰किं॰गावोगावः॥अतउपधाया
इतिवृद्धिर्यथास्यात्॰यत्तुसोणित्करणंतदनवकाशंतस्यानवकाशत्वादेववृद्धिर्भविष्यति॰यद्येवमत्वल्पिणित्करणसामर्थ्या
दनिकोवृद्धिःप्राप्यतेएवंतर्ह्यसमपियाभ्यांनि॰तत्वमपिहिणितीत्युच्यतेतस्मादज्ग्रहणंकर्त्तव्यं॥ ॥तद्धितेष्वचामादेः॥ ॥अज्
ग्रहणंकर्त्तव्यं॰ननुचक्रियते॰द्वितीयंकर्त्तव्यंयथाचामादियहणमज्विशेषणंविज्ञायेत॰अचामादेरचइति॰अथाक्रियमाणे
अज्ग्रहणेकस्याचामादिग्रहणंविशेषणंस्यात्॥

नस्तो॥चित्तस्तोरितिह्तेरुच्यमानंगोरपिस्यात्सैषदोषःप्रापदित्यज्ग्रहणंक्रियते॥
तद्धितेषु॥ ॥अज्ग्रहणंकर्त्तव्यमिति॰अचामितसनेननिर्धारणषष्ठ्यंतेनसामानाधिकरण्यनादेर्विशेषयितुमशक्यत्वादिकारिणांपस्यानादिक
वाचोवृद्धिप्रसंगः॥अथाक्रियमाणेइति॰निर्धारणंतुल्यजातीयस्यसंभवतियथाकृष्णागवांसंपन्नक्षीरतमेत्युक्तेगोरेवप्रतीयतेतथाचामादिरजे

[illegible]

शिव:

५७

=ननु नियमार्थत्वं विधिनियमसंभवइतिन्यायादिसर्पः।२= =इकारस्येनाचोविशेषणसंभवात्।१=

नियमार्थवाग्रहणं२

इग्विशेषणमिति। तुल्यजातीयनिर्धारणेपीकइत्यस्योपस्थानं न निवार्यते। अज्ग्रहणेतु क्रियमाणे निर्दिष्टस्थानिकत्वादिकमधिआषानुपस्थानं यथाचोञ्णितीत्य त्र। अज्मात्रस्येति। नन्वङ्ग्रहणसामर्थ्यादज्मात्रस्य न भविष्यति। नत्सामर्थ्यात्तर्हि निवृत्तिरेवाज्ग्रहणस्यैस्यादकारस्यैव ह्रस्वस्य नान्यस्येति दीर्घस्यतीहकइ स्यादावुपधायाःस्यादेव। अकारेणेति। विशेषणस्यानंतरनिवृत्तिः प्रयोजनं। अथवैकयोगइति। एकोनवतिरध्याक्षिप्यते। नेन तुल्यकालत्वाद्विधानस्यस्वका

इग्विशेषणं। तत्र कोदोषः। इहैवस्यात्। ऐतिकायनः औपगवः इहनस्यात्। गार्ग्योवात्स्यइति। तत्र इज्ग्रहणं कर्त्तव्यं नकर्त्तव्यं। प्रकृतमनु वर्त्तते क्व प्रकृतं। अचोञ्णितीति। यदितदनुवर्त्तते। तउपधायाअचश्चेति अज्मात्रस्योपधाया वृद्धिःप्रसज्येत भेदस्केदइति। अकारे णतपरेणाचं विशेषयिष्यामः अचः अतइति। इहेदानीनचइत्सनुवर्त्तते। तइतिनिवृत्तं। अथवा मंडूकगतयोधिकाराः। तद्यथा मं डूकाउत्प्लुत्योत्प्लुत्यगच्छंतितद्वदधिकाराः। अथवैकयोगः करिष्यते अचोञ्णितिसतउपधायास्ततस्तोहिते षचामादेरिति। नचै कयोगेनुवृत्तिर्भवति। तद्धितेषचामादिवृद्ध्यवंसोपधालक्षणप्रतिषेधः। तद्धितेषचामादिवृद्धावंलोपधालक्षणयावृद्धेःप्र तिषेधोवक्तव्यः। कोष्टुःजागतइति। ननु चाचामादिवृद्धिरंलोपधालक्षणां वृद्धिंबाधिष्यते कथमन्यस्योच्यमानान्यस्यबाधिका स्यादसतिखल्वपिसंभवेबाधनंभवतिअस्ति खल्वपिसंभवोयदुभयंस्यात्। लोकविज्ञानात्सिद्धं। लोकेसत्यपिसंभवेबाधनंभ वति। तद्यथा। दधिब्राह्मणेभ्योदीयतां तक्रंकौण्डिन्यायेति

येव्यापारान्यत्रोपस्थानाभावः। कोष्टुइति। कोष्टृशब्दात्तस्येदमित्यण्। जागतइति। जग च्छब्दादण्। ननु चाचामादिरिसंगंकार्यमित्यनेन च तक्रकौण्डिन्यन्यायावतारः। इतरस्तुस्थानिभेदमत्वाह। कथमन्यस्येति। आमलकीजइत्याद्यावन्य स्यापिस्वरोविधीयमानोन्यस्वरंबाधतएवेत्याशंकाह। असतिखल्वपीति। लोकविज्ञानादिति। अंगंकार्यितदेयावयवद्वारेणसंक्षिप्यतेतत्रैकस्यका

इद्धि२ तक्रंगा३

=श्रेयांसीत्यादौ लक्षणेनुमितत्वेऽङ्गिलक्षणस्य प्राप्तस्य प्रतिषेधः कथ्यते इति चोदिते विप्रतिषेधात्सिद्धमित्युक्तं तथैवापीत्यर्थः ॥४=

=वाक्यादित्वात् २=

नाप्राप्तइति॰ सामान्यविशेषभावो बाधहेतुः स चेह नास्ति॰ पुष्करसद्ग्रहणाद्वेति॰ वाशब्दस्त्वर्थे पूर्वस्माद्धेतोरनवस्थितत्वात्॰ ननु च ठगर्थः पुष्करसदोऽण् ठः स्यात् पुष्करसदा चरति पौष्करसादिक इति॰ ञ्णिःसतउपधायाइति वृद्धेर्विधानाद्बहुकप्रसंगात्॰ एवं तर्हि ठगतोनभिधानान्न भवति॰ यथा प्रतिपदविहितस्यैव पुष्करसद उत्तरपदस्य वृद्धिर्भवति नान्यत्र॰ केचिदाहुः लोकविज्ञानात्सिद्धमिति वार्त्तिककारस्याविप्रतिषेधो विवक्षितो यथाह न चोनुन्विधावुगित्सतिषेधात्सिद्धमिति॰ अंसोपधालक्षणया वृद्धेरवकाशः गोः पावक इति अस्या अवकाशः सौस्नुन इति॰ कौशजागत इत्यत्रोभयप्रसंगे परत्वादादिवृद्धिर्भवति॰ सत्यप

सत्यपि संभवे दधिदानस्य तक्रदानं निवर्त्तकं भवति॰ एवमिहापि सत्यपि संभवे चामादिवृद्धिरंसोपधालक्षणां वृद्धिं बाधिष्यते॰ विषमउपन्यासः नाप्राप्ते दधिदाने तक्रदानमारभ्यते तत्र प्राप्ते आरभ्यमाणं बाधकं भविष्यति॰ इह पुनरप्राप्तायामंसोपधालक्षणायां वृद्धावचामादिवृद्धिरारभ्यते सौस्नुत सौस्नुत इति॰ पुष्करसद्ग्रहणाद्वा॰ अर्ध्यमनुशतिकादिषु पुष्करसच्छब्दं पठति तज्ज्ञापयत्याचार्यो चामादिवृद्ध्या अंसोपधालक्षणा वृद्धिर्न भवतीति॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य द्वितीये पादे द्वितीयमाह्निकं॰ पादश्च द्वितीयः समाप्तः॥ ॥७॥ ॥७॥ ॥

[भवाम]

द्विज्ञापाश्रीयते न तु पुनः प्रसंगविज्ञानं॰ एवं च पुष्करसद्ग्रहणाद्वेति विकल्पार्थ एव वाशब्दः बाधकत्वसामान्याभिप्रायेण च प्रसंगस्त्रविज्ञानमेव लोकविज्ञानमुक्तं॰ अथ यत्रादिवृद्धिः प्रतिषिध्यते तत्रांसोपधलक्षणा कस्मान्न भवति व्यसोऽर्णवो वैयसवमिति इंगताचेतस एत्याप दिनवं वैयापरमिति॰ अत्राप्यैचो परत्वाद्बाधकाविति सर्वेष्टसिद्धिः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे सप्तमाध्यायद्वितीयपादे द्वितीयमाह्निकं॰ पादश्च द्वितीयः समाप्तः॥ ॥७॥ ॥श्रीः॥

देविकाशिंशपा॥ ॥देविकादिष्विति। विशेषणविशेष्यभावे कामचारादंगेन देविकादीनि विशेष्यन्ते न तदा तेषामंगमन्तेन संभवतीति तदन्तविध्यभावादंगानि देविकादीन्याश्रीयन्ते। यदा तु देविकादिभिरंगं विशेष्यते तदा तदन्तविधिना देविकाद्यन्तमंगं गृह्यते न तु कथंचित्तदादिविधिः संभवतीति तदादिग्रहणं कर्तव्यं। तत्र केवलानां देविकादीनां तदादीनां चाकारो भवतीति वक्तव्यं अन्यथा केवलानां न स्यात् दाविकमुदकं शांशपश्चमस इति। न च व्यपदेशिवद्भावोऽस्ति। अप्रातिपदिकेनेति प्रतिषेधात्। यदि तु प्रत्ययविधिविषय एवायं निषेधः तदा केवलानां व्यपदेशिवद्भावात्सिध्यति। आद्यज्विशेषणमिति। अंगस्य देवि

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्॥ ॥देविकादिषु तदादिग्रहणं कर्त्तव्यं। इहापि यथा स्यात् दाविकाकूलाः शालयः शांशपास्थलादेवाः। किं पुनः कारणं न सिध्यति। अन्यत्र तद्ग्रहणात्तदन्तग्रहणं वा। अन्यत्र हि तस्य वा ग्रहणं तदन्तस्य वा भवति। न चेदं तन्नापि तदन्तं। आद्यज्विशेषणत्वात्सिद्धं। आद्यज्विशेषणं देविकादयः। नैवं विज्ञायते देविकादीनामंगानामचामादेराकारो भवतीति कथं तर्हि ञ्णिति अंगस्याचामादेरच आकारादेशो भवति स चेद् देविकादीनामाद्यज्भवतीति। अंतरतमनिवर्त्तकत्वाद्वा। अथवा नानेनानंतरतमा वृद्धिर्निवर्त्यते किं तर्हि अंतरतमानेन निवर्त्यते। सिद्धात्र वृद्धिः स्थिते च चामादेरित्येवं न चांतरतमानेन वृद्धिर्निवर्त्यते। परिहारांतरमेवेदं मत्वा पृष्टं। कथं चेदं परिहारांतरं स्याद्यदि नाद्यज्विशेषणं देविकादयः अवश्यं चैतदेवं विज्ञेयं आद्यज्विशेषणं देविकादय इति। यदि नाद्यज्विशेषणं देविकादयः स्युरिहापि प्राप्नोति। सुदेविकायां भवः सौदेविक इति। अथात्राप्याद्यज्विशेषणत्वादित्येव सिद्धं परि

कादिभिः संबंधाभावः। अंतरतमनिवर्त्तकत्वाद्वेति। ञ्णितीति च वर्त्तते तत्र स्थानेंतरतम इति वचनादैकारो वृद्धिसंज्ञः प्राप्त आदिति वचनेन निवर्त्यते न तपूर्व आकारो विधीयते अनेन हि स्थानेंतरतम इति नियमं बाधित्वा नियमांतरं क्रियते देविकादीनामाकारो वृद्धिर्नान्या। परिहारांतरमिति। परिभाषेयं देविकादीनां वृद्धिर्विधीयमाना आकारो भवतीति केवलानां तदादीनां च वृद्धिर्देविकादीनां भवतीति तत्रैव परिभाषाप्रवृत्तिः सुदेविकायां तु प्राप्ता वृद्धिर्न सा देविकादि

=न तु प्रथमैव पक्षे तेन तदंगस्य विशेषणत्वे दाविकाकूले [illegible]त्यादिः विशेष्यते सौदेविके आद्यज्विशे [illegible] मिति परिभाषाप्रकरणे इदं भाषितं च चांगसन्निधानात् दोष इति भावः। तदा तु देविकादीनामिति =

=अर्थादिति· एवं च निरवेर्गकार्यताभावादिति [illegible] रसंगतेतिभावः। विधिसारूप्यादिति [illegible] ॥२=

यथोद्देशं च परिभाषाश्रीयते न कार्यकाला· अन्यथांगप्रकरणे देविकादीनामादिलस्योपस्थानादयाभ्रतियासोः पूर्ववदन्यतरप्रसंगात् इहप्रदेशेन च क्रियमाणो विधिरेवा
कारस्य भवतिअर्थात्त्वेकारस्य निवृत्तिरिति नायं परिहार उपपद्यते नरतम निवर्त्तकत्वादेति· सूत्रं नहीति· अष्टाध्यायी जस्तएवं सूत्रं सन्निवेशांतराश्रयणेन भिद्यते·
अथवास्मेवसूत्रस्यस्थानेऽन्यादेशो भवति· आद्यज्विशेषणत्वादिति· द्वितीयः परिहारो दूषितः पूर्वं सुस्थितएव· अन्येवार्थे लिंगदर्शनं· न्यग्रोधेचेति· केवलग्रहणं
मिह प्रकरणे गृह्यमाणमाद्यज्विशेषणमिति ज्ञापयत्यन्यथा तदनर्थकं स्यात् नचतदंतविधिनिरासार्थमंगेन न्यग्रोधस्य विशेषणात्तदंतविधेरप्रसंगात् तदेत

न ह्ययत्र क्रियमाणे दोषस्तत्र कर्त्तव्यमिति किं तर्हि यत्र क्रियमाणे न दोषस्तत्र कर्त्तव्यं· क्व च क्रियमाणे न दोषः। संज्ञाविधौ· वृद्धिरादैच् देविका
दीनामाकार इति· सिध्यति· सूत्रं तर्हि भिद्यते· यथान्यासमेवास्तु· ननु चोक्तं देविकादिषु [illegible] ग्रहणं कर्त्तव्यमन्यत्र तद्ग्रहणं तदाद्यग्रहणं
देति· परिहृतमेतत्· आद्यज्विशेषणत्वात्सिद्धमिति· न्यग्रोधे च केवलग्रहणात् न्यग्रोधे च केवलग्रहणान्मन्यामहे आद्यज्विशेषणं दे
विकादय इति· तस्य केवलग्रहणस्यैतत्प्रयोजनं इह माभूत् न्याग्रोधमूलाः शालय इति· यद्यचाद्यविशेषणं देविकादयस्ततः केवलग्रहण
मर्थवद्भवति· तदेतत्प्रयोजनं तज्ज्ञापकं भवति यद्न्यग्रोधशब्दो व्युत्पन्नं प्रातिपदिकं भवति· अथ हि न्यग्रोहतीति न्यग्रोधस्ततो नियमार्थमप
दांत इति कृत्वा न ज्ञापकं भवति· वहीनरस्यैवचनं· वहीनरस्यैत्वं वक्तव्यं· वहीनरस्यापत्यं वैहीनरिः। कुणरवाडवस्त्वाह नैव वहीनरः कस्त
र्हि विहीनरः एषः· विहीनो नरः कामभोगाभ्यां विहीन
दिति· व्युत्पत्तिपक्षे न्यग्रोधस्य च केवलस्येति दृष्टिनिषेधस्यैवास्य विधायकमिति केवलग्रहणं ज्ञापकार्थं भवति· न्यग्रोध
ति· व्युत्पत्तिपक्षे तु न्याग्रोधमिति सिद्धे केवलस्यैव न्यग्रोधस्य यथा स्यात् न्याग्रोधमूलाः शालय इत्यादौ माभूदिति नियमार्थं केवलग्रहणं न ज्ञापकं भवति· न न्यग्रोध
स्यैतावताभिमतनियमसिद्धिः न्यग्रोधस्यैव न्यग्रोधस्य नागादेरित्येवं नियमः सिध्यत्येवं· नेतरदस्ति· अनिष्टोपि नियमः स्यान्न्यग्रोधस्यैव निमित्तस्य
रस्य वृद्धिप्रतिषेध इति नैयायिको नैयासिक इत्यादौ न स्यात् तस्मात्केवलग्रहणमभिमतनियमसाधनाय न्यादेरित्ययं तु निषेधः उक्तार्थज्ञापको भवति· वहीनर
स्येति· वहो स्यास्तीति वही स चासौ नरश्चेति कर्मधारयसमासो· न्येषामपि दृश्यत इति दीर्घः। तस्यापत्यमत इञ् [illegible]

=विनापि केवलग्रहणमभिमतनियमसाधनाय [illegible] न्यादेरिति [illegible] न्यग्रोधस्य [illegible] ॥२=

प्रतिषेध॰ अपवाद॰

न य्वाभ्यां ॥ ॥ य्वाभ्यां पदांताभ्यां पूर्वौ वैजित्येवं सूत्रं कार्यं नार्थो वृद्धिप्रतिषेधेन । अपवादाविति । एकस्मिन्नंगविशेषे विधीयमानावैचौ सामान्यविहिताया वृद्धेर्बाध-
कौ सत्यपि संभवे सामान्यविशेषविषयत्वेन बाध्यबाधकभावदर्शनात् । इदानीं विषयभेदात् सत्यप्येतयोर्बाधकत्वे प्रतिविधानमाह । यद्यपीति । अनु-
पगम्यवादेनोच्यते । न हि वृद्धौ सत्यां सर्वेऽसिद्धिः वैयाकरणभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावप्रसंगात् । तस्माच्च हंतरप्रासादवृद्धि मानि
त्वां बाधितानि त्या वैचौ न विष्यतः बाधितत्वाच्च पुनर्वृद्धिर्न विष्यतीत्यभ्युपेयं । ऐचोर्विषयार्थमिति । य्वाभ्यां यवाभ्यां परस्य वृद्धिः प्राप्ता निषिध्यते ना

=नैतिःन्यायप्रसन्नपायादिति भावः॥४॥

न य्वाभ्यां पदांताभ्यां ॥ ॥ य्वाभ्यां परस्या वृद्धित्वं रसिद्धं । कुतः । अपवादो वृद्धेर्हितौ । अपवादो हि वृद्धेस्तावैचावुच्येते । नित्यावैचौ तयोर्वृ-
द्धिः । अथवा नित्यावैचौ कृतायामपि वृद्धौ प्राप्नुतः अकृतायामपि । नित्यत्वादैचोः तयोर्मध्ये पि वृद्धिस्तयोरेव । किमर्थं नेति शिष्य
ते । अथ किमर्थं प्रतिषेध उच्यते । ऐचोर्विषयार्थं प्रतिषेधसन्नियुक्तवचनं । ऐचोर्विषयार्थं प्रतिषेधसन्नियोगेनैचावुच्येते । यत्र य्वाभ्यां
परा वृद्धिस्तत्राध्यक्षैर्यथानतौ । यत्र य्वाभ्यां परस्या वृद्धिरनुच्यते तत्रैचौ यथा स्यातां इत्येवमर्थं तामिति । आध्यक्षिर्दा व्याश्विर्माधव
श्विरिति । नैतदस्ति प्रयोजनं । अचामादेर्य्वाभ्यां तौ । अचामादिना त्रैचो विशेषयिष्यामः । अचामादेर्यौ य्वाविति । कथं घाशीतिकेन तौ
घाशीतिक इत्यत्र कस्मान्न तौ भवतः ॥ ॥७॥

य्वां पूर्वावैचौ यथा स्यातामन्याभ्यां मा भूतामित्येवमर्थं प्रतिषेधवचनं । आध्यक्षैर्यथानतावेति । स्यातामिति
वाक्यशेषः । अध्यारूढोऽश्वमिति प्रादिसमासः । अत इत्यत्र । असत्यपि निषेधाने दोषं परिहर्तुमाह । अचामादेरिति । अचामादेरचः स्थाने यौ य्वौ ताभ्यां पूर्वौ
न वलइत्याश्रीयमाणे आध्यश्विरित्यादावैचोः प्रसंगः । घाशीतिक इति । द्वे अशीती भृत इति भद्विसमासः । ततष्ठन् । अध्यर्द्धपूर्वद्विगोरित्यत्र चार्हादित्यधिको
न वलइत्याश्रीयमाणे ... रक्षुभ्न भवति । अचामादेरचोपकारस्य विधानात् ततः पूर्व ऐकारः प्राप्नोति । ताविति द्विवचनं घाशीतिकस्योपलक्षणं तादुपात्तं यद्यपि य्वोरचामादिना वि-

तार्थेर

=संगकइत्यादौ संगशब्दादरत्वादयी ... ॥

मा·के·
६०

एतत्परिहर्तुमाह· यचेति· अचामादेरितियावृद्धिः प्राप्नोति तदपवादावेचौ विधीयेते· अत्र तु संख्यायाः संवत्सरसंख्यस्येति वृद्धिर्विधीयते· अचामादेरिति वर्त्तते तेनैच· अचामादेरित्येतदाश्रीयेते· न चैकं रूपपदं· तेनाचामादिरित्येवं मा वृद्धिस्तस्यां प्राप्तायां तदपवादाथ वामादेः स्थानेयाभ्यां पूर्वावेचौ भवतः इत्यर्थः संपद्यते· उत्तरपदाधिकारेपीति· तथा च प्राशीतिकेदोषः पूर्वत्रैव लिंदइति· प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः साक्षात्प्रतिषिध्यते· नैष दोषः

यत्र वृद्धिरचामादिस्तत्रैचावत्र योर्हि सा· यत्राचामादेरित्येवं वृद्धिस्तत्रैचावुच्येते· अत्र योरित्येवं वृद्धिः· किमिदं योरिति उत्तरपदस्येति· उत्तरपदाधिकारे ह्यवश्यमैजागमोनुवर्त्तते पूर्वत्रैव लिंदेन वः पूर्वत्रैव लिंदइत्येवमर्थं· नैष दोषः उत्तरपदेनाचामादिं विशेषयिष्यामः अचामादिनायोरुत्तरपदस्याचामादेर्याभ्यां वा विति· अथ कस्मात्पदान्ताभ्यां· अथ किमर्थं पदान्ताभ्यामित्युच्यते· यमेणेन न मे व घणः· इणोयणादेशेमाभूत्· यतश्छात्राः याता इति· इह वैयाकरणः सौवश्व इतिशाकलं प्राप्नोति य्वोश्च स्थानिवद्भावाद्यावेप्राप्नुतः शाकलायावादेशेषु चोक्तं· किमुक्तं· शाकलेनावदुक्तं सिन्नित्यसमासयोः शाकलप्रतिषेध इति· अयावोः किमुक्तं· अचः पूर्वत्वविज्ञानादेचोः सिद्धमिति· याभ्यां परस्यावृद्धिस्तमपवादेरवृद्धितौ· नित्सावैचौ तयोर्हि वृद्धिः किमर्थं नेति शिष्यते· यत्रयाभ्यां परा वृद्धिस्तत्राध्यक्षे यथा नतौ· अचामादेर्यवाभ्यां नौ कथं प्राशीति केन तौ· यत्र वृद्धिरचामादेस्तत्रैचावत्र योर्हि सा
ति· प्राशीतिकइत्यत्र तु देवं नेति प्रसक्तस्यातं· यानाइति· ((अथ कस्मात्पदान्ताभ्यां यमेणेन न मे व घणः॥ ॥वार॰॥ ॥अथ परस्या वृद्धिरित्य
अचामादेरचः स्थाने भवत्सयं यकारइत्यैच प्राप्नोति· ननु चान्तरंगत्वात्पूर्वमेव यणात्र्यमित्यादि व्याकरणं स्वश्च इति पूर्वमेव यणभवति ततो यथा चामादेर्यणो भवेत्तथा यणादेशोभवतीत्स दोषः अचः पूर्वत्वविज्ञानादिति· योनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवद्भावइत्यर्थः॥ ॥वार॰॥ ॥पूर्वस्तत्रैव वृद्धिरितिम
तत्वर्गता
यः प्रतिपत्तिलाघवाय कृतो न ह्येकेनाचामादेरित्यनेनोभयं शक्यं विशेषयितुं [illegible] नाप्यप्राप्ति विध्यमाना

शिवः
६०

=ननु पूर्वस्त्रैवेति प्रतिषेधस्य प्रत्याख्यानादरन्नुवृत्तादि विचारेः· पुक्तोनआह· पूर्वसंत्रेइति· तंत्राघाभ्यमणेचवनमानमिति [illegible] तंत्राघाभ्यमले पिननिर्वाहइत्याह· मापीति· अचामादेरित्येवं वृद्धिर्यत्र प्राप्ता तत्र तदपवादावैचावित्सन्त्यपक्षुनं लभ्यतइतिभावः॥०=

यदीति॰ यत्रैव वृद्धिप्रतिषेधस्तत्रैवैजभ्यां भाव्यं नान्यत्र॰ शैवमिति॰ श्रुनो विकार इति प्राणिरजतादिभ्योऽञिसञ्॰ श्वशब्दस्यनुपाठस्तदापर्थः स्यात् शैवशान
मिति॰ यावंतोयण इति॰ अपदार्थत्वादस्य सर्वेभ्यो यण्भ्यः पूर्वौ वैचौ प्राप्नुतः प्रतिषेधे तु विज्ञायमाने याभ्यां पवाभ्यां पूर्वस्य वृद्धिप्रतिषेधस्ताभ्यां पूर्वौ वै
चाविति नास्ति सर्वप्रसंगः प्रकृत्यैकाजिति षष्ठमे यं सप्रकृतिभावस्तथा चक्षो देवतास्य इत्यत्र न भवति॰ इत्वविशेषेण प्रकृतिभावमाश्रि
त्यैतदुक्तं परिहारदिक्प्रदर्शनार्थं अत्र हि परत्वाट्टिलोपं बाधित्वा वृद्धिः प्राप्ता प्रतिषिध्यते इति न वृत्तेऽऽगमश्च लभ्य मत्र परिहारः॥ सुष्टुवाऽ

यद्यनुवर्तते शौवं मांसं टिलोपे कृते ऐजागमो न प्राप्नोति॰ अपनिवृत्तं स्वाध्याय शब्दो द्वारादिषु पठ्यते तत्र यावंतो यणः सर्वेभ्यः पूर्व
ऐजागमः प्राप्नोति॰ यथेष्टं सितथास्तु॰ अस्तु तावदनुवर्तते॰ कथं शौवं मांसं॰ आनुपूर्व्यात्सिद्धमेतत्॰ नाकृते ऐजागमे टिलोपः
प्राप्नोति॰ किं कारणं प्रकृत्यैकाजिति हि प्रकृतिभावेन भवितव्यं॰ तदेतदानुपूर्व्यात्सिद्धं भवति॰ अथवा पुनरस्तु निवृत्तं॰ ननु चो
क्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावंतो यणः सर्वेभ्यः पूर्व ऐजागमः प्राप्नोति॰ कः पुनरर्हति स्वाध्यायशब्दं द्वारादिषु पठि
तुं॰ एवं किल पठ्यते स्वमध्ययनं स्वाध्याय इति तच्च न सुष्टुवा अध्ययनं शोभनं वाध्ययनं स्वाध्याय इति॰ अथापि स्वमध्ययनं स्वाध्या
य एवमपि न दोषः अचामादेरिति वर्तते॰॥ ॥स्वादेः॥ ॥अयं श्वन्शब्दो द्वारादिषु पठ्यते तत्र कः प्रसंगो यत्तदादेः स्यात्॰ नैव प्राप्नो
तिनार्थस्तदादिप्रतिषेधेन॰ इहत्स्स वाग्रहणं भवति न दंतस्य वानचेदं तन्नापि

ध्ययनमिति॰ अन्ये पाम पिद्वद्यते इति दीर्घः आङ्वा मध्ये प्रश्लेषः
यः॥ अचामादेरिति वर्तते इति॰ तत्रैवमभिसंबंधोऽचामादेरनंतरौ यौ य्वौ ताभ्यां पूर्वौ वैचौ भवत इति तेन स्वाध्यायशब्दे वकारात्पूर्व ऐज्भवतीति न नु यकाराभ्यामित्य
र्थः॥ यद्यपि स्वोऽध्यायः स्वाध्याय इत्यस्मिन्नपि पक्षे स्वाध्यायशब्दो न पठितव्यः स्वरादेः स्वशब्दस्य पाठात्तदादिविधेश्चेष्टत्वात्तथापि पाठे पि दोषो नास्तीति प्रदर्शनाय भाष्यकारेण

पाठमनुगम्य

इतरस्त्वगृहीताभिप्रायआह· नवैतदादिविधिरस्तीति· अन्यहणइति· अवन्त्यग्रहणस्योपलक्षणार्थत्वात् एतत्प्रकरणनिर्दिष्टैर्दैविकादिभिर्शारादिभिश्चा
देरचो विशेषणात्तदादिविधिर्भवतीति ज्ञाप्यते· शौवहानमिति· जिहलेऽस्मिन्निति ल्युट् श्वनां हानमिति षष्ठीसमासः। श्वहानमस्मिन्नस्तीति तदस्मिन्नस्ती
ति देशे तन्नाम्नीसणः· वृद्धिनिषेधः ऐजागमश्च द्वारादित्वात्· शौवादंष्ट्र इति· शुनोदंष्ट्रा श्वादंष्ट्रा शुनोदंत दंष्ट्रे ति दीर्घः· तत्र भवइत्यण्· संज्ञापूर्वको विधि

नवैतदादिविधिरस्ति· अतउत्तरं पठति· प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र अवन्त्यग्रहणे तदादिग्रहणस्य शौवहानाद्यर्थं· प्रतिषेधे
श्वादिग्रहणं क्रियते ज्ञापकार्थं· किं ज्ञाप्यं· एतज्ज्ञापयत्याचार्यः अन्यत्र अव्ययग्रहणे तदादिग्रहणं भवतीति· किमेतस्य ज्ञापने प्र
योजनं· शौवहानाद्यर्थं· शौवहानं नगरं· शौवादंष्ट्रो मणिरिति· इकादिग्रहणं च श्वागणिकाद्यर्थं· इकारादिग्रहणं च कर्त्तव्यं· किं प्र
योजनं· श्वागणिकाद्यर्थं· श्वगणेन चरति श्वागणिकः। तदंतस्य चान्यत्र प्रतिषेधो वक्तव्यः। श्वाभस्त्रेः स्वं श्वाभस्त्रं॥ ॥उत्त
रपदस्य॥ ॥किमर्थमिदमुच्यते अवयवादृतोरिति वक्ष्यति तदुत्तरपदस्य यथास्यात् अचामादेर्मा भूत्· नैतदस्ति प्रयो
जनं अवयवादिति पंचमी तत्रांतरेणाप्युत्तरपदं उत्तरपदस्यैव भविष्यति· उत्तरार्थं तर्हि सुसर्वार्धाज्जनपदस्येति सुसर्वार्धा
दिति पंचमी दिशोमद्राणां दिशइति पंचमी प्राचां ग्रामनगराणां दिशइत्येव· संख्यायाः संवत्सरसंख्यस्य च संख्याया इति पंच
मी वर्षस्याभविष्यति संख्याया इत्येव परिमाणांतस्यासंज्ञाशाणयोरिति संख्याया

रनित्य इति वृद्धयाश्च न भवति· इकारादिग्रहणं [illegible] मिति· श्वादेरि

=असमासेनिष्कादिभ्य इति सूत्रस्य पक्षमनैष्किक इति भाष्योदाहरणविरोधोप्येकदेशिमतमेतदि

तीति सूत्रं कर्त्तव्यं· तत्र यस्मिन्विधिस्तदादावल्ग्रहणे इति तदादिविधिर्भवति· श्वागणिक इति· श्वगणाट्ठञ्चेति ठक्· तदंतस्येति· श्वंतस्य· श्वाभस्त्रमिति· इ
त्रश्चेत्यण्· बाह्यतद्धितनिमित्तो वृद्धिप्रतिषेध ऐजागमश्च बहिरंगत्वादसिद्धः आश्रयेण निषेधेन निवारयितुमिति वचनारंभः॥ ॥उत्तर॥ ॥किमर्थमिति· तस्मादिदमु

= स्वमन्तानरमा उत्तरेति दमवयवाघातोरित्यादिना कलत्र द्विमाधानगणं ॥ विंसमेतदिति चिन्तावीलतुरु जागमेंधतेमूर्वपदस्य वेसनमूर्वपदग्रहणाघतो भवपरस्मंदति मन्त्रमूर्वपदस्याचामादेवचोद्विनिनापनाढि वाष्ट्रिके ग्रामादिग्रहिन ब्राह्मीतिके लतरंगादाघातिमस्त्याचा

जेप्रोष्ठपदानामिति पंचमीनिर्देशः प्रावाउत्तरपदस्यन स्यात् वचनं तनाधजर्थं विज्ञायमानं पूर्वपदस्यापिवृद्धिं विदध्यात् नियमार्थं वास्याज्जातार्थ एव प्रोष्ठपदानां वृद्धिः प्रोष्ठपदानामेव वाजाताद्यर्थ इति प्रोष्ठपाद इति प्रोष्ठपदाभिर्युक्तः कालः इत्यणोलुब्विशेष इति तुपिकतेसंधिवेलादि सूत्रेणजातार्थेण अत्रांगस्याचामादे वृद्धिर्मा भूदित्येवमर्थं उत्तपदाधिकारः उत्तरपदवृद्धौ सर्वं चेत्यत्रोत्तरपदाधिकारविहितवृद्धिपरिग्रहार्थश्च द्विषाष्टिक इति नन्वत्राप्यचामादेर्वृद्धिः प्राप्नोतिकथमयमवकाशः अथात्रयेननाप्राप्तन्यायेनादिवृद्धिर्बाध्यतेतद्यशीतिके विप्रतिषेधानुपपत्तिः उत्सर्गेप

इदं तर्हि प्रयोजनं जेप्रोष्ठपदानां उत्तरपदस्य यथा स्यात् पूर्वपदस्य मा भूत् प्रोष्ठपदासुजातः प्रोष्ठपादो ब्राह्मणः तद्धितेष्वचामादिवृद्धेरुत्तपदवृद्धिर्विप्रतिषेधेन ग्राशीतिकाद्यर्थं तद्धितेष्वचामादिवृद्धेरवकाशः ऐतिकायनः औपगवः उत्तरपदवृद्धेरवकाशः द्विषाष्टिकः त्रिषाष्टिकः इहोभयं प्राप्नोति ग्राशीतिकः उत्तरपदवृद्धिर्भवति विप्रतिषेधेन कः पुनरत्र विशेषो चामादिवृद्धौ सत्यामुत्तरपदवृद्धौ वा अयमस्ति विशेषः यद्यत्राचामादिवृद्धिः स्यादैजागमः प्रसज्येत ॥ ॥प्राचांग्राम॥ ॥नगरग्रहणं किमर्थं न प्राचांग्रामाणमित्येव सिद्धं न सिध्यति अन्योग्रामः अन्यन्नगरं कथं ज्ञायते एवं हि कश्चित्कंचित्पृच्छति कुतो भवानागत इति ग्रामात् स आह नग्रामान्नगरादिति ननु च योऽपि एव ग्रामः तन्नगरं कथं ज्ञायते लोकतः ये हि ग्रामे विधयो नेष्यन्ते साधीयस्तेन नगरेन क्रियन्ते तद्यथा अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतन्नागरो

वादयोरतुल्यबलतादि ति वार्त्तिककारस्य विप्रतिषेधोपन्यासोऽनयुक्त इति चिंत्यमेतत् यद्यत्रेति साच प्रतिषिध्येत ततत्संनियोगशिष्टस्य अतिषेधसन्नियुक्त ऐजागमः स्यादित्यर्थः उत्तरपदवृद्धेस्तु यथात्र प्रतिषेधोनभवति तथानन्याव्याख्यामित्यत्र प्रतिपादितं ॥ ॥प्राचांग्राम॥ ॥नगरग्रहणमिति यद्यपि समुदायवचनोपि ग्रामशब्दोऽस्ति तत्र ग्राम इ द्विपग्राम इति तथापि जननिकायनिवासार्थत्वेनातिप्रसिद्धः अभक्ष्यो ग्राम्यकुक्कुटो ग्रामेनापेयमिति तदर्थस्यैव ग्रहणमिति मत्वा प्रश्नः अन्यो हि ग्राम इति विशेषे

×चामादिवृद्धेरुत्तरपदवृद्धि×
×र्भवति विप्रतिषेधेन किंप्र×
×योजनं ग्राशीतिकाद्यर्थं अ×

= प्रतिपादितमिति अनंतर सात्रचामादिवृद्धेरेवसंनिषेध इति तन्नविवरणकारस्य मन्त्रपूर्वत्वैजिदेशेवषंगात् तस्मादख्याभ्यामिसत्राचामादेरचत्सत्तु वर्जयत्परतू द्विविधायते उत्तरपदस्यांगस्यवात्तदवयवस्याचामा

भा॰कै॰
६२

ग्रामण२

संख्याय विशेषमिति। सामान्यशब्दस्यापि प्रकरणवशाद्विशेषावस्थानं दृश्यते। संख्यायाश्च गमने निर्ज्ञाते विशेषपरिज्ञानाय कुत आगच्छतीति प्रश्ने ग्रामश
ब्दो विशेषवाची ग्रामशब्देन प्रयुक्त इति प्रतीयते। संख्या यो निवासः शालएकर्षकपुरुषप्रधानो देशो ग्रामः। गोमहिष्यादियुक्तो घोषः प्राकारपरिखान्वितं श्रे
णीधर्मयुक्तसंस्थानं नगरं प्राकारपरिखायुक्तस्तु श्रेणिधर्मान्वितो देशः संवाहः। न च नगरशब्दसन्निधाने गोबलीवर्दन्यायेन विशिष्टग्रामग्रहणं यसं

ग्रामे नाध्येयमिति साधीयो नगरेऽपि नाधीयते तस्माद् एव ग्रामस्तन्नगरं। कथं यदुक्तं एवं हि कश्चित्कंचित्पृच्छति कुतो भवानागत इति
ग्रामात्स आह। न ग्रामान्नगरादिति। संख्याय विशेषमसावाचष्टे। संख्याय विशेषा ये ते ग्रामो घोषो नगरं संवाह इति। एवं तर्हि सि
द्धे सति यद्ग्रामग्रहणेन नगरग्रहणं करोति तज्ज्ञापयत्याचार्यो ऽन्यत्र ग्रामग्रहणेन नगरग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयो
जनं विशिष्टलिंगो नदीदेशोऽग्रामा इत्यत्र नगरप्रतिषेधश्चोदितः स न वक्तव्यो भवति। यद्येतज्ज्ञाप्यते उदीच्यग्रामाच्च बह्वचोऽन्तो
दात्तादित्यत्र नगरग्रहणं कर्त्तव्यं। वाहीकग्रामेभ्यश्च नगरग्रहणं कर्त्तव्यं। दिक्छब्दाद्ग्रामजनपदाख्यानचानराटेषु नगरग्रहणं
कर्त्तव्यं। इदं चतुर्थं ज्ञापकार्थं न त्वातिनिर्बन्धो न लाभः। तस्माद्यस्मिन्नेव ग्रहणे नगरग्रहणं नेष्यते तत्र प्रतिषेधो वक्तव्यः॥ ॥सं
ख्यायाः संव॰॥ ॥संवत्सरग्रहणमनर्थकं परिमाणान्तस्येति कृतत्वात्। संवत्सरग्रहणमनर्थकं। किं कारणं। परिमाणान्तस्येति
कृतत्वात्। परिमाणान्तस्यासंज्ञाशाणयोरिसेव सिद्धं ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य। एवं तर्हि ज्ञापयत्याचार्यः कालप
रिमाणानां वृद्धि[illegible]र्न भवतीति।

ग्राम

वाहादिनिवृत्त्यर्थेन नगरग्रहणं संवाहादिनिवृत्तेरनिष्टत्वात्। उदीच्यग्रामाच्चेति। मा नगरमित्यादौ अन्तर्थं वा
हीकग्रामेभ्यश्चेति शाकलिक इत्याद्यर्थं। दिक्छब्दा इति। पूर्वपाटलिपुत्रमित्यादौ पूर्वपदान्तोदात्तार्थं। अतिनिर्बन्ध इति। अतिगौरवं। न लाभ इति ला
घवं॥ ॥संख्यायाः संव॰॥ ॥संवत्सरग्रहणमिति। कालः क्रियापरिच्छेदहेतुत्वात्परिमाणं न विशेषवाची संवत्सरशब्द इति भावः॥ ॥७॥ ॥

शिव॰
६२

नाषादिति · नन्वेवमपि नाप्येकस्यांगस्य वृद्धिकृत एकः संस्कार इति [illegible] दर्शितआमांशाम्यामसेकस्यौदनस्योपसेककृत एकः संस्कारस्तद्वत्समानफलकत्वमात्रेण बाध्यबाधकभावो ऽसत्यपि विरोधे इति भावः २

द्वैरात्रिक इति · द्वे रात्री अधीष्ट इति तद्धितार्थे समासे राज्यहःसंवत्सराच्चेति शरस्व विधानात् पक्षेऽन्य: द्वैसमिक इति · अधीष्टादिषु समायाः खः द्विगोर्वेति
पक्षेऽन्य: अचामादेर्वृद्धिर्न स्यादिति · सत्यपि संभवे बाधनं भवतीति न्यायात् · अपर आहेति · पूर्वं विशेषविषयं ज्ञापनमाश्रितमिदानीं तु सामान्यविषयमि
तिभेदः · द्विवर्षेति · द्वे वर्षे भूतो भावी वा तमधीष्ट इति ठञ् · तस्य वर्षाल्लुक् इति पक्षे लुक् द्विगोरिति ङीप्प्राप्तो ऽपरिमाणेति प्रतिषिध्यते ॥ ॥प्रवाह॥ ॥पूर्वस्य तु वे

किमेतस्य ज्ञापने प्रयोजनं · द्वैरात्रिकः त्रैरात्रिकः · अचां वृद्धिर्न भवति · नैतदस्ति प्रयोजनं · नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धाव
सत्यां वा · इदं तर्हि द्वैसमिकः त्रैसमिकः · इदं चाप्युदाहरणं · द्वैरात्रिकः त्रैरात्रिकः · ननु चोक्तं नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धा
वसत्यां वेति · अयमस्ति विशेषः · यद्यत्रोत्तरपदवृद्धिः स्यात् चामादेर्न स्यात् · अपर आह · ज्ञापकं तु कालपरिमाणानां परिमाणग्रह
णस्य · एवं तर्हि ज्ञापयत्याचार्यः कालपरिमाणानां परिमाणग्रहणेन ग्रहणं न भवतीति · किमेतस्य ज्ञापने प्रयोजनं · अपरिमाण
बिस्ताचितकम्बल्येभ्यो न तद्धितलुकि द्विवर्षा त्रिवर्षा · परिमाणपर्युदासेन पर्युदासो न भवति ॥ ॥प्रवाह॥ ॥परस्य वृद्धिर्नेत्य
नुवर्त्तते उताहो न · किं चातः · यद्यनुवर्त्तते प्रवाहणेयी भार्या ऽस्येति प्रावाहणेयीभार्यः · वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न
प्राप्नोति · अथ निवृत्तं · न दोषो भवति · यथा न दोषस्तथास्तु · अथवा पुनरस्त्वनुवर्त्तते · ननु चोक्तं प्रवाहणेयीभार्यो ऽस्य प्रवाहणे
यीभार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न प्राप्नोतीति · नैष दोषः · भाष्य एवं ज्ञानेनैस्येवं भविष्यति ॥

अनुवर्त्तते तत्र यदा पूर्वस्य वृद्धिर्नास्ति तद
उत्तरपदस्य वृद्धिभावाभावयोः श्रुतौ विशेषाभावाद्विशेषान्तरजिज्ञासया प्रश्नः · परस्येति · प्रवाहणेयीति · शुभ्रादिभ्यश्चेति ढक् · ननु वृद्धेर्निमित्तं यस्मि
न्णकारादिः स वृद्धिनिमित्त इत्याश्रितं ततो ऽसत्यामपि पूर्वपदे वृद्धौ वृद्धिनिमित्तव्यपदेशसद्भावात् पुंवद्भावप्रतिषेधो भविष्यति · नैतदस्ति · ञ्णकाराणां वृद्धिमु
त्पादयतामेव वृद्धिं प्रति निमित्तत्वं नान्यदा यथा लुक्कर्मोरनात्मनेपदनिमित्तत्वं सत्यस्य लोवात्मनेपदे लुक्कर्मोरात्मनेपदनिमित्तत्वादिभावो नास्ति · ज्ञाते

यथातथा एतौ पदार्थानतिवृत्तौ ... वयथौ तथाभावमनतिक्रान्तं यथानर्थसत्यं पुरा यथाभूतं यदस्तु तदयापि तथाभावमन
तिक्रान्तं यथापुरं अत एव सूत्रे ह्रस्वनिर्देशः ... एतच्च यथातथाभाव इति भाष्ये ... विरुध्यते तस्मान्न ... दीर्घपाठ एवोचित
इति परे

विशिष्टो निपात इत्यर्थः ... सत्यरूपार्थ इत्यर्थः

मा·कै·

६२

यथा·॥ ॥नयथातथेति·यथातथेत्ययं निपातो विपरीतार्थ इत्नि रितिकेचिदाहुः अन्ये तु यथातथाशब्दयोः समासस एवैतदर्थ इत्याहुस्ततो नञ्ञिति समासे कृते ब्राह्मणादिषु
दर्शनात्ष्यञ्‌ स्वरे पि नास्ति विशेषः आयथातथ्यमित्यस्य ञ्नित्यादिरुदात्तत्वात् अयाथातथ्यमित्यस्याप्यव्ययपूर्वपदप्रकृतिस्वरत्वात् मूलयातरार्थत्वेन तत्र नवर्तिं अननि
धानादेतासां प्रत्ययान्तराभावात्॥ ॥आतो·॥ ॥दद्दाविति·उत्तमस्य णलो णिलाभावपक्षे श्राव का भ्रमो तं णिले परत्वाद्युग्बाधेत·अदायीति·सूत्रे विणोनिमि

यथातथा·॥ ॥अयं योगः शक्यो वक्तुं·कथं अयाथातथ्यं·आयथातथ्यं·अयाथापुर्यं आयथापुर्यं·यदा नावत् पूर्वपदस्य वृद्धिस्तदेवं वि
ग्रहः करिष्यते·नयथा तथा अयथातथा अयथातथाभावः अयथातथ्यं·यदोत्तरपदवृद्धिस्तदेवं विग्रहः करिष्यते यथातथाभावः
याथातथ्यं न याथातथ्यमयाथातथ्यं·॥ ॥हनस्तो·॥ ॥हंतेस्तकारे तद्धिते प्रतिषेधः हंतेस्तकारे तद्धिते प्रतिषेधो वक्तव्यः वार्त्रघ्नं
श्रौणघ्नः उक्तं वा किमुक्तं·धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति·॥ ॥आतो युक्·॥ ॥कृद्ग्रहणं किमर्थं·इत्साभ्रृ
द· दद्दौ·दधौ·नैतदस्ति·अचिण्णलोरिति वर्त्तते·यद्यचिण्णलोरिति वर्त्तते अदायीत्यत्र न प्राप्नोति·वचनाच्चिणि भविष्यति·अचि·
ण्णलोरिति वर्त्तते·एवमपि चोऽडिर्वात्वाकिरित्यत्र न प्राप्नोति·लोपो च बाधको भविष्यति·इदमिह संप्रधार्यं लोपः क्रियतां युगिति
किमत्र कर्त्तव्यं·परत्वाद्युक्·एवं तर्हि चामादेरिति वर्त्तते यच्चाचामादिराकारस्तत्र युगिति·एवमपि ग्लादेर्वना·स्य स्याली पाक
स्य ग्लः स्याली पाकः अत्र न प्राप्नोति·तस्मात्कृद्ग्रहणं कर्त्तव्यं·॥ ॥नोदात्तोप·॥ ॥असत्यमिदमुच्यते·नाचमेरिति·अनाचमिकमिवमि

तत्रेनोपादानाद् चिण्णलोरित्यनुवर्त्तनाच्च विधिनिषेधयोः पर्यायः स्यात्·वचनादिति·आतो युक् चिणि चेति चिणः साक्षादुपादानान्निषेधो न भविष्यति·चिणि
विधिः प्रत्यक्षशिष्टत्वादसंदिग्धो निषेधस्तु णलर्थ एवानुवर्त्तने अथ चिण्णर्थोपीति संदिग्ध इत्यसंदिग्धो विधिरेव प्रवर्त्तते·अचामादेरिति वर्त्तत इति·नन्वे
वं दरिद्राय के युङ् प्राप्नोति एवं तर्हि दोषान्तरोपन्यासादयं दोषो नोक्तस्तदाह·एवमपीति·आदिवन्नावाद्यत्र प्रसंगो यथा दायक इत्यादौ॥ ॥नोदा·॥ ॥कामइति·आयास्य

शिवः

६२

शाछा॰॥ ॥पातेर्लुगिति॰यद्यपिपालरक्षणाद्यस्यपालयतीतिसिध्यतितथापिपातेःप्रुङ्‌निवृत्त्यर्थेलुगागमविधानंलुग्विकरणत्वान्नस्याद्धुकोऽप्रसंगः॥ ॥प्र
त्ययस्यात्का॰॥ ॥स्यग्रहणमिति॰कादितिवर्णग्रहणंनचवर्णमात्रंककारःप्रत्ययोस्तीतिसामर्थ्यात्प्रत्ययावयवेप्रत्ययशब्दोवर्तिष्यतइतिप्रश्नःइतर
:पक्षांतरेप्रयोजनमाख्यातुमाह॰इदमिति॰वक्ष्यमाणस्यबुध्याप्रसंक्षीकृतस्यपरामर्शःइहापीति॰अन्यथाहत्तिकेत्यादावेवस्यादज्ञातायर्थविव
क्षायामत्रकप्रत्ययः॰स्यग्रहणेतुक्रियमाणेसर्वत्र भवतिप्रत्ययस्यापिप्रपदेशिवद्भावेनप्रत्ययस्यत्वात्॰असुबंतइति॰नसुबसुबंदितिन
ञ्समासोऽसुपइत्यस्यबहुव्रीहित्वप्रदर्शनायभाष्यकारेणनाश्रितंतदाश्रयणेहिबहुव्रीहिरेवन्याय्योनतुमत्तुबंतसमासः॰तत्रायंप्रश्नः॥किमसुपइति
गापर्यं॰

शाछा॰॥ ॥णिच्यकरणेभ्रस्त्रीजोर्नुग्वचनं॰णिच्यकरणेधम्रीजोर्नुग्वक्तव्यः॰धनयति॰प्रीणयति॰पातेर्लुग्वचनं॰पालय
ति॰॥ ॥प्रत्ययस्यात्कासर्वं॰॥ ॥स्यग्रहणंकिमर्थं॰इदंविचारयिष्यतेइत्येकग्रहणंसंघातग्रहणंवास्याद्वर्णग्रहणंवेति॰न
घदासंघातग्रहणंतदास्यग्रहणंकर्त्तव्यंयदापियथास्माकारिकाणारिका॰यदाहिवर्णग्रहणंतदाकेवलःककारःप्रत्ययो
नास्तीतिसत्तावचनात्भविष्यति॰अथासुपइतिकथमिदंविज्ञायते॰असुबंतोंगस्येत्याहोस्वि[illegible]नचेत्सुपःपरआबितिकिं
चातःयदिविज्ञायतेऽसुबंतोंगस्येतिबहुचर्मिकाअत्रनप्राप्नोति॰अथविज्ञायतेनचेत्सुपःपरआबितिनदोषोभवति॰यथानदो
षस्तथास्तु॥

बहुव्रीहिराश्रीयतेनविद्यतेसुब्यस्मिंस्तदसुबिति॰अथतत्पुरुषःप्रसज्यप्रतिषेधश्च॰नचेत्सुपइति॰प्रत्ययग्रहणेनतदंतविधेः
सुबंतादितिबोद्धव्यं॰बहुचर्मिकेति॰बहूनिचर्माण्यस्यामितिबहुव्रीहिःप्रत्ययलक्षणेनसुबंतेनदंगमितीत्थंनप्राप्नोति॰नत्सुमतांगस्येतिनिषेधोत्र
नास्ति॰लुमतालुप्तेप्रत्ययेयदंगंतस्य कार्येसप्रतिषेधःइदंतुअप्यंगं॰नदोषोभवतीति॰चर्मशब्दःसुबंतोनचतस्मात्परआपूर्व्यवधानात्॰बहवःप
रिव्राजकाअस्यांबहुपरिव्राजिकेति॰अत्रलुप्तप्रत्ययलक्षणेनसुबंतात्परिव्राजकशब्दात्परआबितिप्रतिषेधःप्रवर्तते॰पर्युदासाश्रयणेत्समासात्सुबंता

=स्थानिवद्भावादिति॰ तथा चाकारव्यवहितकारसंघातः सम्बन्धेनेति भावः॰ वाक्यीयकार्येस्थानिवद्भावस्य च समाधानम् अथवेति॰ ५=

इत्वेइति॰ यघकारां तस्य शब्दस्य कादिति निर्देशस्ततः संघातग्रहणं अथागन्तुनाकारेणोच्चारणार्थेन निर्देशस्ततो वर्णग्रहणं॰ ननु वर्णग्रहणे स्पृग्रहणान
र्थक्यात्स्पृग्रहणात्संघातग्रहणेन भाव्यं॰ नैतदस्ति॰ कोत्र निर्दोषः पक्ष इति॰ विचार्यते॰ यदि च संघातग्रहणपक्षो दोषवांस्तन्माकारिस्पृग्रहणमुपचयो
भविष्यति॰ एतिकार इति॰ एतदेऽक चिजसि स्पृघघलेटापीते चरूपं॰ अकचो कार उच्चारणार्थेन श्रवणार्थस्तेन धक्कि छिरकुदित्यादि सिध्यति॰ वचना
दिति॰ यथैव कारिके साद्यावेकादेशे कृते॰ न च केक कारे संपन्ने स्तत्पूर्वं गत्वा न वसेवमकञ्चि धिस्तेनेकराद्धः संघातउच्चारित इति तद्दाश्रयेत्तम् इत्तिः
अस्तीति॰ एकादेशस्य पूर्वविधौ स्थानिवद्भावात्॰ अंपथावचनादित्यस्यायमर्थः॥ नमासयोरिति वचनाज्ज्ञापकाद्भविष्यति॰ इतरस्त्वग्रहीतानिमा

इदं विचार्यते॰ इत्वे कग्रहणं संघातग्रहणं वा स्याद्वर्णग्रहणं वेति॰ कश्चात्र विशेषः॥ इत्वे कग्रहणे संघातग्रहणे चेदेतिकास्वप्रा
माव॰ तिः॥ इत्वे कग्रहणे संघातग्रहणे चेदेतिकास्वप्राप्तिः॥ एतिकाश्वरं ति॰ वचनाद्भविष्यति॰ अस्तिवचने प्रयोजनं॰ किं॰ कारिका हारिके
ति॰ अस्तु तर्हि वर्णग्रहणं॰ वर्णग्रहणं चेद्व्यवहितत्वादप्रसिद्धिः॥ वर्णग्रहणं चेद्व्यवहितत्वान्न प्राप्नोति कारिका हारिका॰ अका
रेणव्यवहितत्वान्न प्राप्नोति॰ एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव॰ एवं तर्ह्याश्रयप्रत्ययस्था
×एकादेशेकृतेनास्ति× ×व्यवधानं×२ कात्पूर्वस्येति॰ न क्वचिद्व्यवधानं तत्र वचनाद्भविष्यति॰ वचनप्रामाण्यादिति चेद्रथकघादिष्विति प्रसंगः॥ वचनप्रामाण्यादि
दिति चेद्रथकघादिषु दोषो भवति॰ रथकघा गर्गकाम्या॥
पश्चात्॰ अस्तीति॰ तत्रश्चानिश्राय नभकारस्य परस्ता न रमाश्रयति॰ अस्तु तर्हीति॰ व्यवहि
तत्वादिति॰ ननु चापीसनेन ककारेण विशेष्यते किं तर्हि कारः॰ आं पिच परतोऽकारस्य कात्पूर्वस्येति व्यवहितस्यापि पूर्ववादित्वं प्रवर्त्तिष्यते॰ नैतद
स्ति॰ रथकघादावप्येवं प्रसंगात्॰ किं च कात्पूर्वस्येति पूर्वग्रहणं कृतं न त्वापि पूर्वस्येति॰ ततश्च निर्दिष्टपरिभाषोपस्थानाद्व्यवधाने न प्राप्नोति
तत्र वचनादिति॰ आनंतर्यमसंभवान्नाश्रीयते॰ रथकघेति॰ रथानां समूह इति इनित्रकघचश्चेति कघच्॥ गर्गकाम्येति॰ गर्गमिच्छत्यात्मन इति का

=निर्दिष्टपरिभाषा वाधा पीसंयोगेन पूर्वस्येति॰ पूर्वस्येति विशेषणाऽन्वयसामर्थ्यात् किं तत्र प्रत्यान्वये मानाभावो॰ =पूर्वग्रहणमनुवर्त्तमानमीसभिमानः तत्र कालर्वस्येत्यंशेगविकल्पे अव्यवधानांशः प्रवर्त्तते॰ तोमाघाकारस्येत्यंसार्थिकेऽकारे॰ पूर्वग्रहणं तु कर्वेकोपरस्येता भावाय॰ २=

येननाव्यवधानमिति· नानंतर्यपरिसज्यते किंतु यावत्संभवति तावदाश्रीयते मघेवमेतिकाइस्त्रयोर्यामकाराभ्यां व्यवधानादित्वं न प्राप्नोति· एकस्तकारसंबं
ध्यकारेण द्वितीयस्त्यदादीनामःस्सकारः नैषदोषः द्वयोरकारयो [illegible] रेकादेशे कृते यासहैकादेशस्य स्थानिवत्वादेकेनैवाकारेण व्यवधानं न पुनः
स्थानिवत्प्रतीतिर्यतो द्वावकारे व्यवधायकौ स्यातां सकृत्प्रवृत्तालक्षणस्य चरितार्थत्वात्· व्यपवर्गाभावादिति· वार्णादांगं बलीय इत्येतदनाश्रित्य
कं· उभयत इति· आपियः कथ इत्येवमुभयमाश्रीयते अथवापि परतोऽकारस्य कालत्वस्याश्रयेण तेन तथापुनरयमेवाश्रितं तुल्यकालं भवति· एवं जाती

नैषदोषः येननाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्· केन च नाव्यवधानं· वर्णेनैकेन· संघातेन पुनर्व्यवधानं भवति न च
भवति· अथवा पुनरस्तु संघातग्रहणं· ननु चोक्तमितेकग्रहणं संघातग्रहणं चेदेतिकास्त्वप्राप्तिरिति· परिहृतमेतत्· वचना
द्भविष्यतीति· ननु चोक्तमस्मिन्वचने प्रयोजनं· किं· कारिकाहारिकेति· अत्राप्येकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति· अंतादिवच्च
येन व्यपवर्गः उभयत आश्रयेनांतादिवत्· एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यपवर्गः एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञाप
यति भवत्येवंजातीयकानामपीत्वमिति· यदयं नयासयोरिति प्रतिषेधं शास्ति· मामकनरकयोरुपसंख्यानं· कर्तव्यं· मामि
का· नरिका· किंपुनः कारणं न सिध्यति अप्रत्ययस्थत्वात्· त्यक्त्यपोश्च [illegible] प्रतिषिद्धत्वात्· त्यक्त्यपोश्चोपसंख्यानं
कर्तव्यं· दाक्षिणात्यिका इहत्यिका· किंपुनः कारणं न सिध्यति प्रतिषिद्धत्वात्·

प्रकानामिति· प्रकारवचने जातीयर्प्रत्ययः अकज्वतामिसर्पः मामिके
ति· ममेयं युष्मदस्मदोरन्यतरस्यां खञ्चेत्यन्यतरस्यां ग्रहणादाग्नीयतोणि अस्यतवकममकावेकवचने इति ममकादेशः केवलमामकेत्यनेन संज्ञायां छन्दसो
ङीपो नियमादन्यत्र टाप्· नरं कायति नरिका· दाक्षिणात्यिकेति· दक्षिणस्मिन्देशे दक्षिणा दक्षिणादाच्· तत्र भवा दक्षिणापश्चात्पुरसस्त्यगिति त्यक्· अत्रा
तार्थविवक्षायां कः इह भवा इहत्यिका अव्ययात्त्यप् पूर्ववत्कः उदीचामातइतिपाक्षिकप्रति

एवं चाय कापि तदेव त्ये इति न वक्तव्यमिति गूढोभिसंधिः

इतसंधेः प्रत्यय इतिन एतदंशेनाश्रीयते

नयासयोः॥ ॥यासेति प्रथमैकवचनांतयोरुपादानादिह व्यंतरे प्रतिषेधाप्रसंगादाह॥ यत्तदोरिति॥ उपसकेति॥ उपाधिर्यासकन्यासन्योरुपोरिति लकन्॥ नैवंजातीयकानामिति॥ येनेकाचो व्यंजनादयः प्रत्ययाः संज्ञाविषयास्तेषामित्यर्थः॥ यदयमिति॥ ननु वल्गुगर्धमिकारोच्चारणं स्यात् अन्यथा पंचभिर्भ्रलिकाभिः क्रीत इ साहरिति ण्कोऽध्यर्धपूर्वेति लुकि कृते लुक्त द्धितलुकीति लुकि गापो लुकि निमित्ताभावादित्वं न स्यात् संचमल्लिक इति॥ अंतरंगांश्च विधीन् सर्वोलुग्बाधते न तु लुगेव॥ तथा च सनीस्रंसध्वंसादीनलोपो न भवति पंचभिः खट्वाभिः क्रीतः पंचखट्व इत्यादौ गपासहैकादेशेन भवति॥ अन्यथैकादेशः स्यादिवभावादावश्यक्रणेन ग

नयासयोः॥ ॥नयत्तदोरिति वक्तव्यं॥ इहापि यथा स्यात्॥ यकां यकामधीते तकां तकां पचामहे इति॥ प्रतिषेधे लकन उपसंख्यानं कर्तव्यं॥ अधित्यकाऽ उपत्यका॥ तत्तर्ह्युपसंख्यानं कर्तव्यं न कर्तव्यं॥ आचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामित्त्वं भवतीति यदयं म ऐकन्नितीत्त्वं तस्य निर्देशं करोति॥ पावकादीनां छंदसि॥ उपसंख्यानं कर्तव्यं॥ हिरण्यवर्णाः शुचयः पावकाः॥ कुष्टा अलोमकाः॥ छंदसीति किमर्थं॥ पाविका अलोमिका॥ आशिषि चोपसंख्यानं कर्तव्यं॥ जीवतात् जीवका॥ नंदतात् नंदका॥ भवतात् भवका॥ उत्तरपदलोपे चोपसंख्यानं कर्तव्यं॥ देवदत्तिका देवका॥ यज्ञदत्तिका यज्ञका॥ क्षिपकादीनां चोपसंख्यानं कर्तव्यं॥ क्षिपका॥ ध्रुवका॥ ध्रुवका॥ चटका॥ तारका॥ ज्योतिषि उपसंख्यानं कर्तव्यं॥ तारका॥ ज्योतिषीति किमर्थं॥ तारिका दासी॥ वर्णकातांतवे उपसंख्यानं कर्तव्यं॥ वर्णका तांतवश्चेति किमर्थं॥

हणाल्लुकि कृते॥ कारस्य श्रवणं न स्यात्॥ तदेवं सति प्रयोजनेन ज्ञापकमिकारोच्चारणमिति चिंत्यमेतत्॥ लिकन्निति प्रक्रियालाघवार्थं मन्त्वा विषयलाघवमुक्त्वा येस कन्लिसकारोच्चारणमित्वाभावस्य न ज्ञापकं॥ पंचभिरुपलकाभिः क्रीतः पंचोपसक इत्यादौ तद्धितलुकि अकारश्रवणार्थत्वात्तस्य॥ पावका इति॥ पुनातीति पावयतीति वा पावकाः॥ जीवकेति॥ आशिषि चेति वुन्॥ देवकेति॥ अनजादौ विभाषा लोपो वक्तव्यः॥ उवर्णात् इति स्त्रेशब्दस्य लोपः॥ क्षिपकेति॥ क्षिपेर् इगुपधलक्षणेके कृते अज्ञातादिषु कः॥ अथ वा कुन्॥ शिल्पिसंज्ञयोरिति कुन्॥ ध्रुवकेति॥ ध्रुगतिस्थैर्ययोः॥ ध्रुवकेति॥ धूञ् विधूनने॥ वर्णकेति॥ वर्णयतिमहतादिकं गुणमिति वर्णका प्रावारविशेषः॥ तंतोर्विकारस्तांतवं और्णिसूत्रं॥

= नियममिति॥ प्रत्ययो नरः प्रत्ययोऽस्त्वस्य विशेषणं विवक्षितेन तु लुग्विषये ज्ञापकत्वं निकन्निति कारोच्चारणं तु नाप्यो के तानवज्ञापकमिवेन लुग्विषयमपि ज्ञापकमस्तु यावता वचनं न चरितार्थं तस्य सर्वस्य ज्ञापकत्वं पावादि निजगतो

वर्णिकेति॰ व्याख्यात्रीत्यर्थः। भागुरी टीकाविशेषः। अष्टकेति॰ इष्यशिभ्यां तकन्निति तकन्। पितरश्च देवताः पितृदेवतास्तदर्थं कर्म पितृदेवत्यं देवतान्तात्तादर्थ्ये यदिति यत्। अष्टिकेति॰ अष्टौ परिमाणमस्याः संख्याया अतिशदन्तायाः कन्निति कन्। सूतकेति॰ नस्तामिवचन इति प्रतिषेधाज्ज्ञापकात्स्वार्थे कन्। पुत्रिकेति॰ पुत्रशब्दाच्छाद्यादित्वात् ... स्वार्थे कन् केण इति ह्रस्वः। तस्य पक्षेऽकारो विधीयते। वृन्दारिकेति॰ वृन्दमस्या अस्तीति शृङ्गवृन्दाभ्यामारकन् ... वक्तव्य इत्यारकन्॥ ॥उदीचामातः॥ ॥स्त्रीविषय इति॰ अर्थगतं स्त्रीत्वं शब्दे समारोप्य निर्देशः कृतः। अभ्यंयिकेति॰ अभ्यंयातीत्यभ्यंयातीति क्विप्। अभ्यंग इत्यशब्दो निपातो

वर्णिका भागुरी लोकायतस्य॰ वर्त्तका शकुनौ प्राचामुपसंख्यानं कर्त्तव्यं॰ वर्त्तका शकुनिः। शकुनाविति किमर्थं॰ अष्टिका खारी॰ वा सूतका पुत्रका वृन्दारकाणामुपसंख्यानं कर्त्तव्यं॰ सूतका सूतिका पुत्रका पुत्रिका वृन्दारका वृन्दारिका॥ ॥उदीचामातः स्थाने॥ ॥किमर्थं स्त्री लिंगनिर्देशः क्रियते नयकपूर्वस्येत्येवोच्येत॰ स्त्रीविषयो य आकारस्तस्य स्थाने योऽकारस्तस्य प्रतिषेधो यथा स्यादिह मा भूत्॰ अभ्यंया तिअभ्यंयाः अभ्यंयिका॰ मद्रंयातिमद्रंयाः मद्रंयिका॰ यकपूर्वे धात्वन्तप्रतिषेधः। यकपूर्वे धात्वन्तप्रतिषेधो वक्तव्यः। किं प्रयोजनं॰ सुनयि काअशोकिका अपाकिका॥ ॥भस्त्रैषाजाज्ञा॥ ॥एषा द्वे न न्पूर्वे अनुदाहरणे असुप इति प्रतिषेधात्। अभस्त्राग्रहणं किमर्थं

×वर्णिका भागुरी लोकायतस्य॰ भावामिति किमर्थं॰ वर्णिका॰ अष्टका पितृदेवत्येऽ× नञ्भाषितपुंस्कादित्येव सिद्धं भस्त्राग्रहणमुपसर्जनार्थं उपसर्जनार्थोयमारम्भः
×पसंख्यानं कर्त्तव्यं॰ अष्टका॰ पितृदेवत्य इति किमर्थं॰×

अज्ञाताद्यर्थविवक्षायां कः केण इति ह्रस्वः। यकपूर्वे इति॰ धात्वन्ताभ्यां यकारककाराभ्यां परस्मात्स्थानेऽकारस्येत्वप्रतिषेधस्य प्रतिषेधस्तेनेत्वं भवत्येव॰ शोभनो नयो यस्याः सुनया नास्ति शोको ऽस्या अशोका॰ पूर्ववत्कः॥ ॥भस्त्रे॥ ॥पाक्षिकप्रतिषेधार्थमारम्भः। एषा द्वे इति॰ न एषका न द्वके इति विग्रहे नान्तरंगानपि विधीन्बहिरंगो लुग्बाधत इत्युक्ते सुसदाघसादिषु समासे कृते सुब्लुकि च समासाद्याविभक्तिस्तस्यां त्यदाद्यत्वं ततष्टाप्। सच प्रत्ययलक्षणेन सुबन्ताभ्यां पर इत्यसुप इ तीत्वप्रतिषेधस्याव्यापारादनेनेकारस्यैव भवति तस्मान्न न्पूर्वयोरेवैतयोः पाक्षिकः प्रतिषेधः। एषकाएषिका द्वके द्विके इति एषेति प्रथमैकवचननिर्देशादन्यत्र

=पाक्षिकस्य॰४=

मा॰ के॰
६६

अत्र पक्षे पकारस्यैव तु सान्नवी
तिनश्यो लोपः

=पिबतेरि[illegible]सर्गाश्रयणात्॰ ३२=

ना॰ के॰
७७

क्ततायामपीति॰ स्थानिवद्भावात्॰ एवं तर्हीति॰ सर्वत्राकोवृद्धौकृतायामेकारैकारयोर्लोपोनलकः॥ अलररराजदिति॰ राजानमतिक्रांत [illegible] वानितिप्रातिपदिकाथ लर्थइतिणिचिकृतेतउपधायाइतिवृद्धौकृतायामगेवलुप्यते॰ यत्तर्हीति॰ प्रत्याहारग्रहणंक्लिंगात्पूर्वविप्रतिषेधेनलोपो नभवति॰ ननुप्रत्याहारग्रहणस्थानि नमाख्यदससत्वामत्रोमिनमाख्यदनुगोमदित्यादौवृद्धिप्रसंगाभावाल्लोपेकृत्वनिषेधार्थंस्यादितिकथंज्ञापकमितिचिंत्यमेतत्॰ अचारुः॥ अनभिधानामि जत्रनास्तीतिभाष्यकारस्याभिप्रायः॥ एवंतुज्ञापकेनलोपस्यबलीयस्त्वेयदुक्तंहलिकल्योरत्वनिपातनंसन्वद्भावप्रतिषेधार्थमितितन्नद्विरुच्यते॰ असत्स

किमत्रकर्त्तव्यं॰ परत्वा [illegible] द्वृद्धिः॰ नित्यात्लोपः कृतायामपिवृद्धौप्राप्नोत्यकृतायामपि॰ अनित्योलोपः अन्यस्यकृतायांप्राप्नोत्यन्यस्याकृतायां॰ शब्दां तरस्यचप्राप्नुवन्विधिरनित्योभवति॰ उभयोरनित्ययोःपरत्वाद्वृद्धिः॰ वृद्धौकृतायांलोपस्तल्लाल्लोप्यंगंभवति॰ एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापय तिवृद्धेर्लोपोबलीयानिति॰ यदयमल्लोपिनांनेतिप्रतिषेधंशास्ति॰ नैतदस्तिज्ञापकं॰ अस्तिह्यन्यदेतस्यवचनेप्रयोजनं॰ किं॰ यत्रवृद्धाव पिकृतायामगेवलुप्यते असररराजत्॰ यत्तर्हिप्रत्याहारग्रहणंकरोति॰ इतरथाह्यल्लोपिनांनेतिब्रूयात्॰ एवंवावृद्धेर्लोपोबलीयान्॰ अ थवाआरभ्यतेपूर्वविप्रतिषेधः॥ एयल्लोपाविय्यङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धमितितस्मादुपसंख्यानंकर्त्तव्यं॥ ॥नाल्लो॥ ॥

पत्वनिपातनेवृद्धिंबाधित्वेकारस्यलोपेसतिसन्वद्भावस्या अल्लोपिप्रतिषेधानर्थकंचस्थानिवद्भावात्॰ अल्लोपिप्रतिषेधश्चानर्थकः॰ किंकारणं॰ स्थानि प्रसंगात्॰ अनाश्रित्यज्ञापकंत्वत्निपातनमुक्तं॰ ज्ञापकाश्रयणंतुआपः॥ पटुमाख्यदपपटदित्यादावकृतायांवृद्धौलोपेसतिसन्वद्भावाभावार्थं॰ अथवेति॰ हलिकल्योर त्वनिपातनमेवज्ञापकंलोपात्पूर्वंवृद्धिर्भवति॰ णिलोपस्तुवाचनिकेनपूर्वविप्रतिषेधेनवृद्धेःपूर्वंभवति॰ एवंपटुमाख्यदपपटदितिसन्वद्भावप्रसंगात्प्रत्या हारग्रहणमेवज्ञापकमाश्रयणीयं॰ तेनवृद्धेःप्राग्लोपोविधेयः॥ ॥नाग्लोपि॥ ॥मालामाख्यदममालदित्यादौटिलोपस्यस्थानिवत्वादनुपधात्वात्आभिरेवरूपस्य नास्तीतिप्रतिषेधोनर्थकः॰ ननुप्रतिषिध्यतेतच्चस्थानिवत्वंकिंतुउपधातच्चपरनिमित्तकत्वेपिनि॰ नैतदस्ति॰ परत्वर्थःसप्रतिषेधस्तस्यणौचङ्युपसंख्यानमिस

अल्लोपीति॰ २

शिवः
७७

हलचोरादेश इति। यथा सुधातुरकङ् चेत्यादेशे समुदाये ऽवयवस्यानादेशत्वादणोऽरपरत्वं न भवति सौधातकिरिति। तथा समुदाये स्थानिन्यवयवस्यास्थानित्वादजादेश
त्वाभावान्नास्ति स्थानिवद्भावः। किंपुनरिति। अवयवात्मकता समुदायस्य तस्मिन्स्थानिन्यवयवानामपि स्थानित्वादजादेशत्वान्न्याय्य एव स्थानिवद्भावः। तथा च
स्वदृश्यंप इति कृ स्थानिकत्वाश्रयणे इपरत्वं भवतीति भावः। इतरः पूर्वोक्तेनाभिप्रायेणाह। अजादेश इति। इतरस्त्वनुमीयमानो वक्ष्यमाणाश्रयितव्यः स्थान्यादेशभा
व इति मत्वाह। अल्लोपिनामिति। इत उत्तरमिति। पंचपाद्यामित्यर्थः। पूर्वत्रासिद्ध इति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वक्तव्यमेव। यद्वा ज्ञापकत्वापि
ताविषयोऽनित्यत्वा इति संयोगादिलोपलत्वणत्वेषु स्थानिवद्भावो भवत्येव। अचः परस्मिन्नित्यत्र विचारितं हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप

यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः। क्व च स्थानिवद्भावो नास्ति यो हलचोरादेशः। असन्नराजन्तः। किंपुनः कारणं हलचोरादेशो न स्था
निवदित्युच्यते। अजादेशः स्थानिवदित्युच्यते न चायमच एवादेशः। किं तर्हि अचश्चान्यस्य चादेशः। अल्लोपिनां तेऽपि तर्हि प्रतिषेधो न प्राप्नोति। किं
कारणं। अल्लोपिनां नेत्युच्यते। न चात्राग एव लुप्यते किं तर्ह्यन्यश्च। योऽत्राल्लुप्यते तदाश्रयः प्रतिषेधो भविष्यति। यथैव तर्हि योऽत्राल्लुप्यते तदा
श्रयः प्रतिषेधो भविष्यति एवं योऽत्राज्लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति एवं तर्हि सिद्धे सति यदल्लोपिनां नेति प्रतिषेधं शास्ति त
ज्ज्ञापयत्याचार्य इत उत्तरं स्थानिवद्भावो न भवतीति। किमेतस्य ज्ञापने प्रयोजनं। पूर्वत्रासिद्धे न स्थानिवदित्युक्तं तन्न वक्तव्यं भवति। यदे
तज्ज्ञाप्यते आदीधयतेः

एकादेशे इत्यादि तत्र निर्णीतं हलचोरादेशो न स्थानिवदिति। इह तु प्रतिषेधवचनसामर्थ्यान्न ज्ञापनायोक्तमिति ग्रन्थविरोधस्तस्मात्त्वाश्र
श्रयेण हलचोरादेशो न स्थानिवदित्ययं पक्षो भाष्यकृत्त्वमनुपेत्य स्थानिवत्त्वं ज्ञापकमाश्रितं। शिष्यव्युत्पादनायास्थितोऽपि पक्षः। क्वचिदुपन्यस्यत इत्येवं विरोधः परिह
र्तः। अल्लोपिग्रहणसामर्थ्याच्च समुदायलोपेऽप्यल्लोप आश्रीयते केवलाल्लोपे प्रतिषेधस्यानर्थकत्वात्। स्वदृश्यं इत्यत्र त्वेकः पूर्वपरयोरित्यवयवावेकदेशेन चोदिताविति
परत्वं प्रवर्तते। तदुक्तं यो ह्युभयोः षष्ठीनिर्दिष्टयोः स्थाने भवति लभतेऽसावन्यतरतो व्यपदेशमिति। आदीधक इति। दीधीणिचूदीधीवेवीटामिति प्रतिषेधस्तेनो एवुलि णिलोपे कृते तस्य
स्थानिवद्भावाद्दीधीवर्णयोरिति लोपो न भा

=आनर्थक्यादिति। अमभाल दिलाघे तस्थानिवत्वादवत्वाभावः। [illegible] स्थानिवत्वादेव [illegible] भावाभावादित्यर्थः।२=

=असत्त्वाज्जादिमाद्रैस्थानिवत्त्वाभावात् ३ =इति शिष्टस्वरबलीयस्त्वमनात्रविकरणेभ्य इत्युक्तेः। १=

यत्नवलुनीह्यत्रेति॰ निङ्घ्नति ङ्ङिति निघातो निपातैर्यद्यदीति निषिद्धः हेरपि तादावुदात्तत्वात्लविकरणस्वरो न सार्वधातुकस्वरं बाधत इति शास्त्रस्य राभावः तत्र यणादेशे कृते उदात्तलाभावात्स्थानिवत्ताभावाच्च निघातो न प्राप्नोति॰ वर्णग्रहणसामर्थ्यादिति॰ वर्णग्रहणं कृतं पूर्वं गतिराश्रीयते॰ अंतरंगत्वाल्लुलोपे सिद्धे वर्णग्रहणं प्राक् समकार्त्तं॰ तत्तु केचिज्ज्ञापकं वर्णयंति ङ्घ्नत्र स्थानिवत्ताभावस्य॰ अल्लोपि ग्रहणं तु सति प्रयोजने न ज्ञापकमस्यार्थस्य॰ अंतरंगः स्वर इति॰ यद्यप्युभयं पदद्वयाश्रयं तथापि पूर्वमुपसर्गेण संबंधः पश्चादधिकरणवाचिना त्रशब्देनेति यणादेशो बहिरंगः॥ ॥भाजः॥ ॥काण्यादीनां वेति॰ आदिशब्दः प्रकारे॰ येषां ह्रस्वविकल्पो दृश्यते ते काण्यादयः काणिराणि

यीवर्णयोर्दीधीवेव्योरिति लोपो न प्राप्नोति॰ इह च यत्नवलुनीह्यत्रेति ङ्ङि॰ चोदात्तवतीत्येष स्वरो न प्राप्नोति॰ नैष दोषः यस्मादिदुच्यते आदीधयते रादीध्यकः आवेवयते रावेव्यकः यीवर्णयोर्दीधीवेव्योरिति लोपो न प्राप्नोतीति॰ यीवर्णयोरिति वर्णग्रहणसामर्थ्यान्न भविष्यति॰ यदप्युच्यते॰ यत्नवलुनीह्यत्रेति ङ्ङि॰ चोदात्तवतीत्येष [illegible]स्वरो न प्राप्नोतीति॰ बहिरंगो यणादेशोंतरंगः स्वरः असिद्धं बहिरंगमंतरंगे॥ ॥भाजभास॥ ॥काण्यादीनां वेति वक्तव्यं के पुनः काण्यादयः। काणिराणिश्राणिभाणिहेठिलोपयः। अचकाणत्‌॰ अचीकणत्‌॰ अररणत्‌॰ अरीरणत्‌॰ अशिश्रणत्‌॰ अशश्राणत्‌॰ अबभाणत्‌ अबीभणत्‌॰ अजिहेठत्‌ अजीहिठत्‌॰ अलुलोपत्‌॰ अलूलुपत्‌॥ ॥इयते॥ ॥इण्वद्दिग्यान्तेव दिग्यिरे॰ दिग्यादेशे कृते द्विर्वचनं प्राप्नोति॰ तत्र साभ्यासस्येति वक्तव्यं॰ ननु च द्विर्वचने कृते साभ्यासस्य दिग्यादेशो भविष्यति॥ दिग्येव ॥७॥ ॥७॥ ॥७॥

भाणिभाणिहेठिलोपिप्रभृतयः॥ ॥दय॥ ॥दिग्यादेशे कृते इति॰ यद्यपि प्राप्ते द्विर्वचने दिग्यादेश आरभ्यते तथापि बाध्यबाधकभावे द्वैतं लक्षणं वा लक्ष्येण बाध्यते लक्ष्यं वा॰ तत्र यदा द्विर्वचनशास्त्रं दिग्यादेशशास्त्रेण बाध्यते तदा दिग्यादेशे कृते नास्ति द्विर्वचनप्रसंगः यदा तु लक्ष्यं बाध्यते तदा तस्य द्विर्वचनं दिगिना बाध्यते दिगेस्तु तत्प्राप्नोति॰ शास्त्रस्याबाधितत्वात्‌॰ ततश्च यथा चख्याविलादौ ख्याञादेशे कृते द्विर्वचनं भवति एवं दिग्यादेशे कृते प्राप्नोति॰ साभ्यासस्येति॰ तेन कृते द्विर्वचने दिग्यादेशो न च पुनर्द्विर्वचनं भवति सकृत्प्रवृत्तलक्षणस्य चरितार्थत्वात्साभ्यासग्रहणसामर्थ्याच्च॰ ननु चेति॰ पूर्वं विप्रतिषेधात्क्ष्यसिद्धये शब्दक्रमाश्रयणादेतिभावः॥

=विजेयं कार्यमित्यर्थः

×सकृद्गतन्यायेनैवं टिघ्यादेशो द्विर्वचनस्य तया बाधकः न्यायसारोप्यकथयति पुनःप्रसंगा दिति इनरोप्युपगम्यतावद्विप्रतिषेधं×२

नसिध्यतीति विप्रतिषेधे परं कार्यमित्यस्मिन्व्यवस्थापिते नैसत्येषक्रमो दुर्लभः। तत्र द्विर्वचनस्यावकाशः पपाचेति टिघ्यादेशस्य कृते द्विर्वचने ददतिसज्ञावादकृते तु द्विर्वचन उभय
प्रसंगे परत्वाट्टिघ्यादेशः। एवं तर्हीति नाप्राप्ते द्विर्वचने टिघ्यादेशस्यारंभात्। इतस्तु तदुद्विपरीक्षार्थं विप्रतिषेधाश्रयेणासकृद्गत इत्याश्रित्याह पुनःप्रसंग इति चेदिति य
थापूर्यं ब्राह्मणकुलानि पुर्वांतमित्यमादेशे शिशीहुडुमोनभवं त्येवं टिघ्यादेशे कृते द्विर्वचनाभावः इदानीं न्याय्यं परिहारमभिधातुमाह अथवेति क्वचित्साठेनैषयु
क्तः परिहारो विप्रतिषेधे पुनःप्रसंग इति योयमुक्तः स्यार्थस्य टिघ्यादेशो द्विर्वचनं बाधिष्यत इत्यस्य तया परिहारोभिहितः पुनःप्रसंगविज्ञानाद्द्विर्वचनं प्राप्नो

नसिध्यतिकिं कारणं टिघ्यादेशस्य परत्वात् सा   भ्यासस्यादेशावचनं। टिघ्यादेशः कि यतां द्विर्वचनमिति परत्वाट्टिघ्यादेशेन भवित
व्यं तत्र सा   भ्यासस्येति वक्तव्यम्। एवं तर्हि टिघ्यादेशो द्विर्वचनं बाधिष्यते। पुनःप्रसंगाद्द्विर्वचनं प्राप्नोति। पुनःप्रसंगादिति
चेदमादिभिस्तुल्यमेतद्भवति। तद्यथा मादि पुकृते पुनःप्रसंगाच्छिशीलुडुतुमोनभवं ति एवं टिघ्यादेशे कृते पुनःप्रसंगाद्द्वि
र्वचनं न भविष्यति। अथवा विप्रतिषेधे पुनःप्रसंग   इत्युच्यते। विप्रतिषेधश्च द्वयोः सावकाशयोः इह पुनरनवकाशो टिघ्यादेशो द्वि
र्वचनं बाधिष्यते। यदि तर्ह्यनवकाशविषयो बाधको भवति। बभूव बभावेत्यत्र वारेशो द्विर्वचनं बाधेत। सावकाशो भावारेशः। कोव
काशः भविता। भवितुं इह तर्हि चिक्तिरुःस्वापवालिटीति स्वापकरो द्विर्वचनं बाधेत इह चापि बभूवेति यदिभावल्स्यानो द्विर्वचनं भाव

तीति सन मुक्त इत्यर्थः। अनवकाशो टिघ्यादेश इति पूर्वं सामान्यविशेषभावमनाश्रित्योभयोः सावकाशत्वमुक्तं इदानीं तु सामान्यविशेषाश्रयेणाप्राप्ते द्विर्वचन आरभ्य
माणस्य टिघ्यादेशस्यापवादत्वमुच्यते। यदि तर्हीति नन्ववश्यमनवकाशेन बाधकेन भाव्यं अन्यथा न कश्चिद्बाधकः स्यात्। एवं तर्ह्यनवकाशाभिमता अनव
काश इत्यर्थो विवक्षितो नैवायमनवकाशः कृतेपि द्विर्वचने भरत्स विघातात्। अथ पुनरेवमप्यनवकाशं मन्यसे तत्राल्पस्य दोषप्रसंगः। बभूवेति अस्तेर्भूरिति
रादेशः सावकाश इति यत्र द्विर्वचनाभावः इह   तर्हीति आचख्यावित्यत्र कृते द्विर्वचने स्यात्। सर्वत्रनादनवकाशता भावोयरत्वु येन नाप्राप्तन्यायेनानवकाशत्वमभ्युपगतं स्या

=असंजेयएवसबाधप्रयोजकः इति वार्त्तिकमतेबाधप्रयोजकतया तमनाश्रित्यार्थः। इदानीं लिङि सत्यपि संजवे बाधनं न भवतीति भाष्यमते इत्यर्थः।४=

भा॰के॰

७९

सर्वादेश [illegible] इति॰ स्थानिवद्भावादस्तिग्रहणेन ग्रहणात्कार्यकृतत्वाच्च पुनर्द्विर्वचनाभावादिष्टरूपासिद्धिः॥ पूर्वस्य श्रवणमिति॰ अयं दोषो नोत्सर्गापवादपक्ष उपात्तो भूभावस्यावकाशदर्शनेनोत्सर्गापवादभावनिराकरणाद्द्वयोस्तु सावकाशयोः परत्वाद्द्विर्वचने कृते बभूवेति न सिध्यतीति प्रतिपाद्यते॰ तत्रार्द्धधातुक सामान्य इति॰ द्विर्वचननिमित्तस्य लिटोऽनुपजातत्वादसति विप्रतिषेधे पूर्वं भूभावः पश्चाल्लिटि परतो द्विर्वचनमित्यदोषः॥ योयतः प्राप्नोतीति॰ विषयस प्तमी फलं ज्ञापितं स्यात्त्र विधावपि विषयसप्तम्याश्रीयत इति येन नाप्राप्तन्यायस्यानवकाशत्वे स्याज्जि द्विर्वचनं भवत्येव॰ दिग्पादेशेनुलिटीति परसप्त

सर्वादेशः प्राप्नोति॰ अथ द्विःप्रयोगो द्विर्वचनं परस्य भूभावे कृते पूर्वस्य श्रवणं प्राप्नोति॰ नैष दोषः॥ आर्द्धधातुकीयाः सामान्येन भवंत्यनव वस्थितेषु प्रत्ययेषु॰ न चार्द्धधातुकसामान्ये भूभावे कृते योयतः प्रत्ययः प्राप्नोति स न तो भविष्यति॥ ॥ऋतश्च॥ ॥संयोगादेर्गुणवि धाने संयोगोपधग्रहणं कृञर्थं॰ संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यं॰ किं प्रयोजनं॰ कृञर्थं॰ इहापि यथा स्यात्॰ संच स्करतुः संचस्करुः॥ यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन॰ इहापि सस्वरतुः सस्वरुः संयोगोपधस्येत्येव सिद्धं॰ भवेत्सिद्धं सस्वरतुः सस्वरुः इदं तु न सिध्यति संचस्करतुः संचस्करुरिति॰ किं कारणं सुटो बहिरंगत्वात्॰ बहिरंगः सुडंतरंगो गुणः॰ असिद्धं बहिरंगमंतरंगे॰ संयोगादिग्रहणे तु क्रियमाणे संयोगोपधग्रहणमनन्यार्थं विज्ञायते॰ ऋतो लिटि गुणात् [illegible] इति द्विर्विप्र तिषेधेन॰ ऋतोलिटिगुणस्यावकाशः सस्वरतुः सस्वरुः ज्णोद्धेरवकाशः स्मारक

स्याश्रयणान्नाप्राप्ते द्विर्वचने दिग्यारभ्यमाणस्तद्बाधते॥ ऋतश्च॥ ॥संयो गादेरिति॰ इहांगाधिकारादंगं संयोगाद्यभिति न च स्कृ इत्येतदंगं संयोगादिर्भवतीति भावः॥ उपधाग्रहणं संयोगस्य देशविशेषोपलक्षणमुत्त्वात्रस्योपधासंज्ञाविधाना त्संयोगस्योपधात्वासंभवात्॰ अथवा संयोगावयवे संयोगशब्दो वर्त्तते तस्योपधात्वमस्त्येव॰ बहिरंगः सुडिति॰ पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां निर्वर्त्तय ति तामुपसर्गो विशिनष्टि॰ न चासिद्धस्य विशेषणेन संबंधो भवति॰ सुकात्स्वरस्यत्वत्तां पूर्वं धातुरुपसर्गेण युज्यत इत्येवं च सुडंतरंगत्वात्सिद्धो गुण इति नार्थ उपसंख्यानेनेत्सं स्मृ पीठ संक्रियन इत्यत्र तिङ्गुणयो

शिव॰

७९

कार्यमित्यनेनपरस्मिन्

पुनःप्रसंगविज्ञानाद्देति॰अस्तुपरविप्रतिषेधेनगुणस्तस्मिन्कृतेवृद्धिर्नविष्यति॰अनाश्रितलक्षणेनेदंचवृद्धिमात्रमेकलेनाश्रितैनतदुक्तं॰पुनःप्रसंगोनामेति॰
वाचोयुक्तिरेवेयंनसंगच्छते॰लक्षणद्वयस्यपरस्परप्रतिबंधादप्रतिपत्तौप्राप्तायांविप्रतिषेधेपरंकार्यं।विहितेनिमित्तसंभवात्पूर्वस्यलक्षणस्यपुनः
प्राप्तिःपुनःप्रसंगउच्यतेनतुपूर्वलक्षणप्राप्तिःपुनःप्रसंगः।तस्मादिति॰ननुयदिनामपुनःप्रसंगवाचोयुक्तिर्नघटतेकिमेतावतागुणरपरत्वयोःकृतयोरुपधा
वृद्धिर्नप्राप्नोतिसत्त्वांचप्राप्तौकिंपूर्वविप्रतिषेधाश्रयणेनसत्रचिंत्यमेतत्॥ ॥२६६॥ ॥नगुणेवेत्युच्यतेतिगुणएवपूर्वस्त्रेणनित्यंप्राप्तोविकल्पनीयस्तत्र

पूर्व॰ णिदृद्धिर्भवतिविप्रतिषेधेनपुनःप्रसंगविज्ञानात्सिद्धं॰अथवापुनःप्रसंगाद्गुणेकृतेरपरत्वेचानउपधायाइतिवृद्धिर्नविष्यति॰नैषदु
क्तःपरिहारःपुनःप्रसंगोनामयत्रतेनैवकृतेप्राप्नोतितेनैवचाकृते॰अत्रखलुगुणेकृतेरपरत्वेचा॰तउपधायाइतिवृद्धिःप्राप्नोतिअकृते
वाचोञ्णितीति॰तस्मात्कृष्च्यतेकृतोलिटिगुणात्ञ्णितिवृद्धिःपूर्वविप्रतिषेधेनेति॰॥ ॥२६६॥ ॥किमर्थंहृस्वोवेत्युच्यतेनगुणेवेत्युच्येत
तत्रायमप्यर्थःगुणग्रहणंनकर्त्तव्यंभवति॰प्रकृतमनुवर्त्ततेकःप्रकृतंकृतश्चसंयोगादेर्गुणइति॰ऋतोह्रस्वत्वमित्वप्रतिषेधार्थं॰ऋतोह्र
स्वत्वमुच्यतेइत्वप्रतिषेधार्थं॰इत्वंमाभूदिति॰गुणोवेतीयत्युच्यमानेगुणेनमुक्तेइत्वंप्रसज्येत॰ह्रस्वोवेतिपुनरुच्यमानेह्रस्वेनमुक्तेयथाप्रा
प्तंगुणोनविष्यति॥ ॥केणः॥ ॥केणोह्रस्वत्वेतद्धितग्रहणंकन्निवृत्त्यर्थं॰केणोह्रस्वत्वेतद्धितग्रहणंकर्त्तव्यं॰किंप्रयोजनं॰कन्निवृत्त्यर्थं॰कृतिमाभूत्

गुणपक्षेइत्वंप्राप्तस्तुरित्यादिनविष्यतिनदभावपक्षेतुगुणादेशेनविशश्चतुरित्यादीतिभावः।तथापमपीति॰नकेवलंगु शकाधाकाइति॰तत्तद्विवक्षयंनवक्तव्यं॰
णविधानप्रकरणमनुसृतंभवतियावल्लाघवमपीतिभावः॥इत्वंप्रसज्येतेति॰वार्णदांगंबलीयइतिवर्णाश्रयमंतरंगमपियणंबाधित्वेत्वंस्यात्तद्‌ह्रस्वविधानेतुगु
णादेशःसिध्यति॰विशश्चवान्विदद्वान्निपपवानितिकसोचसिध्यतिगुणविकल्पेत्वेतद्रूपासिद्धिः॥कसोःकित्वेनचप्रतिषेधविषयस्यापिगुणस्यप्रतिषेध
॰उत्तरार्थंचह्रस्वग्रहणंकर्त्तव्यमितिलाघवमपिनास्तिह्रस्वविधावसुत्तरत्रह्रस्वविधानादेकप्रकर्णानामबलीतिनास्तिपूर्वोक्तोविशेषः॥ ॥६७॥ ॥

वार्ति॰

उप॰॥ ॥ओ घत इति॰ अँकृत एकादेशे ह्रस्व [illegible] भावाभावयोर्विशेषाभावादंतरंगत्वाच्च प्रागेकादेशेन भाव्यं॰ वार्णादांगमित्येतत्तु समानाश्रयांगविषयं तस्मा
देकादेशे कृते नादिवद्भावे न ह्रस्वप्रसंगश्चोद्यते॰ एकादेशे कृत इति॰ उपसर्गात्परस्योह ते ह्रस्वो विधीयमान एकादेशे कृते भेदाभावादेवं निबंधन पौर्वापर्यानुपपत्ते
नयत आश्रयणे नादिवद्भावाभावाच्च ह्रस्वाभावः॥ आ ऊह्यत इति॰ धातूपसर्गयोरसंहितानास्ति॰ यदुक्तं संहितैकपदे नित्या नित्या धातूपसर्गयोरित्यादि एवं
च लौकिके प्रयोगे विग्रहाभावान्नित्यसेनैकादेशेन भाव्यं॰ एवं च आ ऊह्यत इति ये ह्रस्वं पठंति तेन सम्यङ्न्याय विदो लौकिकप्रयोगसंपादनाय हि ह्रस्वो वि
धीयते तस्माल्लौकिके न प्रक्रियावाक्ये नाकृत ह्रस्वे नाऽऽ: प्रश्लेषदर्शनमात्रं क्रियते अपत्व लौकिके प्रक्रियावाक्ये ह्रस्वत्व प्रतिपत्तिरुच्यते तथापि नैका [illegible] विस

उप॰॥ ॥इह कस्मान्न भवति॰ ओह्यते उपोह्यते॰ एकादेशे कृते व्यपवर्गाभावात्॰ एवमपि आ ऊह्यते ओह्यते समोह्यत इत्यत्र [illegible] प्राप्नोति अण इ
ति वर्तते॥ ॥एते लिङि॥ ॥एते लिङ्युपसर्गात्॰ एते लिङ्युपसर्गादिति वक्तव्यं॰ इहमाभूत्॰ ईयात्॰ तच्च हि वक्तव्यं न वक्तव्यं॰ उपसर्गादि
ति वर्तते॰ एवं तर्ह्याचार्योन्वाचष्टे उपसर्गादित्यनुवर्तत इति॰ नैतदन्वाख्येयं अधिकारा अनुवर्तंत इति॰ एष एवन्या [illegible] योयदुताधिकारा
अनुवर्तेरन्न॥ ॥रीङृतः॥ ॥दीर्घोच्चारणं किमर्थं॰ न रिङृत इत्येवोच्येत॰ का रूपसिद्धिः॥ मात्रीयति॰ पित्रीयति॰ अकृत्सार्वधातुकयोरिति दी
र्घत्वं भविष्यति॰ एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्ये
ति॰ किमेतस्य ज्ञापने प्रयोजनं॰ पिबेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति॥

तिस्त्वत्रैकादेशः स्यादिनभावाद्दृष्टिन्न कृते न ग्रहणात्समः परस्य
ह्रस्वप्रसंगः। अण इति वर्त्तत इति॰ एवं च रूपाश्रयोयं विधिरिति ताद्रूप्यानतिदेशादत्वाभावाद्ध्रस्वत्वाभावः॥ ॥एते॥ ॥ईयादिति॰ आशिषि लिङ्यकृत्सार्वधातुक
योरिति दीर्घः॥ नैतदन्वाख्येयमिति॰ वार्त्तिककारेणैतदन्वाख्येयं सर्वाधिकाराणाम [illegible] न्वाख्यानप्रसंगात्॰ इतिकारान्ताधिकाराणां प्रवृत्तिनिवृत्ती व्याचक्ष
ते॥ रीङृतः॥ ॥दीर्घत्वं भविष्यतीति॰ ननु नाप्राप्ते दीर्घे रिङारभ्यमाणस्तस्य बाधकः स्यात्॰ नैतदस्ति॰ ऋवर्णस्य बाध्यतां रिङ् तु कथं बाध्यते न हि तस्य दीर्घप्राप्तेसभार

यङि च ॥ ॥यङ्प्रकरण इति । हिंसायास्त्वन्यत्र [illegible] जंघन्यत इत्येव न भवति । अभ्यासरूपं न सिध्यतीति । उपधायालोपस्यस्थानिवत्वादिति द्विर्वचनं प्राप्नोति
एवं तर्हीति । ईकोधातुप्रकृत्या द्विर्वचननिमित्तत्वाभावात्स्थानिवत्वाभावात् एवमपीति । अजादेशप्रत्यये विधानात् एवं तर्हीति । प्रक्रियालाघवाय घकारा-
देशविधानात्तर्ही भावविधावभ्यासाद्धेति कुत्वे गौरवप्रसंगात् व्याक्तिपदार्थाश्रयेण च घ्नीभावे कृते द्विर्वचनं प्रवर्त्तते । आकृतिपक्षे तु दिग्यादेशे नैघ्नीभावे
द्विर्वचनबाधप्रसंगात् ॥ ॥नघं ॥ ॥जनीयंत इति । जनमिच्छतीति क्यच् लटः शत्रादेशः जस्ररूगिदचामिति नुम् । छंदसीति । आनंतर्यादीत्वस्यैव प्रति-

यङि च ॥ ॥यङ्प्रकरणे हंतेर्हिंसायामीत् । यङ्प्रकरणे हंतेर्हिंसायामीद्वक्तव्यः । जेघ्नीयते यदीत् अभ्यासरूपं न सिध्यति । एवं तर्हि यङ्प्रकरणे
हंतेर्हिंसायामीकु । एवमप्युपधालोपो न प्राप्नोति । एवं तर्हि यङ्प्रकरणे हंतेर्हिंसायां घ्नी ॥ ॥नघं ॥ ॥अस्वल्पमिदमुच्यते अपुत्रस्ये-
ति । अपुत्रादीनामिति वक्तव्यं । इहापि यथा स्यात् जनीयंतो न्वयवः पुत्रीयंतः सुदानवः । छंदसि प्रतिषेधे दीर्घत्वस्य प्रतिषेधः । छंदसि प्रति-
षेधे दीर्घत्वस्य प्रतिषेधो वक्तव्यः । संस्वेदयुः मित्रयुः । न वाश्वाघस्यात्वचनमवधारणार्थं न वा वक्तव्यं । किं कारणं । अश्वाघस्यात्वचन-
मवधारणार्थं भविष्यति अश्वाघयोरेव छंदसि दीर्घो भवति नान्यस्येति ॥ ॥शाछो ॥ ॥श्यतेरित्वं व्रते नित्यं । श्यतेरित्वं व्रते नित्यमिति वक्त-
व्यं । संशितव्रतः । तत्तर्हि वक्तव्यं न वक्तव्यं ॥ ॥छ॥

षेधः प्राप्नोति तत्तस्यापवादे पत्नीते उत्सर्गो दीर्घः प्राप्नोतीति तस्यापि प्रतिषेधो विधेयः । संस्वेद-
युरिति । क्याच्छंदसीत्युप्रत्ययः । न वेति । अश्वाघयोरनेनैत्वे प्रतिषिद्धे क्त्वासार्वधातुकयोरित्याकारे सिद्धे पुनरात्वचनं नियमार्थमित्यन्येषामाकारो न भवति ॥ ॥
शाछो ॥ ॥श्यतेरिति । व्रत इति विषयो निर्दिश्यते नत्त्वत्तरपदं तेन संशिता आलक्षण इत्यत्रापि नित्यमित्वं भवति । यद्येवमित्वेन व्रतस्यद्योतितत्वात्संशित-
व्रतस्य प्रयोगो न प्राप्नोतीति । नैष दोषः । अन्यत्रापीत्वविधानात्संशितशब्दः सामान्यशब्द इति विशेषप्रतिपादनायाविरुद्धो व्रतशब्दप्रयोगः । व्रते तु नित्यमित्वं विधीयते ।

व्रत इति

न वक्तव्यमिति । साधारणेन न्यायेन सिद्धत्वात् एवं तुल्यधर्मणः शब्दानुपन्यस्यति ॥

शाछोरिसेनेन

भा·के·
८१

विभेतुगरइति२

देवत्रातइति·गुदविदोदत्तेति नत्वं संज्ञायां न भवति·देवग्रहणं संज्ञाविषयोपलक्षणार्थं तेन भवत्रातइत्यत्रापि संज्ञात्वा नत्वाभावो यदा तु क्रियाशब्दः त्राणं त्रातमिति त
दानत्व विकल्पः॥गलइति·अचि विभाषेति लत्वं प्राण्यंगे नित्यं भवति लत्वाभावः क्रियाशब्दे त्वप्रयं भवति गलोगरइति·याहइति·विभाषायहइति प्रलयोजल चरे नित्यं भवति ओ
ति विपचाघजेवग्रहइति·इति योगइति·लक्षणहेत्वोः क्रियायाइति शतृशानज्विधिः हन्तीति पलायते वर्षतीति धावतीत्यादावनि प्रयोगेन भवति·मिपइति·एकस्मि
न्विषयेन विकल्प्यते किंतु विषयभेदेन·एतच्चाकृतिपक्षउपपद्यते तत्र हि सर्वलक्ष्यमेकधर्मापाद्यं समुपदिश्यते तत्र्वोभयं भवतीसेतावतैव लक्षणस्य व्याप्ता
रः॥असंकीर्णतं तु प्रयोगवशात्प्रतीयते·गवाक्षइति·वातायने·वस्फोटायनस्येति नित्यमवङ् भवति प्राण्यंगे गोरक्षि गोक्षीति भवत्यन्यत्र तु विकल्पेन·एतच्चो

देवत्रातो गलो ग्राह इति योगे च सद्विधिः॥मिपस्तेन विभाष्यंते गवाक्षः संशितव्रतः॥ ॥दोदघोः॥ ॥अवदत्तं विदत्तं च प्रदत्तं चादिक
र्मणि·सुदत्तमनुदत्तं च निदत्तमिति चेष्यते·किं पुनरयं तकारांत आहोस्विद्दकारांतः उत थकारांत अथवा धकारांतः॥कश्चात्र विशेषः
तांते दोषो दीर्घत्वं स्यात्·यदि तांतः दत्तीति दीर्घत्वं प्राप्नोति·दांते दोषो निष्ठानत्वं·अथ दकारांतः रदाभ्यां निष्ठात इति नत्वं प्राप्नोति·धांते धत्व
प्राप्तिः॥अथ धांतः झषस्तथोर्धइति धत्वं प्राप्नोति·थांते दोषस्तस्मात्·अथ थकारांतः न दोषो भवति॥

दाहरणमात्रं न तु व्यवस्थितविभाषाणां परिगणनं अन्यासामपि संभवात्॥ ॥दोदघोः॥ ॥अवदत्तमिति·आदिकर्मग्रहणं प्रदत्तशब्दस्यैव संभवाद्विशेषण
मवदत्तादिसिध्यर्थत्वाद्वचनस्यावदत्तादयोपि भवंति न चाचउपसर्गात्तइत्यत्र च त्तकारइत्यस्यावकाशः प्रत्तमवत्तमिति वक्ष्यते तस्मान्निदत्तमिति चे
ष्यतेइति चशब्देनावदत्तादयोपीष्यंतइति सूच्यते·किं पुनरिति·यद्यपि दकारः श्रूयते तथापि संहितायां नकारादीनामप्येत स्वरूपस्य संभवात्प्रश्नः॥तांते दोषइति·
यदा दइत्येतस्य थस्तकारांत आदेशस्तत्र दीर्घइति सूत्रार्थस्तदायं दोषो यदा तु तकारादेशादेशे दीर्घस्तदा न दोषः॥तस्मात्तांतइति·सान्निपातपरिभाषाश्र
येतु दांतधांतयोर्न दोषः॥ ॥७॥

शिव:
८१

=अचउपसर्गात्तइति तत्रे भाष्ये एतल्लिपि किंबोधनार्थमेवेदं नत्वचउपसर्गान्तकारनिवृत्त्यर्थमिति भाव:।२=

अचउप॥ ॥यदीति॰दाशब्दाकारस्य इआवेदनमि तिसंयोगि स्थयेन॰नासोसूत्रभेदइति॰शेषा ये तिशेषः॥तदेवसूत्रंलघुक्रियमाणंमत्पुनगुणं संपादयति अथवेति॰लघुकरणेपियदिन्यासांनरलान्स्य एवसूत्रभेदइतिमतंतदेवमुत्तरंअलोंत्यस्यदावपवादौआदेःपरस्यानेकाल्शित्सर्वस्येतित योर्विप्रतिषेधेपरंप्रवर्त्तते॰अचइतिवर्त्ततइति॰तेनापघ्नस्यपोन्नस्यालरस्यपकारस्याद्दितकारआदेशः॥तेचांतस्यफलांजशोंतइति॰सर्वस्य फलांजश्कुरशीति॰लवाम्यामिति॰लुग्रूदोरविलपूत्र॰असापिनकारादौतकारः प्राप्नोतिअग्रहणानुवृत्तौचापूर्वस्यपोत्तस्यालरोऽकारादौनकश्चिदस्तीति

नकारसूत्र

अचउपः॥ ॥अचउपसर्गात्तलेआकारग्रहणं॰अचउपसर्गात्तलेआकारग्रहणंकर्त्तव्यं॰अलोंत्यस्यविधयोभवंतीलंतस्यभविष्यति॰नसिध्य ति॰किंकारणं॰आदेर्हिपरस्य॰अत्रहितस्मादित्युत्तरस्यादेःपरस्येतिदकारस्यप्राप्नोति॰नैषदोषः॥अवर्णग्रकरणात्सिद्धं॰अस्येतिवर्त्तते॰कथं कृतं॰अस्यद्यावि ति॰यघवर्णमनुवर्त्तते॰दशावेदोषोभवति॰एवंतर्ह्येवंवक्ष्यामिदो॰ द्योरितिदोयअकारस्तस्याऽऽवति॰ततअचउपसर्गात्तः अस्येत्येव॰एवमपिसूत्रभेदःकृतोभवति॰नैषसूत्रभेदः॥सूत्रभेदंतमुपाचरंतियत्रतदेवान्यत्क्रियते॰योवायद्वितदेवोपसंहृत्यक्रियते॰ना सोसूत्रभेदः॥अथवाद्वितकारकोनिर्देशःक्रियतेसोऽनेकाल्शित्सर्वस्येतिसर्वस्यभविष्यति॰इहापितर्हिप्राप्नोति॰अझ्रिनग्रइति॰अचइतिव वर्त्तते॰तद्यावश्यमज्ग्रहणमनुवर्त्यंलवाम्यामित्येवमर्थं॰अथवात्रितकारकोनिर्देशःकरिष्यते॰इत्यार्थौधातुनरार्थश्चेकः॥घतेरित्वादचस्तः॰घते रित्वादचस्त्वइत्येतद्भवतिविप्रतिषेधेन॰घतेरित्वस्यावकाशःनिर्दितःनिर्दितवान्॰अचस्तइत्यस्यावकाशःप्रत्तमवत्तंइत्यमयंप्राप्नोतिनीत्तं वीतम्

तलाभावः॥अथवेति॰नकारद्वयात्मकआदेशःपृथग्विभक्तिकइत्यर्थेयस्तुसाकारस्तकारस्तस्यावः॥स्वरितत्वप्रतिज्ञानादुत्तरत्रानुवृत्तिः॥लवाम्यामित्यादेलुतलंनग्ति॰पकारलोपादेशश्चाभावान्नचन्नतपूर्वगसाम्येत्याप्यः॥अज्झिरित्यादेसंप्रतिकापघ्रसंभवेगौणस्याग्रहणात्॰अतएवसमकस्तलाभावात्सयाप्रसयपूर्वो ॥प्रसयेसंप्रसयइतिनावतिष्ठते॰अज्झिःसंस्तृतमितिलिंगात्तानहिप्रसयस्येवग्रहणेज्झिरितिनिर्देशोपपत्तिः॥घतेरित्वादिति॰पुरस्तादपवादन्यायादित्वंदत्वावस्से

अपे॰॥ ॥माङ्हिरिति॰पद्मोमास्तिमासशब्द्समासादेशस्यच्छन्दस्येवविधानान्मासश्छंदसीति छंदोग्रहणं न कर्त्तव्यं न क्रियते भाषायामपि कश्चित्सदादयः प्रयुञ्ज लइति ज्ञापनाय सा कृत॥ ॥आप्॰॥ ॥ज्ञपेरिति॰इणग्रहणमनुवर्त्तते तेन ज्ञपौ विशेष्यमाणे ज्ञं तस्य ज्ञपेरीतं विधीयमानमुभौ लस्येत्संसस्य प्राप्नोतीति भावः॥ लोपो स्येति॰ज्ञपिना विशेष्यते यथा बधिम्यामेवं चैकप्रस्यानो विशेषणे विशेष्यभावो न भवतीति नचानंतस्याचः सावकाशमित्वं पूर्वविप्रतिषेधेन णिलोपो बाधते॰इतर

अपोभि॰॥ ॥अपोभिमासश्छंदसि॰अपो भीसत्र मासश्छंदसीत्युपसंख्यानं कर्त्तव्यं॰माङ्हिरिष्याइ ड्रोवत्रहा॰अत्यल्पमिदमुच्यते॰स्ववस्स्व तवसोर्मास उषसश्चतइष्यते॰स्ववद्भिः स्वतवद्भिः माङ्हिरिंद्रो वृत्रहा सत्युषद्भिरजायथा॥ ॥सनिमी॰॥ ॥इसत्वं सनिरा धोहिंसायां॰इसत्वं सनि राधोहिंसायामितिवक्तव्यं॰प्रतिरित्सति॰हिंसायामिति किमर्थं॰आरिरात्सति॥ ॥आप्ज्ञप्॰॥ ॥ज्ञपेरीत्वमनंतस्य॰ज्ञपेरीत्वमनंतस्येतिव क्तव्यं॰ज्ञीप्सति॰तत्तर्हि वक्तव्यं न वक्तव्यं॰लोपोतस्य बाधको भविष्यति॰अनवकाशाविधयोबाधका भवंतिसावकाशश्चणिलोपः॰कोवका शः॥ कारणाकारणा॰एवमपीत्वमंतस्य लोपस्य बाधकंस्यात्॰अनवकाशाविधयोबाधका भवंति॰इत्वमपिसावकाशं॰कोवकाशः॥ अनं कथंपुनः सत्यंतेनंतस्यत्वं स्यात्॰योऽचांगविशेषयेत्तस्यानंतस्य न स्यात् वयं तु खल्वंगेनाचं विशेषयिष्यामः॥ अंगस्याचो यत्र तत्र स्थस्येति॰एवमप्युभयोः सावकाशयोः परत्वादीत्वं प्राप्नोति तस्मादनंतस्येति वक्तव्यं॥ ॥अत्रलोपो॰॥ ॥अभ्यासस्यानचि॰अभ्यासस्ये

त्यत्रहीनाभिप्रायआह॰अनवकाशा इति॰ईत्वमेवत्वनवकाशत्वाद्बाधकं प्राप्नो तीत्युच्यते तदन चिद्रष्टव्यं॰पतापतः चराचरः वदावदः॥ ॥ ति॰एवमपीति॰नन्वस्तुपरत्वादीत्वं तस्यस्थानिवद्भावाभिलोपो भविष्यतीईत्ववचनं त्वंतस्यश्रवणार्थं स्यात्॰नैतदस्ति॰स्तकङ्नौ विप्रतिषेध इति णिलोपा प्रसंगात्॰॥ ॥अत्र॰॥ ॥चराचर इति॰चरिचलिपतिवदीनां द्विर्वचनमच्याक्काभ्यासस्येति द्विर्वचनमागागमश्चेति हलादिशेषोत्र न भवति॰नन्वागमविधानसाम र्थ्याद्धलादिशेषो न भविष्यति॰नहि हलादिशेषे आगमस्यादेशस्य वा विशेषोस्तीत्यादेशएवाकारोविधेयः स्यात्॰नैतदस्ति॰सत्यपि हलादिशेषे विग्रहीतश्रवणार्थमाग्विधा

=अंतस्सेसर्वः॥३=

शिवः
८२

आयंवबदेकोसिन्निस्तेन ४ प्राक्कएवेदुप्राक्कोवाहरणन्यायेनोकरवेलर्थः॥

हलः॥ ॥हलामादिरिति॥ विग्रहदर्शनं चस्य स्वयं निपातनार्थं॥ अजादिष्विति॥ अजादिष्वभ्यासेषु हलं तपेक्षयादित्वे हलआदीयमानोऽशेषः प्राप्नोति॥ अस्तस्यापोसंघाते वेसस्या किं द्रू॥ अच ककारस्य शेषः प्राप्नोति कर्मधारये तथ्यासापेक्षमादित्वं हलो विज्ञायते इति शेषोन भव ति॥ आदिशेषनिमित्तलादिति॥ शेषशब्दोऽन्यनिवृत्तिमुक्तमवस्थानमाहेति यथैव अभ्यासे पपाचेलासे आदे हलो वस्थानं तथैवान्य स्य निवृत्तिः स्यान्यान्यचावस्थानं हि शब्दार्थता प्रधानं न च प्रधानाभावे आनुषंगिककार्यं प्रवृत्तिरिति तस्येत्याद्युपिककार बकारयोरस्याप्रवृत्त्यानिवृत्तप्रसंगः॥ षष्ठीसमासे त्वाट्तु रिसचट्कारस्यादित्वाभावेन शेषप्रसंगः स च प्राक्कएव तत्र यथासंतिपक्षआदीयतेन दाभ्यासादशनो

हलादिः शेषः॥ ॥किमयं षष्ठीसमासः हलामादिर्हलादिर्हलादिः शिष्यतइति॥ आहोस्वित्कर्मधारयः हल्च आदिर्हलादिर्हलादिः शिष्यतइति॥ कश्चात्र वि शेषः॥ हलादिः शेषे षष्ठीसमासइति चेदजादिषु शेषप्रसंगः॥ हलादिशेषे षष्ठीसमासइति चेदजादिषु शेषः प्राप्नोति॥ आनक्ष आनक्षतुः आनक्षुः॥ अस्तु तर्हि कर्मधारयः॥ कर्मधारयइति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे लोपवचनं॥ कर्मधारयइति चेदादिशेषनिमित्तत्वाल्लोपस्य त दभावे आद्यस्य हलो भावे लोपो वक्तव्यः॥ आटतुः आटुः॥ तस्मादनादिर्लोपः॥ तस्मादनादिर्हल् लुप्यतेइति वक्तव्यं॥ उक्तं वा॥ किमुक्तं॥ प्रतिविधा स्यते हलादिशेषइति स इदानीं प्रतिविधानकालः॥ इदं प्रतिविधीयते॥ इदं प्रकृतं तत्र लोपोऽभ्यासस्येति॥ ततो ▬ वक्ष्यामि ह्रस्वः ह्रस्वोऽभ वसादेशः॥ अभ्यासस्य लोपइत्यनुवर्तते तत्र ह्रस्वभाविनां ह्रस्वो लोपभाविनां लोपः भविष्यति॥ ततो हलादिः शेषश्चेति॥ अथवैवं वक्ष्यामि ह्र स्वः ▬ ह्रस्वो भवत्यभ्यासस्येति॥ ततो हल्

वर्तमानो हलादिः सर्वस्याभ्यासस्य व्याप्तावनादेर्निवृत्तिं करोतीति दोषाभावो व्यक्तिपक्षे तु प्रत्यासमेवाभ्यासव्यक्तौ हल आदे रवस्थानं तत्रैवानादेर्निवृत्तिर्नान्यत्रेति दोषप्रसंगः॥ ह्रस्वभाविनामिति॥ ह्रस्वश्रुत्याच्य रिभाषोपस्थानादजंतस्याभ्यासस्य ह्रस्वो विधीयमानो जेंतस्येति वचनाद च एव दीर्घस्य ▬ ह्रस्वस्य च लोपबाधनार्थो विज्ञायतइति हल्विषयएवादिशेष ▬ निरपेक्षो लोपोऽवतिष्ठते॥ ततआदेरपि हलो लोपे प्राप्ते तद्बाधनार्थं ह लादिशेषइति सूत्रमेतदेव ज्ञापकं लोपविधावज्योंसपरिभाषानोपतिष्ठतइति आनक्षे साधवनं तस्यापि हलो लोपोऽभवलीन कश्चिद्दोषः॥ ॥७॥ ॥७॥

प्राप्तेर्

अहल्त्वेति॰ अविद्यमानहल्कोऽभ्यासो न वर्ततीत्यर्थः॥ ॥शर्पूर्वाः॥ ॥उच्चिच्छिषतीति॰ उच्छी विवासे छे चेत्यंतरंगत्वात्तुक् सन्नि इट्पूर्वत्रासिद्धमिति तुकस्यासिद्धत्वात्तच्छि शब्दो द्विरुच्यते तकारस्य शेषे छस्य शेषापत्यर्थं वार्त्तिकं ननु च पूर्वत्रासिद्धीयमद्विर्वचन इति तुके कृते च्छि शब्दस्य द्विर्वचने चकारशेषे णैव रूपं सिध्यति न चेदमस्ति निमित्ताभावा न्नैमित्तिकस्याप्यभाव इति येन तुकं निवर्त्तेत॰ एवं तर्हि पूर्वत्रासिद्धमद्विर्वचन इत्येतदनित्यमुभौ साभ्यासस्येति वचनादन्यथा कृते णत्वस्य द्विर्वचने प्राणिणदिषादि सिध्यतीति किं सत्वेन॰ तथा चोजढदिल सिद्धस्योदाहरणं प्रदर्श्यिष्यते॰ इतरोऽव्यवस्थितस्य समुदायस्य प्रविभज्यान्वाख्यानेंतरंगत्वं तु

अहल्त्वमेव सभ्यासः॥ तत आदिशेषः॥ आदिःशेषश्चेत्येव सभ्यासस्येति॰ अथवा योगविभागः करिष्यते॰ ह्रस्वः॥ ह्रस्वादेशो भवत्यभ्यासस्य ततो हल् हल्त्वं लुप्यते ऽभ्यासस्य ततः आदिशेषः॥ आदिशेषश्च भवत्यभ्यासस्य॥ ॥शर्पूर्वाः॥ ॥शर् पूर्वशेषे खय् ग्रहणं कर्त्तव्यं॰ खर् पूर्वाः खयः शिष्यंते खरो लुप्यंत इति वक्तव्यं॰ किं प्रयोजनं॰ उच्चिच्छिषतीति तुकः श्रवणं मा भूदिति॰ न तर्हि वक्तव्यं॰ न वक्तव्यं॰ चर्त्वे कृते तुङ् न विष्यते॰ असिद्धं चर्त्वं तस्यासिद्धत्वात्तुक् प्राप्नोति॰ सिद्धकांडे पठितमभ्यासजश्त्वं चर्त्वमेत्वतुकोरिति॰ एवमप्यंतरंगत्वात्प्राप्नोति तस्मात्खय्पूर्वग्रहणं कर्त्तव्यं न कर्त्तव्यं॰ एतत्तु ग्रहणं न करिष्यते अभ्यासजश्त्वचर्त्वं सिद्धमित्येव॰ आदिशेषप्रसंगस्तु॰ आदिशेषस्तु प्राप्नोतीति तिष्ठासतेति॰ ननु चानादिशेषः आदिशेषं बाधिष्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादसति खल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात् यथा दिशो पिभवति शर्पूर्ववचन मिदानीं किमर्थं स्यात्

कोऽनपेक्ष्याकृत एव तु किं द्विर्वचनं म[illegible]ताह॰ चर्त्वे कृत इति॰ अभ्यासे चर्चेति॰ चर्त्वे छस्य कृते तुगभावाद्रूपं सिध्यति॰ असिद्धमिति॰ तुकि कर्त्तव्ये॰ एवमप्यंतरंगत्वादिति॰ आष्टमिकत्वे प्युपायानामवश्याभ्यपलीयोंतरंगबहिरंगभावः॥ एतत्तुग्रहणमिति॰ नदकरणे हलादिशेषेऽपि कर्त्तव्ये चुत्वलक्षणस्य चर्त्वस्या सिद्धत्वान्नकारस्य च कारे कृते हलादिशेषेण निवृत्ते छकारे रूपं सिध्यति॰ आदिशेषप्रसंगस्त्विति॰ विषयभेदादविरोधाभावाच्च बाध्यबाधकभावायोगः॥ शर्पूर्ववचनमिति॰ अपवादा यावत्कार्यं द्वयं साधयंति अपवादं च विषयमुत्सर्गं च निवर्त्तयंतीति तचोत्सर्गाभ्युपगमे एकार्थवद्द्वितीयार्थस्य सागादानर्थक्यप्रसंग एवेत्यर्थः॥ हलो

भावात्

=निसत्वादितिभावः॥४=

=मतुवंतं॰ विशिष्टार्थस्यत्यागादित्यर्थः॥१= खयां लोपप्रतिषेधार्थमित्येनेनास्यापवादत्वमेवासिद्धत्वं नास्तीति उत्तरवाक्ये आशयमाह॰ हलादीति॰१=

व्यपकर्षविज्ञानादिति॰ व्यपकर्षणमुत्सर्गस्य निवर्त्तनं तस्य विज्ञानं तस्मादपवादविधानादित्यर्थः॰ एकाभ्यासविषयत्वादविशेषेप्युत्सर्गापवादभावः॥ ॥दाधर्त्ति॥ श्लाविति॰ ब
कुलं छंदसीति शपः श्लुः॰ तलुजानवदिति॰ तुजादीनां दीर्घोभ्यासस्येति दीर्घत्वमित्यर्थः॥ पर्णश्रुषिवदिति॰ यथा पर्णं निशोषयंति पर्णं शुषो वा तादृशादौ किपि बहुलमन्यत्रा

शपूर्ववचनं किमर्थमिति चेत्तत्वयां लोपप्रतिषेधार्थं॰ शपूर्ववचनं किमर्थमिति चेत्तत्वयां लोपो मा भूदिति॰ व्यपकर्षविज्ञानात्सिद्धं॰ व्यपकर्षविज्ञानात्सि
द्धमेतत्॰ किमिदं व्यपकर्षविज्ञानादिति॰ अपवादविज्ञानात्॰ अपवादत्वाच्चानादिशेष आदिशेषं बाधिष्यते [illegible] ननु चोक्तं कथमन्यस्योच्यमान
मन्यस्य बाधकं स्यादिति इदं तावदयं प्रष्टव्यः॰ यदि तन्नोच्येत किमिह स्यात्॰ हलादिशेषः॥ हलादिशेषश्चेत्प्राप्ते हलादिशेषे इदमुच्यते तद्बा
धकं भविष्यति॰ यदप्युच्यते असति खल्वपि संभवे बाधनं॰ अस्ति च संभवो यदुभयं स्यादिति॰ सत्यपि संभवे बाधनं भवति तद्यथा दधि ब्राह्म
णेभ्यो दीयतां तक्रं कौंडिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं बाधकं भवति॰ एवमिहापि सत्यपि संभवे अनादिशेष [illegible] आदि
शेषं बाधिष्यते॥ ॥दाधर्त्ति॥ ॥दाधर्त्तीति किं निपात्यते॰ धारयतेः श्लौ अभ्यासस्य दीर्घत्वं णिलुक् च॰ अनिपातने तलुजानवदभ्यासदीर्घत्वं प
र्णश्रुषिवल्लिलुग्भविष्यति॰ धङो वा श्लावभ्यासदीर्घत्वं परस्मैपदं च॰ अनिपातने तलुजानवदभ्यासस्य दीर्घत्वं युध्यतिवत्परस्मैपदं च भविष्यति॰ दर्द
र्षीति किं निपात्यते॰ धारयतेः श्लावभ्यासस्य रुक् णिलुक् च॰ अनिपातने देवा अदुह्रवद्रुक् पर्णश्रुषिवल्लिलुक् च भविष्यति॰ धङो वाभ्यासरुक् परस्मैप
दं च॰ अनिपातने देवा अदुह्रवद्रुक् युध्यतिवत्परस्मैपदं च भविष्यति॰ बोभूतिति किं निपात्यते॰ भवतेर्यङ्लुगंतस्य गुणाभावो निपात्यते॰ नैतदस्ति प्र
योजनं॰ सिद्धमत्र गुणत्वं भूसुवोस्तिङीति॰ एवं तर्हि नियमार्थं भविष्यति अत्रैव यङ्लुगंतस्य गुणो न भवति नान्यत्र॰ क्व माभूत्॰ बोभवतीति॰ तेतिक्ते इ
ति किं निपात्यते॰ तिजेर्यङ्लुगंतस्यात्मनेपदं निपात्यते॰ नैतदस्ति प्रयोजनं॥
पि संज्ञा छंदसो रिति णिलुक् भवत्येवं दाधर्त्तीत्यादौ न भविष्यतीत्यर्थः॥ धङ इति॰ धङ्
अवस्थान इत्यस्य शपो भावेप्यसेमनशः पू॰ युध्यतिवदिति॰ व्यत्ययो बहुलमित्यनेनेत्यर्थः॥ रुडिति॰ श्लौ रुक् बहुलं छंदसीत्यनेन॰ बोभवतीति॰ लिङ्ढ्यर्थे लेट् इत्यनेन टोडाटाविलट्॥

=प्रत्ययलक्षणस्य वृत्तौ विधेयमिति मतं तर्हि नियमार्थमिति पक्षे त प्रत्ययस्य आत्मनेपदं ... =

यस्य ङि त्वात्मन

सिद्धमत्रेति॰ प्रत्ययलक्षणेन॰ यद्यप्यनुदात्तङित इति ङित्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं तथापि लोल्लुयतइत्यादौ यङ्‌नाद्यात्मनेपदं तत्प्रत्ययलक्षणेन भवत्येव॰ एत
न्नियमार्थमिति॰ एवं चाद्यादिषु चर्करीतं परस्मैपदमिति लिंग। सिद्धानुवादः परस्मैपदग्रहणं कर्त्तर्येव चेदात्मनेपदं नियम्यतइति भावकर्मणोर्यङ्लुगन्तादात्मने
पदं भवत्येव॥ ॥घुति॥ ॥किमर्थमिति॰ स्वपिरेव सौत्रत्वान्निर्देशस्य दीर्घकत्वान्निर्दिष्टइति पूर्वपक्षः। तत्र लिटि किति वचिस्वपीति संप्रसारणविधानात्तत्र सं
प्रसारणस्य द्विर्वचने सत्यभ्यासस्य संप्रसारणं श्रूयते। किति लिट्यभ्यासस्येति संप्रसारणं सनोरुद ... विदे किद्वविधानाद्वचिस्वपीति संप्रसारणं स्वपिस्य

सिद्धमत्रात्मनेपदं॰ अनुदात्तङित आत्मनेपदमिति॰ एतन्नियमार्थं भविष्यति॰ अत्रैव यङ्लुगन्तस्यात्मनेपदं भवति नान्यत्रेति॰ क्वान्यत्र मा भू
त्‌ बेभिदीति चेछिदीति॥ ॥घुतिस्वा॥ ॥किमर्थं स्वापेरभ्यासस्य संप्रसारणमुच्यते यदा सर्वेष्वभ्यासस्थानेषु स्वपेः संप्रसारणमुक्तं स्वा
पिग्रहणं व्यपेतार्थं॰ व्यपेतार्थोयमारम्भः। सुष्वापयिषतीति॰ अस्ति प्रयोजनमेतत्॰ किं तर्हीति॰ तत्र कृदन्तेऽति प्रसंगः। तत्र कृदन्तेऽतिप्रसंगो
भवति॰ इहापि प्राप्नोति॰ स्वापकमिच्छति स्वापकीयति स्वापकीयतेः सन्‌ सिषापकीयिषति॰ सिद्धं तु णिज्ग्रहणात्‌॰ सिद्धमेतत्‌॰ कथं॰ णिज्ग्र
हणं कर्त्तव्यं॰ न कर्त्तव्यं॰ निर्देशादेवाभिव्यक्तं ण्यन्तस्य ग्रहणमिति॰ तन्निर्देशः प्रमाणं शक्यः कर्त्तुं यथाहि निर्देशस्तथा पे हापि प्रसज्येत स्वापं करो
ति स्वापयति॰ स्वापयतेः सन्‌ सिषापयिषतीति तस्माण्णिग्रहणं कर्त्तव्यं॥ ॥निजां॥ ॥त्रयग्रहणमनर्थकं गणान्तत्वात्॰ त्रयग्रहणमनर्थकं किं कारणं
गणान्तत्वात्‌॰ त्रय एव निजादयः।

स्वमियेत्तांयङि॰ च ङि स्वापेश्चङीति॰ व्यपेतार्थमिति॰ स्वपेः सनादिषु परतो विहितं संप्रसारणं णिचा व्यवधानेन न प्राप्नोतीति स्वापेर्ण्य
न्तस्याभ्यासस्य संप्रसारणं विधीयते॰ सुष्वापयिषतीति॰ स्वापयितुमिच्छतीति सन्‌ इट्‌ गुणायादेशाः। णौ कृतस्य स्थानिवत्त्वात्स्वपेर्ण्यन्तस्य द्विर्वचनमभ्याससंप्रसारणं
स्वोतिलोपोरितिषत्वं॰ इतरथा तु ण्यन्तस्य ग्रहणमबुध्वा येन केन चित्स्वपेनव्यवहितस्य स्वपेरभ्याससंप्रसारणमनेनोक्तमिति मत्वाह॰ अस्ति प्रयोजनमिति॰ स्व
पितीति स्वापकस्तमिच्छतीति क्यच्‌॰ निर्देशादेवेति॰ ण्यन्त एव स्वपिः सूत्रे निर्दिष्टइति भावः। स्वापं करोतीति स्वपेर्घञन्तात्तत्करोतीति णिच्‌॰ तस्माण्णिग्रहणमिति॰ स्वपे
र्णेरितिवक्तव्यं तेन स्वपेर्यो णिर्विधीयते तदन्तस्य ग्रहणाद्धञन्तात्सम्प्रग्रहणाभावः॥ ॥निजां॥ ॥त्रयग्रहणमिति॰ वृत्करणपरिच्छिन्नास्त्रय एव निजादयइत्यर्थः॥ ॥

=अस्य प्राप्तिमात्रेणोक्ते योनतत्र किंचित्प्रयोजनमस्ति ४=

एकारे विधातव्ये गुणग्रहणमिकः परिभाषोपस्थानार्थं तेन हलादिशेषे कृते गुणो भवत्यन्यथा तदपवादो हलः स्थाने एकारः स्यात् अभ्यासविकारेष्वपवादो नोत्सर्गान्बाध
न्त इत्याश्रीयते तदा विस्पष्टार्थं गुणग्रहणं ॥ ॥ अर्त्ति ॥ ॥ ऋच्छगनाविति जुहोत्यादौ पठ्यते गत्यर्थौ तु नोच छंदसीति छंदोग्रहणं पूर्वे भाषायामपि प्रयुज्यते नाम्नो रूपेष्विति छांदसएवार्त्ति
श्लुविषयः इयर्त्तीति तिप् शप् श्लुः श्लौ द्विर्वचनमुरदित्यत्वमित्वमभ्यासस्यासवर्णे इतीयङ् गुणो रपरत्वं ॥ ॥ गुणो ॥ ॥ एचो दिक् ह्रस्वस्यानवकाशः पपाविव्यादि

उत्तरार्थं तु [illegible] उत्तरार्थं तर्हि त्रिग्रहणं कर्त्तव्यं ऋज्ञामित् त्रयाणं यथा स्यादिह मा भूत् जहाति ॥ ॥ अर्त्ति ॥ ॥ अर्त्तिग्रहणं किमर्थं न वा फलं
छंदसीत्येव सिद्धं न त्वं तरेण छंदोर्त्तेः श्लुर्लभ्यः एवं तर्हि सिद्धे सति यदर्त्तिग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामर्त्तेः श्लुर्भवतीति किमेत
स्य ज्ञापने प्रयोजनं इयर्त्तीत्येतत्सिद्धं भवति ॥ गुणोय ॥ ॥ एचोर्यङि दीर्घप्रसंगो एचोर्यङि दीर्घत्वं प्राप्नोति डोढौकपते तो त्रौकपते ननु च ह्रस्व
ते कृते गुणो भविष्यति दीर्घत्वं न भविष्यति न सिध्यति किं कारणं ह्रस्वाद्विपरं दीर्घत्वं ह्रस्वत्वं क्रियतां दीर्घत्वमिति परत्वाद्दीर्घत्वेन भवितव्यं नवा
भ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् न वा एष दोषः किं कारणं अभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् अभ्यासविकारे
ष्वपवादा उत्सर्गान्न बाधंते इत्येषा परिभाषा कर्त्तव्या का न्वेतस्याः परिभाषायाः प्रयोजनानि प्रयोजनं सन्वद्भावस्य दीर्घत्वं अचीकरत्
अजीहरत् सन्वद्भावमपवादत्वाद्दीर्घत्वं न बाधते मान्मधतीनामित्वस्य मान्मधतीनां दीर्घत्वमपवादत्वादित्वं न बाधते गणेरीत्वं हलादिशे
षस्य गणेरीत्वमपवादत्वाद्धलादिशेषं न बाधते इदमयुक्तं वर्त्तते किमत्रायुक्तं एचोर्यङि दीर्घत्वप्रसंगे ह्रस्वाद्विपरं दीर्घत्वमित्युक्त्वा न तदुच्य
ते न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वादिति तस्याश्च परिभाषायाः प्रयोजनानि नामोच्यंते प्रयोजनं सन्वद्भावस्य दीर्घत्वं मान्मधतीनां
दीर्घत्वमित्वस्य गणेरीत्वं हलादिशेषस्येति ॥

दीर्घो कितः इत्यस्यावकाशः ह्रुते ह्रुनेवा ह्रस्वत्वे पापच्यत इति डोढौकत इत्यादौ तु परत्वादौकारस्य दीर्घ ओकार एव प्राप्नो
ति ऐकारस्योदाहरणं पेपेप्यत इति ह्रस्वत्वे कृते इति वक्ष्यमाणेऽभिप्रायः गुणश्च दीर्घस्यापवाद इति दीर्घाभावः इदमयुक्तमिति परत्वाद्दीर्घप्रसंगमुक्त्वोत्सर्गा
पवादयोर्बाध्यबाधकताभावः प्रतिपादितः इत्ययुक्तं प्रयोजनमपि किंचिन्न वचनानुरूपमिति पौर्वापर्यविरोधादयुक्तम् ॥ ॥७॥ ॥७॥

= प्रयोजनमिति लक्ष्यलक्षणयोरुत्सर्गापवादभावेनाप्राप्तत्वात् १ = पेपेप्यत इति दिमिनाक्षः २ = एतेषु सत्सु [illegible] = ततश्चेयं न तत्राभावात् गुणस्याप्राप्तिः ३ = पूर्वापरविरोधात् ९ =
[illegible] ॥ २ =

भा॰कै॰ ८५

नच सन्वद्भावमिति॰ सन्वद्भावस्यावकाशो ऽचिक्षणदिति दीर्घस्यावकाशो ऽदीदिपदिति इहोभयं प्राप्नोति अचीकरदिति न परत्वाद्दीर्घः प्राप्नोति॰ न खल्वपीति॰ सन्वल्लघोभ्यासदीर्घत्वं च सन्नियोगेन विधीयते इत्यन्तरंगं दीर्घत्वं सन्वत्त्वं तु बहिरंगं सन्निपरतो णाधिकारे भ्यासस्याकारान्तस्य विधानात्॰ न खल्वपीति॰ आदेशो विधीयते लस्य लीत्यमितिना स्युत्सर्गापवादभावो हलादिशेषे ऽभ्यासस्येत्यवयवषष्ठी इचगणाइ सचाभ्यासस्येति स्थानषष्ठीति भिन्नविषयावीत्व हलादिशेषो ऽनवकाशत्वात्तु बाधकमित्यलं हलादिशेषस्य निरवकाशा हि विधयः सावकाशान्विधीन्बाधन्त इति न्यायाद्घटादनुमेन नाशापद इति न्यायस्तदस्येवोत्सर्गापवादभावः॥ अभ्यासविकारेषु बाधका इति॰ बाधकलमनपेक्षितनिमित्तविशेषमाश्रयणीयमित्यर्थः॥ पदयमिति॰ यथा चाकित इति ज्ञापकं तथोत्तरत्र वक्ष्यते॥ ॥दीर्घो॥ ॥नु किकृते इति॰ दीर्घश्रुत्या च्चरिभाषोपस्था

नच सन्वद्भावमपवादत्वाद्दीर्घत्वं बाधते किंतर्हि परत्वात्॰ न खल्वपिमान्सतीनां दीर्घत्वमपवादत्वादित्वं बाधते किंतर्ह्यन्तरंगत्वात्॰ न खल्वपिगणेरीत्वमपवादत्वाद्धलादिशेषं बाधते किंतर्ह्यनवकाशत्वात्॰ एवं नहीयं परिभाषा कर्त्तव्या॥ अभ्यासविकारेषु बाधका न बाध्यन्त इति॰ स्यात्तर्हीषा परिभाषा कर्त्तव्या न कर्त्तव्या आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति॰ पदयमकित इति प्रतिषेधं शास्ति॥ ॥दीर्घो॥ ॥अकित इति किमर्थं॰ यंयम्यते रंरम्यते॰ अकित इति शक्यमकर्तुं कस्मान्न भवति यंयम्यते रंरम्यत इति॰ नु किकृते नजन्तत्वात्॰ अत उत्तरं पठति॰ अकिद्वचनमन्यत्र किदन्तस्यालोन्त्यनिवृत्त्यर्थं॰ अकिद्वचनं क्रियते ज्ञापनार्थं॰ किं ज्ञाप्यं॰ एतज्ज्ञापयत्याचार्यो ऽन्यत्र किदन्तस्यालोन्त्यविधिर्न भवतीति किमेतस्य ज्ञापने प्रयोजनं॰ ह्रस्वालोन्त्यगुणो नुड्ढ्रस्वत्वं॰ अपचच्छतुः अपचच्छुः अत्वं॰ चच्छदतुः चच्छदुः इत्वं॰ चिच्छादयिषति चिच्छर्दयिषति॰ गुणः चेछिद्यते चोक्षुद्यते नुकिकृते ऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति॰ विप्रतिषेधात्किदं

नाश्चाभ्यासस्य विशेषणादजन्तस्याभ्यासस्य दीर्घो विधीयते स चालोन्त्यस्येति वचना दस्य प्राप्नोति॰ अकिद्वचनमिति॰ यश्चाभ्यासो विशेष्यते अकित इति प्रतिषेधोनर्थकः स्यात्॰ तस्मादभ्यासेनाङ्गविशेष्यते नलोभ्यासस्येति विशेषणषष्ठी लन्तोस्येति नोपतिष्ठत इति ज्ञाप्यत इत्यर्थः॥ अपचच्छतुरिति॰ छोच्छदने आलंलिङ् छाशब्दस्य द्विर्वचनमन्तरंगत्वात्तु किकृते ऽनन्त्यस्याप्यचो ह्रस्वत्वं॰ चच्छदतुरिति॰ छदु दीप्तौ इत्येवमाः छदो द्विर्वचने छेचेति तुक्किकृते उरदित्व लमभ्यासेनऋवर्णस्य विशेषणात्॰ चिच्छादयिषतीति॰ छदसंवरणे॥

स्याभ्यास

शिवः ८५

परत्वादेते विषय इति·नैषेते बहुदाहरणेषु नुगंतरंगः अल्पविशेषनिमित्तत्वादभ्यासस्याभ्यासाश्रयत्वान्नुग्ह्रस्वादीनां·तदंताग्रहणं चेति·ज्ञापकमंतरेणापि विशेषणविशेष्यभावे कामचा
रात्तत्पि तु एते विषयाः सिध्यंति·एवं च कृत्वेति·तत्रश्वाकित इति वचनं दीर्घनिषेधापनत्वज्ञापनाय·अपवादो नुगिति·नाभ्यासे दीर्घं तु क आरंभात्·एवं तर्हीति·ओहाकू त्यागे इत्यस्य
तु निषेधायाकित इति न भवति यातुर्हि यं किल त्वभ्यासः ककारो हि ह्रश्च श्री हि कालयोरित्यत्र हाकूहाङोः सामान्यग्रहणार्थः॥ ॥नुग·॥ नपरकरणं तु तत्पूर्वस्यापि दीर्घस्य

नैतानि संति प्रयोजनानि·विप्रतिषेधेनाप्येतानि सिद्धानि·नुकियं तामेते विषय इति किमत्र कर्त्तव्यं·परत्वादेते विषय इति·तदंताग्रहणं·अथवा
नैवं विज्ञायते अभ्यासस्याजंतस्य ऋकारांतस्याकारांतस्येगंतस्येति·कथं तर्हि अभ्यासे योच् अभ्यासेय ऋकारः अभ्यासे यो·कारः अभ्यासेय इगि
ति·एवं च कृत्वा दीर्घत्वं प्राप्नोति·एवं तर्हि दमि हृस्वपदेशं सदाचार्येन व्यपदिशति किं·अपवादो नुग्दीर्घत्वस्येति·एवं तर्हि सिद्धे सति यद् किल
तिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा अभ्यासविकारेषु बाधका न बाधंत इति·किमेतस्य ज्ञापने प्रयोजनं·ऐचोर्य ङि दीर्घप्रसंगो
हृस्वाद्धि परं दीर्घत्वमिति यदुक्तं स न दोषो भवति·॥ ॥नुग·॥ ॥नुकियं यम्यते रंरम्यत इति रूपासिद्धि·नुकियं यम्यते रंरम्यत इति रूपं न सिध्यति
अनुस्वारागमवचनात्तु सिद्धं·अनुस्वारागमो वक्तव्यः·एवमपीदमेव रूपं स्यात् यँयम्यते इदं न स्यात् यंयम्यते·पदांतवच्चेति वक्तव्यं वा पदांत
स्येति·॥ ॥रीग·॥ ॥रीगृत्वतः संयोगार्थं·रीगृत्वत इति वक्तव्यं·किं प्रयोजनं·संयोगार्थं संयोगांताः प्रयोजयंति·वरीवृश्च्यते परीपृच्छ्यते वरीभ्रज्यते·
॥ ॥रुग्रि·॥ मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानं कर्त्तव्यं·मर्मृज्यते मर्मृज्यमानासः॥ ॥ऋतश्च·॥ ॥किमिदमृकारग्रहणमंगविशेषणमृका
कारांतस्यांगस्येत्याहोस्विदभ्यासविशेषणमृकारांतस्याभ्यासस्येति·अंगविशेषणमित्याह कथं ज्ञायते·॥

निवृत्त्यर्थं·तेन वा भाम्यत इति नुग्न भवति·नुकि
यंयम्यत इति·अनुस्वारत्वादनुस्वारेण न प्राप्नोति·एवमपीति·नित्यं परसवर्णः प्राप्नोति विकल्पेन चेष्यते·पदांतवच्चेति·तेन वा पदांतस्येति परसवर्णविकल्पः॥ ॥रुग्रि·॥
मर्मृज्यत इति·रुग्रिकौ च लुकीति रुग्विधीयमानो न प्राप्नोतीति वचनं·॥ ॥ऋतश्च·॥ ॥अंगविशेषणमिति·यद्यभ्यासविशेषणे ऋत पूर्वे दीर्घनिवृत्त्यर्थं तपरकरणं त
थापि मुख्यकल्पना संभवे गौणी कल्पना किमित्याश्रीयत इति मत्वा भाष्यकारेणांगविशेषणमेतदित्याश्रितं·॥

पचतीति॰ लन्ङ्उपलक्षणं॰ नेन चलटिचाकर्त्रीसादिरूपाणि किरतिं योनये दित्यर्थः॥ प्रामित्रमिति॰ तपरकरणादंग विशेषणाद्वत इति तेन ऋगादीनां विषयविभागेन यथा भानिस्तां जानातीत्यर्थः॥ आरब्धइति॰ संग्रहणं संग्रहः साधुशब्दराशिः स तेन प्रारब्ध इति योग्यतातिशयो भावनेन सूच्यते॥ ॥सन्वल॥ ॥चङ्परइति बहुव्रीहिणान्यपदार्थो णिराश्रीयते तेनाचकमतेति केवलेचङि सन्वद्भावो न भवति॰ नहि णिव्यतिरेकेणान्यः चङ्परः संभवति॰ तेन चङ्परे णौ यल्लघु तस्मिन्परतो भ्यासस्य सन्वत्का

यद्यंतपरकरणं करोति॰ कथं कृताशापकं॰ नहि कश्चिदभ्यासे दीर्घो स्तियदर्थं तपरकरणं क्रियते॰ अथांगविशेषणे ऋकारग्रहणे सति तपरकरणे किं प्रयोजनं॰ इहमा भूत्॰ चाकीर्तेः चाकिरति॰ किरतिं चकेरीनां तं पचतीत्यत्र योनयेत्॰ भानित्रं तमहं मन्ये प्रारब्धस्तेन संग्रहः॥ सन्वत्॰॥ ॥इरुक स्मान्न भवति अजजागरत्॰ लघुनि चङ्परइत्युच्यते व्यवहितं चाच लघु चङ्परं॰ इहापि तर्हि न प्राप्नोति॰ अचीकरत् अजीहरत्॰ वचनात्भविष्यति॰ इहापि वचनात्प्राप्नोति॰ अजजागरत्॰ येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्॰ केन चनाव्यवधानं वर्णे नैकेन॰ एतेन पुनः संघातेन व्यवधानं भवति च न भवति च॰ एवमप्यचिक्षणदत्र न प्राप्नोति॰ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवं जातीयकानामित्वमिति॰ यद्यमत्त्वत्वरप्रथम्रदस्तृस्पशामित्यत्वं शास्ति॰ सन्वद्भावदीर्घत्वे णौ चङ्युपसंख्यानं कर्तव्यं॰ वादितवंतं प्रयोजितवान वीवदद्वीणां परिवादकेन॰ किंपुनः कारणं न सिध्यति॰ णिचा व्यवहितत्वात्॰ लोपे कृते नास्ति व्यवधानं॰ स्थानिवद्भावाद्व्यवधानमेव॰ प्रतिषिध्यते त्र स्थानिवद्भावः दीर्घविधिं प्रतिन स्थानिवदिति॰ एवमप्यनग्लोप इति प्रतिषेधः प्राप्नोति॥

र्यभवति॰ इरुकस्मादिति॰ नकश्चिदभ्यासो लघोरनंतरः संभवतीति सप्तमी विज्ञानादत्रापि प्रसंग इति भावः॥ इतरः परसप्तम्या येन नाव्यवधानमित्याश्रीयत इतिम् लाः लघुनीतिः॥ एवं जातीयकानामिति॰ संयोगव्यवहितानामित्यर्थः॥ णिचाव्यवहितत्वादिति॰ चङ्परे णौ यल्लघु तस्मिन्परतो भ्यासस्य सन्वद्भावः यस्मिंश्चाचुणे लघुनी सो चङ्परः य स्तु चङ्परो न तस्मिन्परतो लघुः॥ दीर्घविधिं प्रतीति॰ नतु दीर्घे कर्तव्ये भवति स्थानिवत्वनिषेधः सन्वद्भावेतु प्राप्नोति स्थानिवद्भावः एवं तर्हि दीर्घ भाविताङ्गीकारेणुपचाराद्दीर्घशब्देनोच्यत इति भाष्यकारस्याभिप्रायः किंतु सन्वे दीर्घं संभवति गौणग्रहणमयुक्तमिति चिंत्यमेतत्॥

वाकीर्तेः

यङ्लुकः संज्ञा

=वृद्धिरुपिसंगात्...मेन न भावादनदंगसंबंध्यभ्यासलोपो न लोप इत्यनेनेति नानेन तदतिदेशादिति भावः।७=

भा॰कै॰
८७

वृद्धौ कृतायां लोप इति· एतत्सोऽचि ङ्गीति सूत्रभाष्येण विरुध्यते· तत्र त्वगिति प्रत्याहारग्रहणसामर्थ्यादकृतायां वृद्धौ लोप इति प्रतिपादितं· मीमादीनां त्विति· सनि मीमाघुरभ्यासकार्यं न दृष्टमिति दिश्यते मीमादीनां च सन्यभ्यासस्य लोपो दृष्ट इति सन्वद्भावः प्राप्नोति· सिद्धं त्विति· नेह कार्यमतिदिश्यते अपि तु रूपं लोपश्चाभावः रूपं लोपेन भवतीति नातिदिश्यते· किं चात्र लोपोऽभ्यासस्येत्यत्र ग्रहणं विषयावधारणार्थं तेन सादिविषय एवाभ्यासस्य लोपो भवतीति तदभावे तु सन्वद्भावान्न भवति· अंगान्यत्वादिति· मीमादीनामंगानामभ्यासलोपो विहितः अयं त्वभ्यासो ण्यन्तानामिति न दुष्यते· अन्ये तु व्याचक्षते· चङ्परे णौ यदंगं तदभ्यासस्य सन्वद्भावो विधीयते णौ मीमादी

वृद्धौ कृतायां लोपस्तस्माल्लोप्यंगं भवति· एवं तर्हीदमिह संप्रधार्यं वृद्धिः क्रियतां लोप इति· किमत्र कर्त्तव्यं· परत्वाद्वृद्धिः। नित्यो लोपः कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि· लोपोऽप्यनित्यः। अन्यस्य कृतायां वृद्धौ प्राप्नोत्यन्यस्याकृतायां· शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति· उभयोरनित्ययोः परत्वाद्वृद्धिः वृद्धौ कृतायां लोपः तस्माल्लोप्यंगं भवति· मीमादीनां तु लोपप्रसंगः। मीमादीनां तु लोपः प्राप्नोति· अमीमपत्· सिद्धं तु रूपातिदेशात्· सिद्धमेतत्· कथं· रूपातिदेशोऽयं· सनि यादृशमभ्यासरूपं तत्सन्वद्भावेनातिदिश्यते· न च मीमादीनां सन्यभ्यासरूपमस्ति· अंगान्यत्वाद्वा सिद्धं· अथवा एवं तमेतदंगमन्यत्· लोपे कृते नांगान्यत्वं· स्थानिवद्भावादंगमन्यत्· कथं अजिज्ञपत्· अत्र सन्यपि एवं तस्यैवोपादानमाभूज्ज्ञप्यामीदिति· न चांगान्यत्वादभ्यासलोपः स्यात्· तस्मात्पूर्व एव परिहारः सिद्धं तु रूपातिदेशादिति·॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकं॥ ॥पादश्च समाप्तोऽध्यायश्च॥ ॥७॥

न्येवांगानि पुकस्तत्कृतत्वात्तद्ग्रहणेन ग्रहणं तत्स्मादंगान्यत्वादित्यस्यायमर्थः। येषामंगानामच्च इसादिर्विधीयते तदभ्यासस्याग्रहणाद्विषयावधारणार्थाल्लोपो नान्येषामिति इसादिरहितानाममीमपदित्यादौ च धातोः सन्वद्भावादिसाद्यभावादभ्यासलोपाभावः। अथवा सकारादौ सन्यभ्यासलोपो विहितो न सन्मात्रे सामान्यातिदेशाल्लोपाभावः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकं॥ पादोऽध्यायश्च समाप्तः॥ सं· १८२८ आषाढ॥

तिदेशे विशेषान्

भावा२

शिवः
८७

=न्येषामिति· अस्य व्याख्यानमित्यादिरहितानामिति·२=इसाद्यभावे हेतुः। धातोः सन्वद्भावादिति· मीमादीनां...विधीयते...कार्यं प्रति सन्वद्भावोऽस्ति अभ्यासकार्यविषयत्वात्सेति भावः।२=सः शीलमनुवर्त्तनात्·२=



